A.C. Joshi Library
P.U. Chandigarh

MSS No. 156 Subject Religion

Name of MSS पद्य भावार्थदीपिका : श्रीमद्भागवत व्याख्या

Author श्रीधर स्वामी

Period - - Folios 143

Script Sanskrit Source Prithipal Singh

Missing Folios

श्रीभा°
१० उ°
५

क्रुद्धस्य तस्य दृष्टिपातेन यः संदीप्तः स्वदेहजो ऽग्निस्तेन ॥ १४ ॥ यवनमर्दयति हिनस्तीति तथा स कस्य वंश्यः किंवीर्यः कीदृक्प्रभाववान् ॥ किंते
जः कस्य वीर्यं प्रत्र इत्यर्थः शिष्ये अशयिष्ट ॥ १५ ॥ सत्यः संगरो प्रतिज्ञा वाचा यस्य ॥ १६ ॥ १७ ॥ गुहं कार्त्तिकेयं स्वःपालं स्वर्गपालं लब्ध्वा सेनाध्य

स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥ दिशो विलोकयन्पार्श्वे तमद्राक्षीदवस्थितं ॥ १३ ॥ स तावत्तस्य रुष्टस्य दृष्टिपा ३
तेन भारत ॥ देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ १४ ॥ राजोवाच ॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य एव च
कस्माद्गुहां गतः शिष्ये किंतेजो यवनार्दनः ॥ १५ ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मांधातृतनयो महान् ॥ मुचु
कुंद इति विख्यातो ब्रह्मण्यः सत्यसंगरः ॥ १६ ॥ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षाम
करोच्चिरं ॥ १७ ॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥ १८ ॥ नरलो
के परित्यज्य राज्यं निहतकंटकं ॥ अस्मान्पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १९ ॥ सुता महिष्यो भवतो ज्ञातयो ऽमात्यमं
त्रिणः ॥ प्रजाश्च तुल्यकालीना नाधुना संति कालिताः ॥ २० ॥ कालो बलीयान्बलिनां भगवानीश्वरो ऽव्ययः ॥ प्रजाः का
लयते क्रीडन्पशुपालो यथा पशून् ॥ २१ ॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः २०

क्ष ॥ १८ ॥ उज्झिता अस्मत्कार्यागता इत्यर्थः ॥ १९ ॥ किंच तुल्यकालीनाः त्वत्समानकालीनाः कालिताः विचालिताः ॥ २० ॥ मत्प्रजाः को नु पालये
दिति चेदत आह ॥ काल इति कालयते इतस्ततश्चालयति ॥ २१ ॥ तस्य कैवल्यस्य ॥ २२ ॥ राम राम राम राम राम राम राम ॥

राम
५

गुहायां प्रविष्टः शेते स्म ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ धर्षितोभिभूतः दुर्धर्षं ग्रहस्य ॥ २७ ॥ विपिने अरण्ये तत्रापि गिरेर्गह्वरे उग्रप्रवेशस्थाने त
त्राप्युरुकंटके ॥ पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसीति ॥ २८ ॥ तेजो ध्रुतिः प्रभावो वा दीप्तिर्वा ॥ २९ ॥ सर्वत्रापरितोषादाह ॥ मन्ये इति ॥ पुरुषर्षभ

एवमुक्तः स वै देवानभिवंद्य महायशाः ॥ अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ २१ ॥ स्वापयंतं यस्तु मध्ये बोधयेत्त्वामचेत
नः ॥ स त्वया दृष्टमात्रस्तु भस्मी भवति तत्क्षणात ॥ २२ ॥ अशयिष्ट गुहाविष्टो निद्रया देवदत्तया २२ ॥ यवने भस्मसान्नी
ते भगवान्सात्वतर्षभः ॥ आत्मानं दर्शयामास मुचुकुंदाय धीमते ॥ २३ ॥ तमालोक्य घनश्यामं पीतकौशेयवाससं ॥ श्रीवत्स
वक्षसं भ्राजत्कौस्तुभेन विराजितं ॥ २४ ॥ चतुर्भुजं रोचमानं वैजयंत्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥ २५ ॥
प्रेक्षणीयं त्रिलोकस्य सानुरागस्मितेक्षणं ॥ अपीच्यदर्शनं मत्तमृगेंद्रोदारविक्रमं ॥ २६ ॥ पर्यपृछन्महाबुद्धिस्तेजसा तस्य
धर्षितः ॥ शंकितः शनकै राजा दुर्धर्षमिव तेजसा ॥ २७ ॥ मु ॐ उ ॥ च ॥ को भवानिह संप्राप्तो विपिने गिरिगह्वरे ॥ पद्भ्यां पद्म
पलाशाभ्यां विचरस्युरुकंटके ॥ २८ ॥ किंस्वित्तेजस्विनां तेजो भगवान्वा विभावसुः ॥ सूर्यः सोमो महेंद्रो वा लोकपालो परो
पि वा ॥ २९ ॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभं ॥ यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया यथा ॥ ३० ॥ शुश्रूषतामव्यलीकमस्मा
कं नरपुंगव ॥ स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचते ॥ ३१ ॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकः क्षत्रबंधवः ॥ मुचुकुंद इति प्रोक्तो यौ
वनाश्वात्मजः प्रभो ॥ ३२ ॥ चिरप्रजागरश्रांतो निद्रयापहतेंद्रियः ॥ शये स्मिन्विजने कामं केनाप्युत्थापितोधुना ॥ ३३ ॥ सोपि
भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनंतरं भवान्श्रीमांल्लक्षितोमित्रशातन ॥ ३४ ॥ तेजसा तेविषह्येन भूरि द्रष्टुं न शक्नुमः
हतौजसो महाभाग माननीयोसि देहिनां ॥ ३५ ॥ एवं संभाषितो राज्ञा भगवान्भूतभावनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगंभी

श्रीविस्तु गुहाध्वांतमंतस्तमः ॥ ३० ॥ ३१ ॥ वयं त्विति वंशाभिप्रायेण बहुवचनमुक्तं ॥ तेष्वहं मुचुकुंद इति यौवनाश्वो मांधाता मे पिता ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३६ ॥

कचित्कदाचित्कश्चिद्यद्यपिरजांसिविममेगणितवान् ॥ तथापिनजन्मानिकर्माणिचविममे ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ नतेस्मिन्मच
नृपाणिमित्तेनमयैवदत्तः ॥ अहंमृणीहमितिशोचितं ॥ यद्वाअन्यैर्दत्तैःस्ववरैस्तुष्टोसि ॥ यथाशोचति ॥ नैवंमामुपपन्नः महत्त्ववराणामहत्त्वात्वादि
तिभावः ॥ ४५ ॥ अष्टाविंशतितमेयुगेभगवान्भविष्यतीतिवृद्धगर्गवाक्यमनुस्मरन्नुदयत्यर्थः ॥ ४५ ॥ त्वत्प्रसादरेवकेवलंदुर्लभाकामप्रत्युकानव

श्रीभगवानुवाच ॥ जन्मकर्माभिधानानिसंतिमेंगसहस्रशः ॥ नशक्यंतेनुसंख्यातुमनंतत्वान्मयापिहि ॥ ३७ ॥ क्वचिद्रजां
सिविममेपार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानिनमेजन्मानिकर्हिचित् ॥ ३८ ॥ कालत्रयोपपन्नानिजन्मकर्माणि
मेनृप ॥ अनुक्रमंतोनैवांतंगच्छंतिपरमर्षयः ॥ ३९ ॥ तथाप्यद्यतनान्यंगशृणुष्वगदतोमम ॥ विज्ञापितोविरिंचेनपुराहं
धर्मगुप्तये ॥ ४० ॥ भूमेर्भारायमाणानामसुराणांक्षयायच ॥ अवतीर्णोयदुकुलेगृहेआनकदुंदुभेः ॥ ४१ ॥ वदंतिवासुदेवे
तिवसुदेवसुतंहिमां ॥ कालनेमिर्हतःकंसःप्रलंबाद्याश्चसद्द्विषः ॥ ४२ ॥ अयंचयवनोदग्धोराजंस्तेतिग्मचक्षुषा ॥ सो
हंतवानुग्रहार्थंगुहामेतामुपागतः ॥ ४३ ॥ प्रार्थितःप्रचुरंपूर्वंत्वयाहंभक्तवत्सलः ॥ वरान्वृणीष्वराजर्षेसर्वान्कामान्द
दामिते ॥ ४४ ॥ मांप्रपन्नोजनःकश्चिन्नभूयोर्हतिशोचितुं ॥ ४४ ॥ श्रीशुकउवाच ॥ इत्युक्तस्तंप्रणम्याहमुचुकुंदोमुदान्वि
तः ॥ ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ॥ ४५ ॥ मु० उ० च ॥ विमोहितोयंजनईशमाययात्वदीययात्वांनभज
त्यनर्थदृक् ॥ सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पुरुषश्चवंचितः ॥ ४६ ॥ राम राम राम राम राम

रण्येत्याद्यत्याशयेनाभक्तानांसमाचष्टेभिःप्रपंचयन्नस्तौति ॥ विमोहितइति ॥ हेईशयोषित्पुरुषश्चेतिद्विविधोप्ययंजनःत्वदीयया
माययामोहितः अतःअनर्थदृक्अनर्थंपश्यत्यनर्थंस्वंवेत्तांपश्यतीतितथाअतस्त्वांनभजतीतिकिंतुपरस्परंवंचितःसन्सुखायदुःखाना
मेवप्रभवोयेषुतेषुगृहेष्वेवसज्जतेइति ॥ ४६ ॥

राम
६

किंचकामस्त्वावंस्त्रुकरादिष्वपिसंभवतिभगवत्सेवांतुनमानुष्यव्यतिरेकेणेति ॥ मानुषत्वंप्राप्यत्वामभजन्नतिमूढइत्याह ॥ लब्ध्वेति ॥ अत्रकर्मभूमौ
अव्यंगमविकलांगं ॥ किंच ॥ असतिविषयसुखेमतिर्यस्यसः ॥ गृहमेवांधकूपः तस्मिन्पतति ॥ यथापशुस्तृणलुब्धोंधकूपेपततीति ॥४७॥ नके
वलमस्यजनस्यैवंगतिः किंतुममापितथैवेत्याह ॥ ममेति ॥ मर्त्येशरीरेआत्मबुद्धिर्यस्यतस्यमम अतएवसुतादिष्वासज्जमानस्य ॥४८॥ दुर्मद
मदत्वंप्रपंचयति ॥ कलेवरइति ॥ घटकुड्यादिसदृशेअनात्मनि ॥४९॥ यतएवंस्तुदुर्मदोभवं ॥ अतोममेषकालोनिष्फलोगतइति ॥ त्वामगणयतमा

लब्ध्वाजनोदुर्लभमत्रमानुषंकथंचिदव्यंगमयत्नतोनघ ॥ पादारविंदंनभजत्यसन्मतिर्गृहांधकूपेपततितोयथापशुः ॥४७॥
मेमेषकालोऽजितनिष्फलोगतोराज्यश्रियोन्नद्धमदस्यदुर्मतेः ॥ मर्त्यात्मबुद्धेःसुतदारकोशभूष्वासज्जमानस्यदुरंतचिंतया ॥४८॥ कलेवरेस्मिन्घटकुड्यसन्निभेनिरूढमानोनरदेवइत्यहं ॥ वृतोरथेभाश्वपदात्यनीकपैर्गांपर्यटंस्त्वामगणय्यदुर्मदः ॥४९॥ प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसं ॥ त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकः ॥५०॥ पुरारथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वानरदेवसंज्ञितः ॥ सएवकालेनदुरत्ययेनतेकलेवरोविट्कृमिभस्मसंज्ञितः ॥५१॥ योऽनैःसहस्राणिबहूनिगत्वादुःखेनलब्ध्वापिचमानुषत्वं ॥ स्वार्थंविहायैवनभजंतिविष्णुंहरिंतेवैमनुष्यात्मनिशाचरेभ्य
ताः ५२

क्रमसीत्याह ॥ प्रमत्तमिति ॥ प्रमत्तमनवहितंत्वामविगणय्यदेहादिष्वासक्तमितियावत् ॥ कुतः प्रमत्तमितिकृत्यचिंतयाएवमेवकरणीयमि
तिमनोरथपरंपरयामनोरथेभग्नेपिविषयेषुलालसमुत्सुकं ॥ प्राप्तेपिपुनःप्रवृद्धोलोभस्तृष्णायस्यतं ॥ अतकरत्वमभिपद्यसेअभिभवसी
त्यर्थः ॥ क्षुधात्कटक्षिणीलेलिहानोहिः ॥ आखुंमूषकमिवेति ॥५०॥ किंच ॥ कालात्मनात्वयाभिपन्नोदेहएवंभवतीत्याह ॥ स्वष्टालादिभिर्भ
क्षितोविट्संज्ञितःनैरभक्षितःक्रिमिसंज्ञितः ॥ दग्धोभस्मसंज्ञोभवतीति ॥५१॥ इत्थंविचार्यैवंभूतेशरीरेममतांकुर्वंतोजनाहरिंनाराधयंतेतेआ
त्मनिशाचरभूताज्ञेयाः ॥५२॥

श्रीभा
१० ५१
७

यतः किंचांतकपाशैः पाशापिविविदग्धनोराज्ञोपिपारतंत्र्यं दुःखं तदस्येवेत्याह ॥ निर्जित्येति ॥ अभूतविग्रहः अविद्यमानसंग्रामः सर्वसमस्तैरा
जभिर्वंदितोपि मिथुनीभावः परं सुखं येषु तेषु योषितां गृहेषु क्रीडामृग इव बद्धस्ततो नीयते ॥ ५२ ॥ किंच तत्रापि तस्मात्कालस्य तस्य न भोगालसे
त्यां किंचिदस्तीत्याह ॥ करोतीति ॥ तपसि सुष्ठु अधः शयनब्रह्मचर्यादौ सुनिष्ठितः ॥ पुनश्च स्वराट् इंद्रः स्यामिति ॥ यद्वा जन्मांतरे एवमेव चक्रवर्ती

निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः ॥ गृहेषु मैथुन्यपरेषु योषितां क्रीडामृगः पूरुष ईश नीयते
५३ ॥ करोति कर्माणि तपः सुनिष्ठितो निवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखा
य कल्पते ॥ ५४ ॥ भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ॥ सत्संगमो यर्हि तदैव सद्गतौ परावरेशे
त्वयि जायते मतिः ५५ राम राम राम राम राम राम राम राम राम राम राम ॥ टि

स्यामिति ५४ तदेवमेभिः श्लोकैः बहिर्मुखानां संसारं प्रपंच्य भक्तानां निवृत्तिक्रममाह भवापवर्ग इति भोः अच्युत भ्रमतः
संसरतो जनस्य यदा त्वदनुग्रहेण भवस्य बंधस्यापवर्गः अंतो भवेत् प्राप्तकालः स्यात् तदा सतां संगमो भवेत् तदा सर्वसंगनिवृत्त्या
कार्यकारणानियंतरि त्वयि भक्तिर्भवति ततो मुच्यते इत्यर्थः ५५ रामायनमः श्रीकृष्णायनमः राम राम राम राम ॥ राम
७

ममात्रसत्संगमात्स्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वयामदनुग्रहःकृतइत्याह ॥ मन्येइति ॥ तेत्वयासाधुभिर्विवेकिभिःतपसेवने
प्रवेष्टुमिच्छद्भिः स्वयंत्यक्तुमलभमानैर्योराज्यानुबंधःप्रार्थ्यतेइति ॥५५॥ तदेवंविषयसेवामार्गंभगवत्सेवामार्गंचविविच्यवरान्वृणीष्वे
ति ॥ यदुक्तंतत्रोत्तरमाह ॥ नकामयइति ॥ अकिंचनानिवृत्ताभिमानाः ॥ आर्योविवेकी ॥५६॥ रजस्तमःसत्वगुणैरनुबध्यतेइतितथाताःएव
र्याशत्रुमरणादिधर्मादिरूपाविसृज्यपरंपुरुषमीश्वरंज्ञप्तिमात्रंज्ञानघनंकुतः निरंजनंतत्कुतः निर्गुणंतदपिकुतः अद्वयंअतएवाहंत्वां

मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृच्छया ॥ यःप्रार्थ्यतेसाधुभिरेकचर्ययावनंविविक्षद्भिरखंड
भूमिपैः ॥५५॥ नकामयेन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो ॥ आराध्यकस्त्वांह्यपवर्गदंहरेवृणीतआ
र्योवरमात्मबंधनं ॥५६॥ तस्माद्विसृज्याशिषईशसर्वतोरजस्तमःसत्वगुणानुबंधनाः ॥ निरंजनंनिर्गुणमद्वयंपरं
त्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहं ॥५७॥ चिरमिहवृजिनार्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिःकथंचित्
शरणदसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ॥५८॥ राम राम राम राम ॥

शरणंव्रजामीति ॥५७॥ भुंक्ष्वतावद्भोगान्कैवल्यंतुकालस्यमेवेतिपूर्ववरैर्विलोभयंतंश्रीकृष्णंपादोपग्रहणेनप्रार्थयते ॥ चिरमिति ॥ वृजिनैः
कर्मफलैरार्तःपुनस्तत्तद्वासनाभिस्तप्यमानस्तथापिअवितृषषडमित्रःतृडेवतृषात्स्मान्नविगततृषाःषडमित्राःसपत्नाइंद्रियलक्षणायस्य
सः ॥ अतएवालब्धशांतिःकथंचिदिहस्ववशेनलब्धशांतिरितिवा ॥ शरणंस्वज्ञानंतद्ददातीति यद्वाहेशरणदसमुपेतःप्राप्तोहं ॥ अशोकत्वे
हेतुः ॥ अभयंतत्रापिहेतुः ॥ अतआपन्नमापदाव्याप्तंपाहीति ॥५८॥ ॥ राम राम राम राम राम राम राम राम ॥

श्री भा
द॰ उ॰
८

अप्रमादाय प्रमादाय न भवत्येव ॥ कुत इत्यत आह ॥ नधीरिति ॥ एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भिद्यते नासज्जते इत्यर्थः
६१ ॥ व्यतिरेकमाह ॥ युंजानानामिति ॥ अक्षीणवासनं विषयाभिमुखं ॥ ६२ ॥ तभ्यंतव ॥ ६३ ॥ शुक्लया भासेन भाव्यं स्वल्पमति लोकसंग्रहे प्रवर्तयति

श्रीभगवानुवाच ॥ सार्वभौम महाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ५९ ॥ प्र
लोभितो वरैर्यत्त्वमप्रमादाय विद्धि तत् ॥ न धीरेकान्तभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ६० ॥ युञ्जानानामभ
क्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन्दृश्यते क्वचिदुत्थितं ॥ ६१ ॥ विचरस्व महीमेतां मय्यावेशि
तमानसः ॥ अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६२ ॥ क्षात्रधर्मस्थितो जन्तून्न्यवधीर्मृगयादिभिः ॥ समा
हितस्तत्तपसा जह्यघं मदुपाश्रितः ॥ ६३ ॥ जन्मन्यनन्तरे राजन्सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि
केवलं ॥ ६४ ॥ इति श्री भागवते म॰ दशमस्कंधे कालयवनवधे मुचुकुंदस्तुतिर्नाम एकपंचाशत्तमोध्यायः ॥ ५१ ॥ श्रीशुक
उवाच ॥ इत्थं सोऽनुगृहीतोऽङ्ग कृष्णेनेक्ष्वाकुनन्दनः ॥ तं परिक्रम्य संनम्य निश्चक्राम गुहामुखात् ॥ १ ॥ संवीक्ष्य क्षु
ल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ॥ मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तरां ॥ २ ॥ तपःश्रद्धायुतो धीरो निःसंगो
मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गन्धमादनं ॥ ३ ॥ बदर्याश्रममासाद्य नरनारायणालयं ॥ सर्वद्वंद्वस
हः शान्तस्तपसाराधयद्विभुं ॥ ४ ॥

तात्रधर्ममिति ॥ ६४ ॥ ६४ ॥ इति श्रीभागवते दशमस्कंधे टीकायां एकपंचाशत्तमोध्यायः ॥ ५१ ॥ द्विपंचाशे तु मेधावन्मयादिव गतः शौरी ॥ अन्व
मोदत संदेशं रुक्मिण्या द्विजवर्णितं ॥ १ ॥ क्षुल्लकान् अल्पप्रमाणान् ॥ २ ॥ तपसा श्रद्धया च युतः तत्र बदर्याश्रमे ॥ ३ ॥ ४ ॥ रणायनम ॥ कृष्णायन
मः

राम
८

निम्नेनयन्मार्गैर्वल्गतिस ॥५॥६॥ वेगरभसंवेगोद्रेकं ॥७॥ भीरुभीतवत् भीरोरपिभीरुवत् अतिभीतवदित्यर्थः ॥ चेलतुः ॥ पलायतां बहुयोजनं
देशं ॥८॥ अप्रमाणवित् प्रमाणमियत्तातन्नवेत्तीतितथा ॥९॥ तुंगमेकादशयोजनोन्नतं ॥ प्रकर्षेणवर्षयत्यस्मिन्निति प्रवर्षणइत्याख्यायस्यतं ॥

भगवांस्तुनराजन्यप्रेरीयवनवेष्टितां ॥ हत्वाम्लेच्छबलंनिन्येतदीयंद्वारकांधनं ॥५॥ नीयमानेधनेगोभिर्नृभिश्चाच्युत
चोदितैः ॥ आजगाममागधस्त्रयोविंशत्यनीकपः ॥६॥ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवो ॥ मनुष्यचेष्टामापन्नो
३ राजन्दुद्रुवतुर्द्रुतं ॥७॥ विहायवित्तंप्रचुरमभीतौभीरुभीतवत् ॥ पद्भ्यांपद्मपलाशाभ्यांचेलतुर्बहुयोजनं ॥८॥ पलायमा
नौतौदृष्ट्वामागधःप्रहसन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥ प्रद्रुत्यदूरंसंश्रान्तौतुंगमारुहतां
गिरिं ॥ प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति ॥१०॥ गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप ॥ ददाहगिरिमेधोभिः
समंतादग्निमुत्सृजन् ॥११॥ ततउत्पत्यतरसादह्यमानात्तटादुभौ ॥ दशैकयोजनोत्तुंगान्निपेततुरधोभुवि ॥१२॥ अ
लक्ष्यमाणौरिपुणासानुगेनयदूत्तमौ ॥ स्वपुरंपुनरायातौसमुद्रपरिखांनृप ॥१३॥ सोपिदग्धावितिमृषामन्वानोब
लकेशवौ ॥ बलमाकृष्यसुमहन्मगधान्मागधोययौ ॥१४॥ आनर्ताधिपतिःश्रीमान्रैवतोरैवतींसुतां ॥ ब्रह्मणाचो
दितःप्रादाद्बलायेतिपुरोदितं ॥१५॥ भगवानपिगोविंदउपयेमेकुरूद्वह ॥ वैदर्भींभीष्मकसुतांश्रियोमात्रांस्वयंव
रे ॥१६॥ प्रमथ्यतरसाराज्ञःसाल्वादींश्चैद्यपक्षगान् ॥ पश्यतांसर्वलोकानांतार्क्ष्यपुत्रःसुधामिव ॥१७॥ रामायनमः

तदाप्रभृतिमघवाइंद्रः तत्रविचित्रवर्षपितयोः पदेनिलयस्थानमनधिगम्य ॥११॥ ततोगिरेर्दशैकंचयानियोजनानितावदुत्तुंगात्मागधसंरो
धदेशमतिक्रम्यपरतोऽधोनिपेततुः ॥१२॥ १३॥ श्रीकृष्णस्यविवाहान्निरूपयितुंबलदेवविवाहंनवमस्कंधोक्तंअनुस्मारयति ॥१४॥ आनं
र्तेति ॥१५॥ मात्रांकलां ॥१६॥ गरुडोयथादेवान्प्रमथ्यामृतंयामहरत्तथेति ॥१७॥ राम राम राम राम राम राम राम राम

श्रीभा०
द० ३
२

राक्षसो युद्धहरणादिति स्मृतेः ॥ राज्ञः प्रश्नमुपचेतितं तद्भक्त्या राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं ॥ पूर्वमेव वा सामान्यत एव श्रु-
तं ॥१८॥ विशेषं श्रोतुमिच्छामि ॥१९॥ श्रवणौत्सुक्यमाविष्करोति ब्रह्मन्निति ॥ पुण्या महाफलाः माध्वीः श्रुतिसुखाः लोकस्य मलापहाश्च

राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननां ॥ राक्षसेन विधानेन उपयेमे इति श्रुतं ॥१८॥ भगवन् श्रोतु-
मिच्छामि कृष्णस्यामिततेजसः ॥ यथा मागधसाल्वादीञ्जित्वा कन्यामुपाहरत् ॥१९॥ ब्रह्मन्कृष्णकथाः पुण्या मा-
ध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥२०॥ श्रीशुक उवाच ॥ राजासीद्भीष्मको नाम वि-
पं दर्भाधिपतिर्महान् ॥ तस्य पंचाभवन्पुत्राः कन्यैका च वरानना ॥२१॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरथापरः ॥ रुक्म-
केशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥२२॥ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रियः ॥ गृहागतैर्गीयमानास्तं
रा मेने सदृशं पतिं ॥२३॥ तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥२४॥ बंधू-
नामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्विड् रुक्मी चैद्यममन्यत ॥२५॥ तदवेत्यासितापांगी वैद-
र्भी दुर्मना भृशं ॥ विचिंत्याप्तं द्विजं कंचित्कृष्णाय प्राहिणोद्द्रुतं ॥२६॥ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः
अपश्यदाद्यं पुरुषमासीनं कांचनासने ॥२७॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् ॥ उपवेश्यार्हयांचक्रे य-
थात्मानं दिवौकसः ॥२८॥ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः ॥ पाणिनाभिमृशन्पादावव्यग्रस्तमपृच्छत ॥२९॥

शृण्वानः शृण्वन्नित्यर्थः श्रुतज्ञः श्रुतसारवित् नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः ॥२०॥२१॥२२॥२३॥२४॥ चैद्यममन्यत तस्मा
वरमित्यर्थः ॥२५॥ अवेत्य ज्ञात्वा असितापांगी इंद्रनीलकटाक्षा आप्तमात्मनि विचिंत्य कृष्णाय कृष्णमानेतुं प्रेषयामास ॥२६॥ प्रतीहारैर्द्वा-
रपालैः ॥२७॥ आद्यमात्मानं पुरुषं ॥२८॥ अभिमृशन् शनैः शनैः संमर्दयन् ॥२९॥ राम
२

न्नः ॥ सधर्मः अस्य ब्राह्मणस्याखिलकामदोग्धा ॥ यद्वा स ब्राह्मणो स्य विश्वस्याखिलकामधुगिति ॥ ११ ॥ लोकाननाप्नोति लोकान्लोकांतं
पर्यटंतो नैकत्र निष्ठंतस्तिष्ठतीत्यर्थः ॥ नाप्नोतीति पाठे स्वर्गेश्वरोपि भूत्वा लोकानाप्नोति ॥ उत्तमलोकान्प्राप्नोत्येव प्राप्नुइ वन्निशपतीत्य
र्थः ॥ शेते सुखं समास्ते इत्यर्थः ॥ तदेवाह ॥ सर्वं स्वं गोसुवाक्योपणादिभिर्जितन्वसत्वापरहितः ॥ १२ ॥ स्वलाभः स्वत एव प्राप्तो लाभः आत्म
लाभो वा तेन संतुष्टानुष्टान्साधून्स्वधर्मनिष्ठान् ॥ १३ ॥ यस्याज्ञो विषये देशे ॥ १४ ॥ यतः स्थानात्तेयं दृष्ट्याय स्वाकार्यस्पेच्छया

कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ॥ वर्त्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३ ॥ संतुष्टो यर्हि वर्तेत ब्राह्मणो ये
न केनचित ॥ अहीयमानः स्वाद्धर्मात्स ह्यस्याखिलकामधुक् ॥ ११ ॥ असंतुष्टोसकृल्लोकानाप्नोत्यपि सुरेश्वरः
अकिंचनोपि संतुष्टः शेते सर्वांगविज्वरः ॥ १२ ॥ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः
शांतान्नमस्ये शिरसासकृत् ॥ १३ ॥ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः ॥ सुखं वसंति विषये पाल्यमानाः स
मे प्रियः ॥ १४ ॥ यतस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया ॥ सर्वं नो ब्रूह्यगुह्यं चेत्किं कार्यं करवाम ते ॥ १५ ॥ एवं संपृष्टसं
प्रश्नो ब्राह्मणः परमेष्ठिना ॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ १६ ॥ रुक्मिण्युवाच ॥ श्रुत्वा गुणान्भुवनसुं
दर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतो ऽंगतापं ॥ रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताविशति चित्तमपत्र
पं मे ३७

अर्थः संप्रष्टं ॥ १५ ॥ संपृष्टः संपृष्टः प्रश्नः संदेशार्थो यस्य सः ॥ परमेष्ठिना परमेश्वरेण बंधूनामभिप्रेतं रुक्मिण्या प्रेषितमित्यादि सर्वं ॥ रुक्मिण्या स्व
यमेकांते लिखित्वा दत्तपत्रिकां ॥ मुद्रां मुक्त्वा च स्वहस्तावपेमचिह्नामदर्शयत् ॥ १६ ॥ ब्राह्मणः श्रीकृष्णस्याग्रतस्तां वाचयति ॥ श्रुत्वेति ॥ अयम
र्थः हे अच्युत हे भुवनसुंदरेति ॥ गोत्रवंशं द्योतयति ॥ चेतत्वमहिमानं च्याह रूपशीलगुणादिभिः कापि ॥ तथापि त्रपगता अथच्यमात्मतमेवचि
तत्वाय श्रावियासि आसक्ततो ॥ तत्कुतस्तत्राह शृण्वतां कर्णविवरैः तंतः प्रविश्य ॥ अंगतापं अंगोतिहस्थकं वाधनं वा हरतस्तव गुणाञ्श्रुत्वा
तथा च दृशिमतां चक्षुष्मतां दृशां अखिलार्थलाभात्मकं रूपं श्रुत्वेति ॥ ३७ ॥ राम राम राम राम राम राम राम राम

श्रीभा०
द०३
१०

अहो कुलकन्या नाम सिंहमिति धार्ष्ट्यमिति मा शंकीरित्याह ॥ हे मुकुंद नृसिंह नरश्रेष्ठ का नाम कन्या कुलवती तु धाम महती गुणोदारा तथा
धीमती विज्ञाता त्वां पतिं न वृणीत मध्ये वके यं दोषवांकेति भावः ॥ कथं भूतं कुलशीलादिभिरात्मनस्तुल्यमितरूपमधिकमित्यर्थः ॥ द्रविणं द्र
व्यं संपत्तिः धाम प्रभावः तथा नरलोकस्य मनसोऽभिरामोऽभिरमणाय स्मात् ॥ १७ ॥ किं च काले विवाहावसरे ॥ हे विभो ततस्मात् नोऽस्माकं

कान्तां मुकुन्द महति कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यं ॥ धीरा पतिं कुलवती न वृणीत कन्या
काले नृसिंह नरलोकमनोभिरामं ॥ १७ ॥ तन्मे भवान्खलु वृतः पतिरंग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि
मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ॥ १८ ॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चना
दिभिरलं भगवान्परेशः ॥ आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ॥ १९ ॥ रामाय नमः

भवान्खलु पतिर्वृतः ॥ आत्मा च भवतोऽर्पितः ॥ अतस्त्वमत्रागत्य मां भवतो जायां विधेहि ॥ विपक्षे बाधकं द्योतयन्नाह ॥ मा वीरभागमिति
वीरस्य तव भागं आगर्भकी ग्रमामत्यैवैद्यो माभिमर्शतु मा स्पृशतु ॥ मृगपतेर्बलिं गोमायुः शृगाल इवेति ॥ १८ ॥ अनेकजन्मकृतैः सुकृ
तैरिदमेव मया प्राप्यमिति प्रार्थयते ॥ पूर्तेति ॥ पूर्तं कूपादि इष्टमग्निहोत्रादि दत्तं हिरण्यादि नियमस्तीर्थयात्रादि व्रतं कृच्छ्रादि ॥ १९ ॥ ॥ राम १०

नुवैद्याय अर्पितां यां त्वयि बंधुभिः किमधुना करणीयमित्यपेक्षायामाह ॥ श्वोभाविनीति ॥ हे अजित श्वोभाविनि उद्वहने विवाहे प्रथमं
गुप्तः ॥ अलक्षित एवागत्य पश्चात्स्वसेनापतिभिर्वेष्टितः सन् चैद्यादिबलं प्रमथ्य प्रसह्य हठात् वीर्यप्रभावदर्शनमेव शुल्कं वैवाहिकं दे
यं यस्यास्तां ॥ मामनेन राक्षसेन विधिना उद्वहेत्युपदेशो रहस्यः ॥४१॥ ननु भवद्बंधुशिशुपालादिबलप्रमथने अंतःपुरमध्यगतायास्तव
हरणे त्वद्बंधुवधोऽपि प्रसज्यते इत्यत आह ॥ अंतःपुरेति ॥ पुराद्बहिर्वर्तमानानामपि गिरिजां अंबिकागृहादेव मम हरणं सुकरमिति भावः ॥४२॥
ननु किमनेनानर्थकारिणा निर्बंधेन चैद्योऽपि तावत्त्वाख्यातगुणकर्मा योग्य एव वर इति ॥ तत्राह यस्येति ॥ हे अंबुजाक्ष यस्य भवतः अंघ्रि

श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य पृतनापतिभिः परीतः ॥ निर्मथ्य चैद्यमगधेंद्रबलं प्रसह्य मां
राक्षसेन विधिनोद्वह वीर्यशुल्कां ॥४१॥ अंतःपुरांतरचरीमनिहत्य बंधून् त्वामुद्वहे कथमिति प्रवदाम्युपायं ॥ पूर्वे
द्युरस्ति महती कुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥४२॥ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्यु
मापतिरिवात्मतमोपहत्यै ॥ यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात् ॥४३॥ ब्रा
ह्मण उवाच ॥ इत्येते गुह्यसंदेशा यदुदेव मयाहृताः ॥ विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरं ॥४४॥ इति श्रीभागवते द
शमस्कंधे द्विपंचाशत्तमोऽध्यायः ॥५२॥ श्रीशुक उवाच ॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः ॥ प्रगृह्य पाणिना पाणिं
प्रहसन्निदमब्रवीत् ॥१॥

पंकजरजोभिः स्नपनमात्मनस्तमसोपहत्यै उमापतिरिव महांतो वांछंति तस्य भवतः प्रसादं यद्यहं न लभेयं न प्राप्नुयां तर्हि व्रतैरुपवा
सादिभिः कृशानसून्प्राणान् जह्यां त्यजेयं ॥ ततः किमत आह शतजन्मभिरिति ॥ एवमेव वारंवारं जह्यां यावच्छतजन्मभिर्भवत्प्रसादः
स्यादिति ॥४३॥ अत्र यत्कर्तव्यं करणीयं तद्विमृश्य प्रक्रियतां तच्चानंतरमेव क्रियतामिति ॥४४॥ इति श्रीभागवते दशमस्कंधे टीकायां
द्विपंचाशत्तमोऽध्यायः ॥५२॥ त्रिपंचाशत्तमे गत्वा विदर्भानच्युतो हृतः ॥ रुक्मिणीमहरत्कृष्णो द्विषतामिषतां बलात् ॥१॥ ॥ राम ॥

श्रीभा
८३
११

निद्रायाअलाभेकारणांतरं ॥ वेदाहमिति ॥ तथाहिअकथितमप्यहंजानामीति ॥ २ ॥ आनयिष्येआनेष्यामिराजन्मांपश्चात्तदानूराजन्तुनीचात्
जन्मध्यानयनेदृष्टांतः ॥ प्रथमइति ॥ ३ ॥ अहंहर्षमितिपरश्वोरात्रौविवाहलग्नंतत्रमितिविज्ञायतस्यांरात्रौउपस्थायप्रातर्विदर्भदेशानागमत्
क्षोभाविनित्वमाजितोऽहमेनविदर्भात्तुगृह्णाः समेत्यपितिमंदेशात् ॥ ४ ॥ सैन्यइत्यादीनिचत्वार्यश्वनामानि ॥ ५ ॥ ६ ॥ पुत्रस्यरुक्मिणः स्नेहेनतं
दृष्टमप्युरात्कतीति ॥ तथाअनेनशिशुपालेनाभिमतंचिद्योतयतिकर्माणिउपालंकारपितृदेवार्चनादीनि ॥ ९ ॥ तान्येवाह ॥ ७ ॥ रमित्यादिच

श्रीभगवानुवाच ॥ तथाहमपितच्चित्तोनिद्रांचनलभेनिशि ॥ वेदाहंरुक्मिणाद्वेषान्ममोद्वाहोनिवारितः ॥ २ ॥ तामा
नयिष्यउन्मथ्यराजन्यापसदान्मृधे ॥ मत्परामनवद्यांगीमेधसोग्निशिखामिव ॥ ३ ॥ श्रीशुकउवाच ॥ उद्वाहर्क्षंचविज्ञा
यरुक्मिण्यामधुसूदनः ॥ रथः संयुज्यतामाशुदारुकेत्याहसारथिं ॥ ४ ॥ सचाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः
युक्तंरथमुपानीयतस्थौप्रांजलिरग्रतः ॥ ५ ॥ आरुह्यस्यंदनंशौरिर्द्विजमारोप्यतूर्णगैः ॥ आनर्तादेकरात्रेणविदर्भानगम
द्धयैः ॥ ६ ॥ राजासकुंडिनपतिः पुत्रस्नेहवशानुगः ॥ शिशुपालायस्वांकन्यांदास्यन्कर्माण्यकारयत् ॥ ७ ॥ पुरंसंमृष्ट
संसिक्तमार्गरथ्याचतुष्पथं ॥ चित्रध्वजपताकादितोरणैः समलंकृतं ॥ ८ ॥ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः ॥
जुष्टंस्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः ॥ ९ ॥ पितॄन्देवान्समभ्यर्च्यविप्रांश्चविधिवन्नृप ॥ भोजयित्वायथान्यायकार
यामासमंगलं ॥ १० ॥

त्रिभिः ॥ संमृष्टाः संसिक्तामार्गादयोयस्मिंस्तत् ॥ चित्रध्वजैः पताकाः सताभिः सम्यगलंकृतमकारयत् ॥ ८ ॥ स्रग्गंधमाल्याभरणो
रित्यत्रमत्वर्थीयोद्रष्टव्यः ॥ स्रग्गंधमाल्यादीनिआबिभ्रतीतितथातैः तथाविरजोंबरैर्भूषितैश्चस्त्रीपुरुषैर्जुष्टंतथाश्रीमद्भिर्गृ
हैर्जुष्टं ॥ ९ ॥ यथान्यायंकन्यांप्रतिमंगलंकारयामास ॥ १० ॥ रामायनमः श्रीरामायनमः श्रीरामायनमः रामायनमः

राम
११

कृतकौतुकेनविप्रमहस्तत्रेणामंगलयस्याःस्तां ॥ अहतंनवीनंभूषणोत्तमेभूषितं ॥ २१ ॥ वद्धालसयाःकन्यायाः अथर्ववित् अथर्वमंत्रवित् ॥ २२
२३ ॥ अभ्युदये उचितं ॥ २४ ॥ ततश्चतुरंगसैन्यैः परिवृतः कुंडिनंभीष्मकस्यपुरंययौ ॥ मदंश्चुतंतेमदश्चुतः तैः स्यंदनैःरथैः हेमरचितामालाविद्यतेते

सुस्नातांसुदतींकन्यांकृतकौतुकमंगलां ॥ अहतांशुकयुग्मेनभूषितांभूषणोत्तमैः ॥ २१ ॥ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वा
रक्षांद्विजात्तमाः ॥ पुरोहितोथर्वविद्वैजुहावग्रहशांतये ॥ २२ ॥ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान् ॥ प्रादाद्धेनू
श्चविप्रेभ्योराजाविधिविदांवरः ॥ २३ ॥ एवंचेदिपतीराजादमघोषःसुतायवै ॥ कारयामासमंत्रज्ञैःसर्वमभ्युदयोचितं ॥ २४
मदच्युद्भिर्गजानीकैःस्यंदनैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैःसैन्यैःपरीतःकुंडिनंययौ ॥ २५ ॥ तंवैविदर्भाधिपतिःसमभ्ये
त्याभिपूज्यच ॥ निवेशयामासमुदाकल्पितान्यनिवेशने ॥ २६ ॥ तत्रशाल्वोजरासंधोदंतवक्रोविदूरथः ॥ आजग्मुश्चैद्य
पक्षीयाःपौंड्रकाद्याःसहस्रशः ॥ २७ ॥ कृष्णरामद्विषोयत्ताःकन्यांचैद्यायसाधितुं ॥ २८ ॥ यद्यागत्यहरेत्कृष्णोरामाद्यैर्य
दुभिर्वृतः ॥ योत्स्यामःसंहितास्तेनइतिनिश्चितमानसाः ॥ २९ ॥ आजग्मुर्भूभुजःसर्वेसमग्रबलवाहनाः ॥ श्रुत्वैतद्भ
गवान्रामोविपक्षीयनृपोद्यमं ॥ ३० ॥ कृष्णंचैकंगतंहर्तुंकन्यांकलहशंकितः ॥ बलेनमहतासार्धंभ्रातृस्नेहपरिप्लुतः
३१ ॥ त्वरितःकुंडिनंप्रागाद्गजाश्वरथपत्तिभिः ३२ भीष्मकन्यावरारोहाकांक्षंत्यागमनंहरेः ॥ प्रत्यापत्तिमपश्यंतीद्वि
जस्याचिंतयत्तदा ॥ ३३ ॥ राम राम राम राम राम राम राम राम राम राम राम ॥

येषुतेः ॥ २५ ॥ कल्पितंनिर्मितंयदन्यंनिवेशनंतस्मिन् ॥ २६ ॥ २७ ॥ कन्यांसाधयितुमित्यर्थः ॥ २८ ॥ यदिश्रीकृष्णोहरेदितिशंकिताः ॥ २९ ॥ ३० ॥ ३१
३२ ॥ हर्योरुद्यागत्सर्वमेवोत्सुकयातुरुक्मिण्यचिंतयदित्याह ॥ भीष्मकन्येति ॥ प्रत्यापत्तिंप्रत्यागमनं ॥ ३३ ॥ राम राम राम राम ॥

श्रीभा
२.३
१२

क्रियामाराद्रिः तावन्मात्रेणांतरितः ॥ अल्पराधसः मंदभाग्यायाः ॥२४॥ जुगुप्सितं धार्ष्ट्यादि ॥ अपीति शंकायां नायातीति तिष्ठतो ध्रुवम् इत्यर्थः ॥
आदौ हृष्टतो ध्रुवमत्वा तेन प्रस्थापितवान् ॥ प्रस्थानावसरे च मयि किंचिज्जुगुप्सितं मत्वा प्रत्याचष्टे अतः सोपि द्विजो नूनं नायाति ॥२५॥२६॥
यद्वा तेनापि निर्गतः श्रीकृष्णः मद्दैवे वैगुण्यात् तति बद्धो भवेदित्याह ॥ दुर्भगायाइति ॥२७॥ कालज्ञानाध्वना पि गोविंदागमनकाल इति मन्वा

अहो त्रियामांतरित उद्वाहो मेल्पराधसः ॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणं ॥२४॥ सोपि नावर्तते द्यापि मत्संदेश
हरो द्विजः ॥ अपि मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितं ॥२५॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥२६॥ दुर्भगा
या न मे धाता नानुकूलो महेश्वरः ॥ अपि वा विश्वगौरी गौरी रुद्राणी गिरिजा सती ॥२७॥ एवं चिंतयती बाला गोविंदहृतमा
नसा ॥ न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले ॥२८॥ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप ॥ वाम ऊरुर्भुजो नेत्रमस्फु
रन्प्रियभाषिणः ॥२९॥ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः ॥ अंतःपुरचरीं देवीं राजपुत्रीं ददर्श ह ॥३०॥ सा तं प्रहृष्टव
दनमव्यग्रात्मगतिं सती ॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता ॥३१॥ तस्या आवेदयत्प्राप्तं शशंस यदुनंदनं ॥ उ
क्तं च सत्यवचनमात्मोपनयनं प्रति ॥३२॥ राम राम राम राम राम राम राम राम राम राम

नाकिंचिदाहस्म्यचिंतामतीम्लबेलोचने निमीलितवतीत्यर्थः ॥२८॥ प्रियभाषिणः प्रियस्य चकाः ॥२९॥ भुजोपलक्षणं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्रा
प्तं मा कथयेत्यादिष्टः ॥३०॥ मम आत्मनो देहस्य गतिर्यस्य तं हृतस्य लक्षणानि तत्कार्यमभिज्ञा नातीति तथा ॥३१॥ तस्यै च प्राप्तं यदुनंदनमावे
दितवान् तं च शशंस आत्मोपनयनं प्रति आत्मानं स्वयं श्रीकृष्णस्य पाणिग्रहणं प्रति तेन द्विजेन सत्यं वचनं प्रोक्तमिति आसन्नः प्राप्तः [illegible] रमेति वा
यद्वा आत्मनयनं [illegible] श्रीकृष्णेन यदुक्तं सत्यवचनं तामानाय्य इत्यादि तत् शशंस

श्रीभागवतटीका १२

तं श्रीहंसममस्मिन्कार्ये सर्वस्वार्पणमपि अपर्याप्तमिति तेन उचितं प्रियमपश्यंती तदा केवलं नमनामपश्चात् कृतं ददावित्यर्थः ॥ यद्वा मां श्रियं
येन मतितेन तावत्सर्वसंपदामास्पदं भवति किं तु न मया दिष्ट्या प्राणानां यामिति ततो न्यास्त्रियं न पश्यंतीति तेन नाम ॥ महामतिरित्यनेन सूचितं ॥ इह
श्रीहंसो वा अस्य कन्याम् द्रष्टुमेवागतः स्यादिति वेदोचितेन विधिना समपूजयदिति सूचितं ॥ ३४ ॥ यथा यथावत् ॥ ३६ ॥ समेतानां राज्ञां मध्ये वी

तमागतं समाज्ञाय वैदर्भो हृष्टमानसः ॥ अपश्यंती ब्राह्मणाय प्रियसम्पन्ननामसा ॥ ३५ ॥ प्राप्तो अत्ना अत्र दुहितुर्विवाहप्रेक्ष
णोत्सुको ॥ अभ्ययात्तूर्यघोषेण नामकरणो समर्हणैः ॥ ३७ ॥ मधुपर्कमुपानीय वासांसि विविधानि च ॥ उपायनान्यभीष्ट
निविधिवत्समपूजयत् ॥ ३८ ॥ तयोर्निवेशानश्रीमंडपकल्पसहामतिः ॥ ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३९ ॥
एवं राज्ञां समेतानां यथावीर्यं यथावयः ॥ यथाबलं यथा वित्तं सर्वैः कामैः समर्हयत् ॥ ४० ॥ हंसमागतमाकर्ण्य विदर्भ
स्वामिनः ॥ आगात्यनेत्रांजलिभिः पपुस्तन्मुखपंकजं ॥ ४१ ॥ अस्यैव भार्या भवितुं हि किं मे पहेति नापरा ॥ अस्यावेष्यनवद्या
त्मासेष्या समनुचितः पतिः ॥ ४२ ॥ किंचित्तु चरितं यन्नस्तेन त्वष्टस्त्रिलोकदृष्टात् ॥ अनुरक्ताति रक्ताति वैदर्भ्याः पाणि
मच्युतः ॥ ४४ ॥ एवं प्रेमकलावद्या वदंति स्म पुरौकसः ॥ कन्याचांतःपुरात्स्वागाद्गृहे देवताभिकालयं ॥ ४५ ॥ राम राम ॥
राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम ॥

र्यद्यन्नतिक्रम्यतमर्चितवानित्यर्थः ॥ ३९ ॥ श्रीहंसो भाविकार्यस्य सूचकं जनानुरागं दर्शयति ॥ हंसमागतमिति त्रिभिः ॥ ४१ ॥ अस्यैव हि किं मे पहे
ति ॥ अस्योचभैष्मपाप्यसमुचितइतिषड्वधमणानि ॥ तत्रैकस्मिन्नुव्यतिरेकपदर्शनमुपलक्षणार्थं ॥ नापरेति ॥ न च वाक्यभेददोषः ॥ अस्य द्याविधे
यभेदेन विभिन्नानामेव वाक्यानां महत्प्रयोगात् ॥ ४२ ॥ गृहं संमार्ष्टीत्यादिवदिति ॥ अयमेवानुग्रह इति निर्दिशंति टक्तास्त्विति ॥ ४ ॥ ४२ ॥ ॥ ॥

श्रीभा॰
१० उ॰
१३

नस्यामागमनं विशिनष्टि द्वयेन ॥ पद्भ्यामिति ॥ ४२ ॥ ४३ ॥ अपि च मृदंगेत्यादि जघ्निरे आहता वादिता इत्यर्थः ॥ ४४ ॥ वारमुख्या गणिकोत्तमाः ॥ ४५ ॥ ४६ ॥
उपस्पृश्य आचम्य ॥ ४७ ॥ प्रवयसो वृद्धा भवान्वितामिति भवस्योपसर्जनत्वं स्त्रीकर्मोचितत्वं उक्तं ॥ ४८ ॥ नमस्ये इति कन्यापाते देवहूतेर्मंत्रोयं स्व

पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवं ॥ सा चानुध्यायती सम्यङ्मुकुंदचरणांबुजं ॥ ४२ ॥ यतवाङ्मातृभिः सार्धं सखीभिः
परिवारिता ॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ ४३ ॥ मृदंगशंखपणवास्तूर्यभेर्यश्च जघ्निरे ॥ ४४ ॥ नानोपहारबलिभि
र्वारमुख्याः सहस्रशः ॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ॥ ४५ ॥ गायंत्यश्च स्तुवंतश्च गायका वाद्यवादकाः ॥ परि
वार्य वधूं जग्मुः सूतमागधवंदिनः ॥ ४६ ॥ आसाद्य देवसदनं धौतपादकरांबुजा ॥ उपस्पृश्य शुचिः शांता प्रविवेशांबिकां
तिकं ॥ ४७ ॥ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः ॥ भवानीं वंदयांचक्रुर्भवपत्नीं भवान्वितां ॥ ४८ ॥ नमस्ये त्वांबिकेभीक्ष्णं
स्वसंतानयुतां शिवां ॥ भूयात्पतिर्मे भगवान्कृष्णस्तदनुमोदतां ॥ ४९ ॥ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः ॥ ना
नोपहारबलिभिः प्रदीपावलिभिः पृथक् ॥ ५० ॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् ॥ लवणापूपतांबूलकंठ
सूत्रफलेक्षुभिः ॥ ५१ ॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ॥ ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ॥ ५२ ॥ मुनि
व्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात् ॥ प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ॥ ५३ ॥ राम राम राम राम ॥

संतानयुतां गणेशादिसहितां आत्मारामो मे कथं तत्पतिर्भवेदिति चेत्तत्राह ॥ तदनुमोदतां भवती श्रीरूपा एव वा ॥ ४९ ॥ ५० ॥ अद्भिर्गंधादिभि राम
रंबिकां समपूजयत तथा विप्रस्त्रियोपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति ॥ ५१ ॥ शेषां निर्माल्यं ॥ ५२ ॥ मुनिव्रतं मौनं त्यक्त्वा मांबी ॥ ५३ ॥ राम ॥ १३

तां त्रिलोकवीरा मुमुहुरिति तृतीयश्लोकेनान्वयः॥ श्यामामज्ञातरजस्कां कुंतलेभ्यः शंकिते इव चंचले ईक्षणे यस्यास्तां॥ ५४॥ द्विजा एव कुं
दानां कुड्मलानि मुकुलानि बिंबफलवद्योधरः तस्य द्युतिभिः शोणायमानानि द्विजानि दंतानि। कलां शोभां तत्प्रकाशकं नूपुरं शिंजच्च तत्कला
नूपुरं च तस्य धाम दीप्तिः तेन शोभितं शीलमस्याः इति न पदा चलंतीं॥ ५५॥ न केवलं मुमुहुः॥ ५५= पेतुश्चेत्याह॥ यामिति॥ यात्राभिषेण हरये स्व

तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकि
तेक्षणां॥ ५४॥ शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां॥ पदा चलंतीं कलहंसगामिनीं शिंजत्क
लानूपुरधामशोभिना॥ ५५॥ विलोक्य वीरा मुमुहुः समागता मनस्विनस्तत्कृतहृच्छयार्दिताः॥ ५५=॥ यां वीक्ष्य ते नृपतय
स्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राछलेन हरयेऽर्पयतीं स्वशो
भां॥ ५६॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा॥ उत्सार्य वामकरजैरलकानपांगैः प्राप्ता
न्ह्रियैक्षत नृपान्ददृशेऽच्युतं च॥ ५७॥ तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षतां॥ रथं समारोप्य सुपर्ण
लक्षणं राजन्यचक्रं परिभूय माधवः॥ ५८॥ ततो ययौ रामपुरोगमः शनैः सृगालमध्यादिव भागहृद्धरिः॥ तं मानिनः स्वाभि
भवं यशःक्षयं परे जरासंधवशा न सेहिरे॥ ५९॥ अहो धिगस्मान्यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव॥ ६०॥ इति श्रीभा
गवते दशमस्कंधे त्रिपंचाशत्तमोध्यायः॥ ५३॥ राम राम राम राम राम राम राम राम राम राम॥

शोभां स्वलावण्यं समर्पयंतीं यां वीक्ष्य क्षितौ निपेतुः॥ ५६॥ सा च ताः प्राप्तान्नृपान्ह्रियैक्षत तथैवाच्युतं च ददर्शेति उत्तरेणान्वयः॥ चलत्पद्मकोशतुल्यौ
चरणौ चालयंती॥ ५७॥ सुपर्णलक्षणं गरुडध्वजं॥ ५८॥ हरिः सिंहः॥ ५९॥ असहमानानां तेषामाक्रोशमाह॥ अहो धिगस्मान्यतोस्माकं यशो गोपै
र्हृतमिति॥ ६०॥ इति भागवते महापुराणे दशमस्कंधे टीकायां त्रिपंचाशत्तमोध्यायः॥ ५३॥ राम रामायनमः॥ श्रीकृष्णायनमः श्रीराम॥

श्रीभा
द॰ उ॰
१७

चतुरंगसंचाशतानमेते जित्वा राज्ञो रिपुरागान्॥ रुक्मिणीं च विरूपाथ भेष्मा: पाणिं श्रीग्रहीत॥२॥ इतीति॥ अहो अस्मान्धिगित्येवं वदंत: स्कंभ
जा: क्रोधाविष्टा: दंसिता: कृतसन्नाहा: परिक्रांता: परिवेष्टिता:॥ अन्वीयुरनुधावन्॥१॥ विस्फूर्ज्य टंकारयित्वा॥२॥ पत्युर्बाणानां बाहुल्ये याद

श्रीशुक उवाच॥ ॐ इति सर्वे सुसंरब्धा वाहानारुह्य दंसिता:॥ स्वै: स्वैर्बलै: परिक्रांता अन्वीयुर्धृतकार्मुका:॥१॥ तानापततं
आलोक्य यादवानीकयूथपा:॥ तस्थुस्तत्सम्मुखा राजन्विस्फूर्ज्य स्वधनूंषि ते॥२॥ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोवि
दा:॥ मुमुचु: शरवर्षाणि मेघा अद्रिष्वपो यथा॥३॥ पत्युर्बलं शरासारै: छन्नं वीक्ष्य सुमध्यमा॥ सव्रीडमैक्षत्तद्वक्त्रं भयवि
ह्वललोचना॥४॥ प्रहस्य भगवानाह मा स्म भैर्वामलोचने॥ विनंक्ष्यत्यधुनैवैतत्तावकै: शात्रवं बलं॥५॥ तेषां तद्विक्रमं वीरा
गदसंकर्षणादय:॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्रथान्॥६॥ पेतु: शिरांसि रथिनामश्विनां गजिनां भुवि॥ सकुंडल
किरीटानि सोष्णीषाणि च कोटिश:॥७॥ हस्ता: सासिगदेष्वासा: करभा ऊरवोंघ्रय:॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरां
सि च॥८॥ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभि:॥ राजानो विमुखा जग्मुर्जरासंधपुर:सरा:॥९॥ शिशुपालं सम
भ्येत्य हृतदारमिवातुरं॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन्॥१०॥ नृपा ऊचु:॥ भो भो: पुरुषशार्दूल दौर्मनस्यमिदं
त्यज॥ न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते॥११॥ राम राम राम राम राम राम राम॥

वानामबलत्वे दृष्टांत: मेघा इति॥३॥ पत्युर्बलं वेपत्तत॥४॥ मा स्म भै: भयं मा कुरु हे वामलोचने वामा हिता तावकै: त्वदीयै: कृत्वा॥५॥ सचासोपि वि
क्रमं दृष्ट्वा॥६॥ उष्णीषाणि शिरोवेष्टनवस्त्राणि तत्सहितानि शिरांसि॥७॥ करभा: प्रकोष्ठा ऊरु विशेषाणां वा॥८॥ अत्राह्वदारमेव हृतदारं अत
प्यातुरं निष्ठा स्थैर्यं॥११॥

राम
१७

कुहकोमतेषितात्तस्येकृत्याडुःखेपिईहमानत्वेनपारवश्यंप्रमक्तंदर्शितं ॥ २४ ॥ अत्र स्वअहमेवदृष्टांत इत्याह तथा संघः ॥ शौरेरिति ॥ कुमारात्मका
शादेकं संयुगं परं केवलं मतिमंवाजिरयेजितवानहं ॥ २३ ॥ दैवमदृष्टं तत्फलेन ॥ ७ ॥ फल्गुतंत्रैः स्वल्पसैन्यैः ॥ ९ ॥ प्रदक्षिणः अनुकूलः स्यात्

यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ॥ एवमीश्वरतंत्रोयमीहते सुखदुःखयोः ॥ २४ ॥ शौरेः सप्तदशाहं वै संयु
गानि पराजितः ॥ त्रयोविंशतिभिः सैन्यैर्जिग्ये एकमहं परं ॥ २२ ॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् ॥ का
लेन दैवयुक्तेन जानन्विद्रवितं जगत् ॥ २४ ॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः ॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृ
ष्णपालितैः ॥ २५ ॥ रिपवो जिग्युरधुना काल आत्मानुसारिणि ॥ तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः ॥ २६
एवं प्रबोधितो मित्रैश्चैद्यो गात्सानुगः पुरं ॥ हतशेषाः पुनस्तेपि ययुः स्वं स्वं पुरं नृपाः ॥ २७ ॥ रुक्मी तु राक्षसोद्वाहं कृष्ण
द्विडसहन्स्वसुः ॥ पृष्ठतोन्वगमत्कृष्णमक्षौहिण्या वृतो बली ॥ २८ ॥ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभु
जां ॥ प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥ २९ ॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं ॥ कुंडिनं न प्रवेक्ष्यामि
सत्यमेतद्ब्रवीमि वः ॥ ३० ॥ इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः ॥ चोदयाश्वान्यतः कृष्णः तस्य मे संयुगो भवेत्
३१ ॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः ॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥ ३२ ॥ विकत्थमानः कुम
तिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेन गोविंद तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३३ ॥ रामायनमः ॥ श्रीकृष्णायनमः ॥

२६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ गोपालस्यैवेदपापमस्यतिवायत्ते वार्थः तथास्य दुर्मतेः शोभना अत्र उग्रहदृती दृष्टे अपि मतिर्यस्य तस्येति ॥ ३२ ॥ ३३ ॥

श्रीभा
१०उ
२५

यदूनांकुलपांसनकुलदूषणएवस्त्वतस्त्वंयदूनांकुलस्यपतेस्स्वयंचरितुंहननंचतत्र॥ अप्रसमसामाद्यातइत्यस्माद्धातोःकर्तरिल्युट्प्रत्य
योनंद्यादिविहितः॥२४॥ ध्वांक्षवत्ध्वांक्षःकाकःसयथाहविःस्मातितद्वत्॥ वस्तुतस्तुअध्वांक्षवदितिच्छेदःसहस्रास्त्ववदित्यर्थः

धनुर्विकृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः॥ आहचात्रक्षणंतिष्ठयदूनांकुलपांसन॥२४॥ कुत्रयासिस्वसारंमेमु
षित्वाध्वांक्षवद्धविः॥ हरिष्येद्यमदंमंदमायिनःकूटयोधिनः॥२५॥ यावन्नमेहतोबाणैःशयीथामुंचदारिकां
स्मयन्कृष्णोधनुश्छित्वाषड्भिर्विव्याधरुक्मिणं॥२६॥ अष्टभिश्चतुरोवाहान्द्वाभ्यांसूतंध्वजंत्रिभिः॥ सचान्यद्ध
नुरादायकृष्णंविव्याधपंचभिः॥२७॥ तैस्ताडितःशरौघैस्तुचिच्छेदधनुरच्युतः॥ पुनरन्यदुपादत्ततदप्यछिनदव्य
यः॥२८॥ परिघंपट्टिशंशूलंचर्मासिशक्तितोमरौ॥ यद्यदायुधमादत्ततत्सर्वंसोच्छिनद्धरिः॥२९॥ ततोरथादवप्लु
त्याखड्गपाणिर्जिघांसया॥ कृष्णमभ्यद्रवत्क्रुद्धःपतंगइवपावकं॥३०॥ तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः
छित्वासिमाददेतिग्मंरुक्मिणंहंतुमुद्यतः॥३१॥ दृष्ट्वाभ्रातृवधोद्योगंरुक्मिणीभयविह्वला॥ पतित्वापादयो
र्भर्तुरुवाचकरुणंसती॥३२॥ योगेश्वराप्रमेयात्मन्देवदेवजगत्पते हंतुंनार्हसिकल्याणभ्रातरंमेमहाभुज॥३३
श्रीशुकउवाच॥ तयापरित्रासविकंपितांगयाशुचावशुष्यन्मुखरुद्धकंठया॥ कातर्यविस्रंसितहेममालयागृ
हीतपादःकरुणोन्यवर्तत॥३४॥ राम राम राम राम राम राम राम राम राम राम॥

हेमंदस्थिरेत्यर्थः॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥ परित्रासेनविकंपितान्यंगानियस्याःसातया॥ शुचाशोकेनशुष्यन्मुखंय
स्याः॥ रुद्धःकंठोयस्याःसाचतथाकातर्येणावैक्लव्येनविस्रंसिताःकेशोत्सृष्टिताहेममालायस्याःतयागृहीतोपादोयस्यसः
३४

राम
२५

सश्मश्रुकेशं सशिखानि स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा तेनैवासिना प्रवपन्मुंडयन् व्यरूपयत् विरूपमकरोत् ३५
३६ ॥ तथाभूतं हतप्रायमित्यत्र वाक्ये पूर्णतुषंगः ३७ ॥ ३८ ॥ रुक्मिणं सांत्वयति ॥ मैवास्मानिति ॥ ३९ ॥ पुनः कृष्णमाक्षिपति ॥ बंधुरिति ॥ ४०
पुनर्देवीं प्रत्याह ॥ क्षत्रियाणामिति ॥ येन धर्मेण भ्रातापि भ्रातरं हन्यात् तस्मात् ॥ घोरतमो नितरां कष्टो धर्मः । ज्ञातश्च कोऽस्माकमपराध इ
ति भावः ॥ ४१ ॥ पुनः श्रीकृष्णं प्रत्याह राज्यस्येति ॥ तथाप्यस्माकमित्येतद्दुश्चिंतितमिति भावः ॥ ४२ ॥ पुनर्देवीं प्रत्याह ॥ तवेयमिति ॥ सर्वभूते

चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत् ॥ तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं य
था गजाः ॥ ३५ ॥ कृष्णांतिकमुपव्रज्य ददृशुस्तत्र रुक्मिणं ॥ तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ॥ ३६ ॥ विमुच्य बद्धं
करुणो भगवान्कृष्णमब्रवीत् ॥ ३७ ॥ असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितं ॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो
वधः ॥ ३८ ॥ मैवास्मान्साध्व्यसूयेथा भ्रातुर्वैरूप्यचिंतया ॥ सुखदुःखदो न चान्योस्ति यतः स्वकृतभुक्पुमान् ॥ ३९ ॥ ब
धुर्वधार्हदोषोपि न बंधोर्वधमर्हति ॥ त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ॥ ४० ॥ क्षत्रियाणामयं धर्मः प्रजापति
विनिर्मितः ॥ भ्रातापि भ्रातरं हन्याद्येन घोरतमस्ततः ॥ ४१ ॥ राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः ॥ मानिनो
न्यस्य वा हेतोः श्रीमदांधाः क्षिपंति हि ॥ ४२ ॥ तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदां ॥ यन्मन्यसे सदाभद्रं सुहृदां भद्रम
ज्ञवत् ॥ ४३ ॥ आत्ममोहो नृणामेव कल्पते देवमायया ॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनां ॥ ४४ ॥ राम राम

षु दुर्हृदामप्यहितानामभद्रं सुहृदां भद्रं हितानां भ्रातॄणामज्ञवत् ॥ यन्मन्यसे इदं कस्सिद्धं यत्तव विषमा असमीचीना बुद्धिः अतो यतस्त्वदेव
सुहृदामभद्रमिति ॥ यद्वा सर्वभूतेषु दुर्हृदामपि सुहृदां भद्रमेवेदं उद्रूपं मुंडनमभद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति ॥ अथवा सर्वभूतेषु
मध्ये दुर्हृदां शिशुपालादीनामभद्रं सुहृदां भद्रं च यन्मन्यसे ॥ तवेयं विषमा असमीचीना बुद्धिः कुतः समानं भवति ॥ अज्ञवत् ॥ अज्ञानामिव ॥ ४३
ज्ञानं कुत इत्यत आह ॥ आत्ममोह इति ॥ ४४ ॥ राम राम श्रीरामायनमः श्रीकृष्णायनमः परमहंसायनमः राम राम राम ॥

श्रीभा
द॰ ३
१६

परमार्थमाह ॥ एक एवेति ॥ परः शुद्धोऽप्यात्मा तिर्यङ्मनुष्यादिः ॥ यथोदके कुम्भे नभो यथा घटादिष्विति ॥ ७५ ॥ ननु तर्हि न चन्द्रादिवदात्मानमेकं शुद्धं प्रतीमः तत्राह ॥ देह इति ॥ अध्यात्मधिष्ठितप्राणा इन्द्रियाणि आध्यात्मिकं गुणशब्दे नाधिदैवं तत्तत्रितयात्मकः देहोपाधिना शुद्धो न प्रतीयत इत्यर्थः ॥ ७६ ॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह ॥ नात्मन इति ॥ हे सति अन्येनाधिष्ठिताधिष्ठितात्म नः संयोगाद्वियोगो न स्तः ॥ अतः असतामसत्त्वादन्यस्येत्यर्थः ॥ अत असत्त्वं तत्राह ॥ तद्धेतुत्वादिति ॥ तेषामन्यस्य भूतेन्द्रियादेः प्रसि द्धेः प्रकाशस्य तद्धेतुत्वात् ॥ आत्माहेतुकत्वात् ॥ ननु देवैरधिष्ठितेभ्य इन्द्रियेभ्यो भूतानां प्रतीतिः प्रसिद्धा भूतप्रतीत्या वतत्प्रसि द्धिर्नात्मन इत्यत आह ॥ हग्रूपाभ्यां यथा रवेः यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयो रवेर्रवेः सकाशात्प्रसिद्धिर्हि

एक एव परो ह्यात्मा सर्वेषामपि देहिनां ॥ नानेव गृह्यते मूढैर्यथाऽप्योतिर्यथा नभः ॥ ७५ ॥ देह आद्यंतवानेष द्र व्यप्राणगुणात्मकः ॥ आत्मन्यविद्यया क्लृप्तः संसारयति देहिनं ॥ ७६ ॥ नात्मनोऽन्येन संयोगो वियोगश्चासतः सति ॥ तद्धेतुत्वात्तत्प्रसिद्धेर्हग्रूपाभ्यां यथा रवेः ॥ ७७ ॥ जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ॥ कलाना मिव नैवेंदोर्मृतिर्ह्यस्य कुहूरिव ॥ ७८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

योरपि तेजःसत्त्वात्प्रभेदश्च ॥ तथाभूतेन्द्रियाणां परस्परप्रसिद्धानामपि चैतन्याधीन एव प्रकाशः तत्कार्यत्वाच्च तद्व्यतिरेकेणासत्त्वं चेत्यर्थः ॥ तथा च ब्रह्मादशे वक्ष्यति ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः खानि मात्राश्च स्युरन्यत्वमाहृतात् ॥ इति यद्वा रवेः प्रसिद्धाभ्यामेव हग्रूपाभ्यां परस्परप्रसिद्धिर्यथा तद्वदिति ॥ ७७ ॥ देहसंबंधाभावादेव नात्मनो जन्मादयोऽपि इति वक्तुं जन्मादी नां देहधर्मत्वमाह ॥ जन्मादयस्त्विति ॥ कथं तर्हि जातोऽहं बालोऽहं वृद्धोऽहमिति आत्मनि जन्मादिप्रतीतिः देहजन्मादिनैवेति स दृष्टांतमाह ॥ कलानामिवेति ॥ इंदोः कलानामेव न नैवेंदोः ॥ यथा तद्वत् ॥ तथा च कलानाशादेव कुहूः अमावस्या इंदुक्षय उच्यते तद्वद्व्यस्यात्मनो देहनाशादेव मृतिव्यवहार इत्यर्थः ॥ ७८ ॥ राम राम राम राम राम राम राम राम ॥ राम
१६

ननुआत्मनोदेहसंबंधाभावेकथंभोक्तृभोग्यभोगाप्रतीतीतिरित्याशंक्यस्वप्नदृष्टांतेनसमर्थयति॥यथाशयानइति॥आत्मानंभोक्तारं
विषयांश्चभोग्यान्फलंभोगंचअसत्यप्यर्थेअनुभुंक्तेतथाऽबुधःसंसारंप्राप्नोतीति॥४८॥आत्मानंशोषयतिविमोहयतीतिचतत्त्वज्ञाते
निर्हृत्यापाकृत्य॥४९॥समादधेसमाहितमकरोत॥५०॥हतविक्रमात्त्वेवआत्मवतोनाज्ञानंनिवृत्तमितिदर्शयन्नाह॥प्राणावशेषइति॥५१

यथाशयानमात्मानंविषयान्फलमेवच॥अनुभुंक्तेप्यसत्यर्थेतथाप्नोत्यबुधोभवं॥४८॥तस्मादज्ञानजंशोक
मात्मशोषविमोहनं॥तत्त्वज्ञानेननिर्हृत्यस्वस्थाभवशुचिस्मिते॥४९॥श्रीशुकउवाच॥एवंभगवतातन्वीरामेणप्र
तिबोधिता॥वैमनस्यंपरित्यज्यमनोबुद्ध्यासमादधे॥५०॥प्राणावशेषउत्सृष्टोद्विड्भिर्हतबलप्रभः॥स्मरन्विरूप
करणंवितथात्ममनोरथः॥५१॥चक्रेभोजकटंनामनिवासायमहत्पुरं॥अहत्वादुर्मतिंकृष्णमप्रत्यूह्ययवीयसीं५२
कुंडिनंनप्रवेक्ष्यामीत्युक्त्वातत्रावसद्रुषा॥५२॥भगवान्भीष्मकसुतांयुधिनिर्जित्यभूमिपान्॥पुरमानीयविधिवदुप
येमेकुरूद्वह॥५३॥तदामहोत्सवोनृणांयदुपुर्यांगृहेगृहे॥अभूदनन्यभावेनकृष्णेयदुपतौनृप॥५४॥नरानार्यश्चमुदि
ताःप्रमृष्टमणिकुंडलाः॥पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः॥५५॥सावृष्णिपुर्युत्तंभितेंद्रकेतुभिर्विचित्रमाल्या
बररत्नतोरणैः॥बभौप्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागुरुधूपदीपकैः॥५६॥ श्रीरामायनमः श्रीकृष्णायनमः
राम राम राम राम राम राम राम राम राम राम राम राम राम राम

अहत्वाअज्ञात्वाअदुर्मतिंचवास्तवार्थः॥अप्रत्यूह्यानावर्त्यअप्रतिरुध्येतिसत्यंयवीयसींस्वसारंयत्रविद्विषितःतत्रैवावसत्तत्रभोजकटके
नामपुरमकरोत॥५२॥५३॥५४॥वरयोर्वरवध्वोःस्वमुपस्करं॥५५॥उत्तंभितैरिंद्रकेतुभिर्ध्वजविशेषैःउपक्लृप्तानिमंगलानिलाजांकुरप्रभृतिप्रकारा
दीनितैः॥५६॥

श्रीभा०
द० उ०
१२

आकल्पाः स्वेष्टास्तुजां तेषां गजैः परार्ध्या उल्लिखिता भास्वत्पूगास्तैरुपशोभितः ॥ वृद्धैस्तैरेव गजैः परामृष्टाः संस्पृष्टा रंभा स्वत्पूगास्तैरु
पशोभिताः ॥५८॥ संभ्रमादौत्सुक्यात्परिधावतां बंधूनां मिथः समेत्य दंपत्योः ॥५९॥ ६॥ ३॥ श्रीदशमस्कंधे रुक्मिण्युद्वाहो नाम
चतुःपंचाशत्तमोध्यायः ॥५४॥ पंचपंचाशत्तमे तु प्रद्युम्नो जनिहृत्स्ततः ॥ शंबरेण हृतः सोप्यहत्वा तं कांतया समगमत् ॥ प्रद्युम्नहानिलाभाद्यैः ग

सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजां ॥ गजैर्द्वाःसु परामृष्टरंभापूगोपशोभिताः ॥५८॥ कुरुसृंजयकैकेयविद
र्भयदुकुंतयः ॥ मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां ॥५९॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः ॥ राजानो
राजकन्याश्च बभूवुर्भृशविस्मिताः ॥६०॥ द्वारकायामभूद्राजन्महामोदः पुरौकसां ॥ रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रि
यः पतिं ॥६१॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःपंचाशत्तमोध्यायः ॥५४॥ श्रीशुक उवाच ॥ कामस्तु वासुदे
वांशो दग्धः प्राग्रुद्रमन्युना ॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥१॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ॥ प्रद्यु
म्न इति विख्यातः सर्वतोऽनवमः पितुः ॥२॥ ॥ राम राम राम राम राम राम राम राम राम

शंबराहरणादिना ॥ अंशांशिनामपत्यादिरूपत्वं स्वभावत एव ॥१॥ जांबवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहः ततः शंब
रागारात्प्रद्युम्नप्रत्यागमनं अतः उद्वाहकथनप्रसंगेऽपि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते ॥ प्रत्यागमनं तत्तत्काली
नमपि कथापर्यवसानाय यात्रोक्तमिति वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः स्पष्टे हेतुत्वाच्च देहोपपत्तये देहप्राप्तये ॥२॥ अनवमः

अनूनः २

राम
१२

मत्स्यसिद्धः कामशत्रुः शंबरः तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य पश्चिमगृहमगमदिति ।।३।। निर्जगार गिलितवान् ।।४।। सुधितिना शस्त्रिकया अवद्यन् खंडितवंतः ।।५।।६।। तत्त्वं कामोऽयं तव भर्तेति उत्पत्तिं श्रीकृष्णात् रुक्मिण्यामुत्पन्न इति यशस्विनी पतिव्रता ।। भर्तृदेहप्राप्तिं प्रतीक्ष

तं शंबरः कामरूपी हृत्वा तोकमनिर्दशं ।। सविदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ।।३।। तं निर्जगार बलवान्मीनः सोऽप्य
परैः सह ।। वृतो जालेन महता गृहीतो मत्स्यजीविभिः ।।४।। तं शंबराय कैवर्ता उपाजह्रुरुपायनं ।। सूदा महानसं नीत्वा
ऽवद्यन्सुधितिनाद्भुतं ।।५।। दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ।। नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः ।।६।। बालस्य
तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनं ।। सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ।।७।। पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती
निरूपिता शंबरेण सा सूपौदनसाधने ।।८।। कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदार्भके ।। नातिदीर्घेण कालेन स कार्ष्णी रूढयौव
नः ।। जनयामास नारीणां वीक्षंतीनां च विभ्रमं ।।९।। सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं ।। सव्रीडहासोत्त
भितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंग सौरतैः ।।१०।। तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा ।। मातृभावमतिक्रम्य व
र्तसे कामिनी यथा ।।११।। रतिरुवाच ।। भवान्नारायणसुतः शंबरेण हृतो बलात् ।। अहं तेऽधिकृता पत्नी रतिः कामो भवान्प्रभो
।।१२।। एष त्वानिर्दशं सिंधावक्षिपच्छंबरोऽसुरः ।। मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो ।।१३।। तमिमं जहि दुर्धर्षं दुर्जयं शत्रु
मात्मनः ।। मायाशतविदं त्वं वै मायाभिर्मोहनादिभिः ।।१४।। राम राम राम राम राम राम राम ।।

मात्रा ।। तं शिशुं कामदेवं बुद्ध्वा ।।८।। विभ्रमं संमोहं ।।९।। अंग हे राजन् सौरतैर्भावैः उपतस्थे अभजत ।।१०।।११।। अधिकृता पत्नी तत्र हेतुः रतिरहं भ
वान्काम इति ।।१२।।१३।। दुर्जयत्वे हेतुः मायाशतविदमिति कथं तर्हि हंतव्यः तत्राह मायाभिरिति ।।१४।। राम राम राम राम राम

नचात्रविलंबः कार्य इत्याह ॥ परिशोचति रोदतीत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ वज्रस्य निष्पेषे निर्घाते यथा निष्ठुरतीव्रो नादो भवति तथा भूतं नादं
मनदत् ॥ सामान्यविशेषतया माण्यव्यापकत्वं ॥ ओदनं पाकं पचतीतिवत् ॥ अतिनिष्ठुरं नादमकरोदित्यर्थः ॥ २९ ॥ ३० ॥ वेहायसं आकाशे स्थि

परिशोचति ते माता उवरी वगात पद्मा ॥ पुत्रस्नेहातुलादीनां विवत्सा गोरिवातुरा ॥ २५ ॥ प्रभाषे वं देवी विद्यां प्रकन्नाय महा
त्मने ॥ मायावती महामाया सर्वमायाविनाशिनी ॥ २६ ॥ स च श्रुत्वा समभ्येत्य सत्वरागाय समाह्वयत ॥ अविघ्नैर्वैरलंभाग्नेयैः स्त्रि
यं संजनयन्कालेन ॥ २७ ॥ सोपि स्त्रिमो ऽवेचोभिः परा हत इवोरगः ॥ निश्चक्राम गदापाणिः रोषात्ताम्रलोचनः ॥ २८ ॥ गदामावि
ध्य तरसा प्रक्षन्नाय महात्मने ॥ प्रक्षिप्यमनदन्नादं वज्रनिष्पेषनिष्ठुरं ॥ २९ ॥ तामापतंतीं भगवान्प्रद्युम्नो गदया गदां ॥ अपा
स्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप ॥ ३० ॥ स च मायां समाश्रित्य दैतेयीं मयदर्शितां ॥ मुमुचे शस्त्रवर्षं कार्ष्णौ वेहायसो
ऽसुरः ॥ ३१ ॥ बाध्यमानो ऽस्त्रवर्षेण रौक्मिणेयो महारथः ॥ सत्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीं ॥ ३२ ॥ ततो गौह्यकगां
धर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः ॥ ३३ ॥ निशातमसिमुद्यम्य सकिरीटं सकुंडलं
शंबरस्य शिरः कायात्ताम्रश्मश्र्वोजसाहरत् ॥ ३४ ॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः ॥ भार्यया बरचारिण्या
पुरीं नीतो विहायसा ॥ ३५ ॥ अंतःपुरवरं राजन्ललनाशतसंकुलं ॥ विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ॥ ३६ ॥ तं दृष्ट्वा
जलदश्यामं पीतकौशेयवाससं ॥ प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननं ॥ ३७ ॥ राम राम राम राम राम

तः ॥ ३१ ॥ सत्वात्मिकां गुणमयीं प्रायुंक्तेत्युत्तरस्यान्वयः ॥ ३२ ॥ तामायाव्यधमयत्प्रनाशयत् ॥ ३३ ॥ ताम्राणि श्मश्रूणि यस्य तत् ॥ ओजसा
सावलेन ॥ ३४ ॥ ३५ विद्युता सह बलाहको मेघ इव ॥ ३६ ॥ ३७ ॥ रामायनमः श्रीकृष्णायनमः श्रीरामायनमः राम श्रीरामा ॥

नीलाञ्चितेव वक्राग्रैरलकास्तस्य बालयते व्रीडाल्लज्जिताः ॥१८॥ श्रीकृष्णो न भवतीत्यवधार्य सखी रतं श्रेष्ठा गतिस्तास्तस्मिन्निलिले ॥१९॥ ३।

मुल्लं कृतमुखांभोजं नीलवक्रालकालिभिः ॥ कृष्णं मत्वा स्त्रियो व्रीडान्निलिल्युस्तत्र तत्र हि ॥२०॥ अवधार्य शनैरी
षद्वेलं त्वरणानयोषितः ॥ उपाजग्मुः प्रमुदिताः सखीरतंश्च विस्मिताः ॥२१॥ अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी
अस्मरत्तत्सुतं नष्टं स्नेहात् स्नुतपयोधरा ॥२२॥ कोन्वयं नरवैदूर्यः कस्य वा कमलेक्षणः ॥ धृतः कया वा जठरे केयं लब्धा
त्वनेनया ॥२३॥ मम चाप्यात्मजो नष्टो नीतोयः सूतिकागृहात् ॥ एतत्तुल्यवयोरूपो यदि जीवति क्वचित् ॥२४॥ कथं त्व
नेन संप्राप्तं सौहृदं शार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥२५॥ स एव वा भवेन्नूनं यो मे गर्भधृतो भृशं
अनुप्रीतिरधिका वामः स्फुरति मे भुजः ॥२६॥ एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः ॥ देवक्यानकदुंदुभ्यामाजगा
मञ्चोकआगमत् ॥२७॥ विज्ञातार्थोपि भगवांस्तूष्णीमासीज्जनार्दनः ॥ नारदोकथयत्सर्वं शंबराहरणादिकं ॥२८॥ त
च्छ्रुत्वा महदाश्चर्यं कृष्णांतःपुरयोषितः ॥ अभ्यनंदन्बहून्वर्षान्नष्टं मृतमिवागतं ॥२९॥ देवकी वसुदेवश्च कृष्णरामौ त
थाखिलाः ॥ दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदं ॥३०॥ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ॥ अहो मृत इवा
यातो बालो दिष्ट्येति चाब्रुवन् ॥३१॥ ॥ राम राम राम राम राम राम राम ॥

कृतं स्मरंत्याह ॥ कोन्वयमिति ॥ नरवैदूर्यः पुरुषश्रेष्ठः ॥२३॥ एतेन तुल्यं वयोरूपं च यस्य स समभवदिति ॥२४॥ तस्यैव तत्त्वं संभावयत्याह कथं त्वि
ति ॥२४॥ तदेवाधिकं संभावयति ॥ स एवेति ॥२५॥ देवकयानकदुंदुभ्यां देवक्यानकदुंदुभिभ्यामित्यर्थः ॥२५। २६। २७। २८। २९॥ राम राम ॥

अतिसौंदर्यातापघ्नमनुवर्णयति ॥ यमिति ॥ पिताश्रीकृष्णस्तस्य तत्स्वरूपे प्रधर्षणे निजआत्मा य ईश्वरःमेति ॥ भावोभावनायासांताःतन्मातरः
कृष्णपत्न्योपि रहसि निरूढभावाः सत्योयमभजन्निति यत्तन्नखलु तच्चित्रं कथंसति स्मरेस्मर्यमानत्वेनैवलोभकेकामेअसिविषयेस
ति किंचरमास्पदश्रीकृष्णस्तस्यबिंबश्रीमूर्तिः तस्यबिंबे प्रति बिंबे युक्तेतदा किंनुवक्तव्यं अन्यनार्योभेजुरिति ॥ ४ ॥ इति श्रीदशमस्कंधशे
खरवधोनामपंचपंचाशत्तमोध्यायः ॥ ५५ ॥ षट्पंचाशत्तमेमिथ्याभियोगोमणिमाहरत ॥ कन्यांजांबवतःप्राप्यकृष्णः सत्राजितस्ततः १

यवैशुक्रःपितृस्मरूपनिजेशभावात्तन्मातरोयदभजन्रहरूढभावाः ॥ चित्रंनतत्खलुरमास्पदबिंबबिंबेकामेस्मरेसि
विषयेकिमुतान्यनार्यः ॥ ४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेशंबरवधेपंचपंचाशत्तमोध्यायः ॥ ५५ ॥ श्रीशुकउवाच
सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः ॥ स्यमंतकेनमणिनास्वयमुद्यम्यदत्तवान् ॥ १ ॥ राजोवाच ॥ सत्राजितःकि
मकरोद्ब्रह्मन्कृष्णस्यकिल्बिषं ॥ स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः ॥ २ ॥ श्रीशुकउवाच ॥ आसीत्सत्राजितःसू
र्योभक्तस्यपरमःसखा ॥ प्रीतस्तस्मैमणिंप्रादात्सूर्यस्तुष्टःस्यमंतकं ॥ ३ ॥ सतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः
प्रविष्टोद्वारकांराजंस्तेजसानोपलक्षितः ॥ ४ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः श्रीराम ॥ श्रीभागवतायनमः ॥

पूर्वाद्धकामसौवस्य निष्ठाशुक्लातिचंचला ॥ अथर्थस्यानर्थतामाह स्यमंतहरणादिना ॥ सत्यभामाजांबवत्योर्विवाहप्रस्तावायस्यमं
तकाख्यानमाह सत्राजित इति सत्राजित इत्यकारांतः क्वचिन्नकारांतोपिसंबंधानुसारेण द्रष्टव्यः कृतापराधःस्वयमेवतत्कांतयेउद्यम्यदत्तवान्
त्वामणिनासहस्यादादिति २ भक्तस्यसत्राजितःसूर्यस्तस्यापिभावेनासीदित्यर्थः सचतस्मैतुष्टःस्यमंतकंनाममणिंप्रादात्प्रीतःसन्
यः ३ नोपलक्षितःसत्राजित्त्वेनाविज्ञातः ॥ ४ ॥

दीव्यतेक्रीडतेसूर्योयमितिशंकिताःसंतःकथयामासुरिति ॥५॥ सूर्यंनमस्कारायागतंकल्पयित्वोद्रिक्तभक्तीनांसंबोधनानिनारायणेत्या
दीनि ॥६॥ गभस्तिचक्रेणरश्मिजालेनमुष्णन्तिरस्कुर्वन्तिग्मास्तीक्ष्णागावोरश्मयोयस्यसः ॥७॥ नचेदमघटमानमित्याह ॥ नन्विति ॥ अन्विछंति
मृगयंतेअजःसूर्यः ॥८॥ बालानामज्ञानांवचनंज्वलन्विद्योतमानः ॥९॥ कृतानिकौतुकानिउत्सवेनमंगलानियस्मिंस्तत्विप्रैःकृत्वा १०

तंविलोक्यजनादूरात्तेजसामुष्टदृष्टयः ॥ दीव्यतेक्षैर्भगवतेशशंसुःसूर्यशंकिताः ॥५॥ नारायणनमस्तेस्तुशंखच
क्रगदाधर ॥ दामोदरारविंदाक्षगोविंदयदुनंदन ॥६॥ एषआयातिसविताखांदिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेण
नृणांचक्षूंषितिग्मगुः ॥७॥ नन्वन्विछंतितेमार्गंत्रिलोक्यांविबुधर्षभाः ॥ ज्ञात्वाद्यगूढंयदुषुद्रष्टुंत्वांयात्यजःप्रभो ॥८॥
श्रीशुकउवाच ॥ निशम्यबालवचनंप्रहस्यांबुजलोचनः ॥ प्राहनासौरविर्देवःसत्राजिन्मणिनाज्वलन् ॥९॥ सत्राजित्स्व
गृहंश्रीमत्कृतकौतुकमंगलं ॥ प्रविश्यदेवसदनेविप्रैःकृत्वान्यवेदयत् ॥१०॥ दिनेदिनेस्वर्णभारानष्टौससृजतिप्रभोः
दुर्भिक्षमार्यरिष्टानिसर्पाधिव्याधयोशुभाः ॥ नसंतिमायिनस्तत्रयत्रास्तेभ्यर्चितोमणिः ॥१२॥ सयाचितोमणिंक्वापि
यदुराजायशौरिणा ॥ नैवार्थकामुकःप्रादाद्याच्ञाभंगमतर्कयन् ॥१३॥ तमेकदामणिंकंठेप्रतिमुच्यमहाप्रभं ॥ प्रसेनो
हयमारुह्यमृगयांव्यचरद्वने ॥१४॥

भारप्रमाणं ॥ चतुर्भिर्व्रीहिभिर्गुंजंगुंजान्पंचपणंपणान् ॥ अष्टौधरणमष्टौचकर्षंतांश्चतुरःपलं ॥ तुलांपंचशतंप्राहुर्भारःस्याद्विंश
तिस्तुलाइति ॥११॥ मारीनामअकालमृत्युः अरिष्टमभद्रंअशुभादुःखहेतवः ॥१२॥ क्वापिकदाचिदनेनभावत्यसमर्पस्वयमयतोभोजिना
सर्वारिष्टनिवर्तकमप्यरिष्टहेतुरेवभवतीतिसूचितं ॥१३॥ तदेवदर्शयितुमाह ॥ तमेकदेति ॥ प्रतिमुच्यबद्ध्वाप्रसेनःसत्राजितोभ्राता ॥१४॥ ॥

भा० द०
उ० टी०
२

आक्षिप्य आकृष्य गृहीत्वा १५ ॥ अन्वपद्यत अन्ववोचत ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ क्रव्यार्थे आमिषार्थे २४ ॥ अष्टाविंशति दिनानि यस्मिंस्तत्
अष्टाविंशाह ॥

प्रसेनं सहयं हत्वा मणिमाछिद्य केसरी ॥ गिरिं विशंज्जांबवता निहतो मणिमिछता ॥ १५ ॥ सोपि चक्रे कुमारस्य मणिं
क्रीडनकं बिले ॥ अपश्यन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत ॥ १६ ॥ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ॥ भ्राता
ममेति तच्छ्रुत्वा कर्णे कर्णे जपन्जनाः ॥ १७ ॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ॥ मार्ष्टुं प्रसेनपदवीमन्वपद्यत नाग
रैः ॥ १८ ॥ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने ॥ तं चाद्रिपृष्टे निहतमृक्षेण ददृशुर्जनाः ॥ १९ ॥ ऋक्षराजबिलं भीममंधेन त
मसावृतं ॥ एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ २० ॥ तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतं ॥ हर्तुं कृतमतिस्त
स्मिन्नवतस्थेर्भकांतिके ॥ २१ ॥ तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जांबवान्बलिनां वरः ॥ २२ ॥ स
वै भगवता तेन युयुधे स्वामिनात्मनः ॥ पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २३ ॥ द्वंद्वयुद्धं सुतुमुलमुभयोर्वि
जिगीषतोः ॥ आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २४ ॥ आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेष
परुषैरविश्रममहर्निशं ॥ २५ ॥ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः ॥ क्षीणसत्वः स्विन्नगात्रस्तमाहातीव विस्मि
तः २६

विंशतिशब्दे तिलोपश्चार्षः ॥ वज्रस्य निष्पेषो निर्घातः तद्वत्परुषैर्निष्ठुरैः ॥ २५ ॥ श्रीकृष्णस्य मुष्टीनां विनिपाते घातैः निष्पिष्टानि विश्ल
थानि अंगानां ऊरूणां बंधनानि यस्य सः ॥ २६ ॥ राम श्री राम जय राम राम श्रीरामायनमः श्रीश्रीश्रीश्रीश्री

राम
२

लोके कोवायं मत्तो बली यानिति विस्मितः सन्विष्ट्वाह ॥ ज्ञाने इति ॥ सर्वभूतानां यः प्राणः तत्र च यदोजः सहो बलं चेंद्रियहृदयदेहबला
नि तत्सर्वं त्वमित्यहं जाने ॥ कथं तथा त्वमत आह ॥ विश्वमित्यादि ॥ २४ ॥ पुराणत्वे हेतुः ॥ त्वं हीति ॥ स्रष्टा निमित्तं यच्च सत् उपादानमतः पुरा
णः प्रभविष्णुत्वे हेतुः काल इति ॥ अधीश्वरत्वमप्यत एवेत्याह ॥ ईशः पर इति च ॥ न च तत्रस्थ इत्याह ॥ आत्मनामात्मेति ॥ २५ ॥ यत एवं भू
तो मे स इष्टदेवो रघुनाथ एव त्वमित्याह ॥ यस्येति ॥ ईक्ष उत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा यादांसि तिमिंग

ज्ञाने त्वां सर्वभूतानां प्राण ओज सहो बलं ॥ विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं ॥ २४ ॥ त्वं हि विश्वसृजां स्रष्टा सृष्टा
नामपि यच्च सत् ॥ कालः कलयतामीशः पर आत्मा तथात्मनां ॥ २५ ॥ यस्येक्षणोत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिश
त्क्षुभितनक्रतिमिंगिलोऽब्धिः ॥ सेतुः कृतः स्वयश उज्ज्वलिता च लोका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ २६ ॥ इति
विज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहार महाराज भगवान्देवकीसुतः ॥ २७ ॥ अभिमृश्यारविंदाक्षः पाणिना
शंकरेण तं ॥ कृपया परया भक्तं मेघनादगंभीरया ॥ २८ ॥ मणिहेतोरिह प्राप्ता वयमृक्षपते बिलं ॥ मिथ्याभिशापं प्र
मृजन्नात्मनो मणिनामुना ॥ २९ ॥

ला महामत्स्याश्च यस्मिन् सोऽब्धिः ॥ वर्त्म आदिशत् दत्तवान् ॥ तथापि येन यस्मिन् स्वयश एव सेतुः कृतः ॥ उज्ज्वलिता च दशया इषुभिः क्षतानि
छिन्नानि रक्षसो दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने ॥ २६ ॥ इति विज्ञातं विज्ञानं येन तं विज्ञानशब्दः करणसाधनः कर्मसा
धनो वा ॥ २७ ॥ २८ ॥ स्पष्टार्थौ ऋक्षपते अहं वा वयं त्विह बिलमिदं प्राप्ताः तत्र मिथ्याभिशापममुना मणिना प्रमृजन् अपमार्ष्टुमहं मत बिलं इह प्रा

त्तइत्यर्थः ३२

श्रीभा॰
द॰ उ॰
२१

स्वमणिना समर्पयामास ॥ ३३ ॥ ३४ ॥ ३५ ॥ श्रीकृष्णस्य प्राप्तये चंद्रभागां नाम दुर्गामभजन् ॥ ३६ ॥ स च कृष्णस्तेषां प्रादुर्बभूव अस्मवदितिपा
ठे अस्मवदिंद्रियाणि तेषां प्रेष्ट इत्यर्थः कदा देव्या उपस्थानात् ॥ तया तान्प्रति आदिष्टाया आशीः कृष्णं द्रक्ष्यथेति तया सहैव ॥ ३७ ॥ यदि लो
के जनाः कथंचिद्विस्मृततवंधुं पुनरागतमुपलभंते तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ॥ ३८ ॥ ३९ ॥ पापकेनापराधेनानुतप्यमा

इत्युक्तः स्वां दुहितरं कन्यां जांबवतीं मुदा ॥ अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥ ३२ ॥ अदृष्ट्वा निर्गमं शौरेः
प्रविष्टस्य बिलं जनाः ॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ॥ ३३ ॥ निशम्य देवकी देवी रुक्मिण्यानकदुंदु
भिः ॥ सुहृदो ज्ञातयोऽशोचन्नु बिलात्कृष्णमनिर्गतं ॥ ३४ ॥ सत्राजितं शपंतस्ते दुःखिता द्वारकौकसः ॥ उपतस्थुर्महा
मायां दुर्गां कृष्णोपलब्धये ॥ ३५ ॥ तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषा स वै ॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षय
न्हरिः ॥ ३६ ॥ उपलभ्य हृषीकेशं मृतं पुनरिवागतं ॥ सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ ३७ ॥ सत्राजितं समा
हूय सभायां राजसन्निधौ ॥ प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत् ॥ ३८ ॥ स चातिव्रीडितो रत्नं गृहीत्वावाङ्मु
खस्ततः ॥ अनुतप्यमानो भवनमगमत्स्वेन पाप्मना ॥ ३९ ॥ सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ॥ कथं मृजाम्या
त्मरजः प्रसीदेद्वाच्युतः कथं ॥ ४० ॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा ॥ अदीर्घदर्शिनं क्षुद्रं मूढं द्रविणलो
लुपं ॥ ४१ ॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ॥ उपायोऽयं समीचीनस्तस्य शांतिर्न चान्यथा ॥ ४२ ॥ ॥ राम ॥

मानः ॥ ४० ॥ अघं दोषं आत्मनो रजो दोषं मलमपराधमिति ॥ ४१ ॥ किं कृत्वा कस्मिन्कृते इत्यर्थः ॥ साधु भद्रं मदीर्घदर्शिनमविचारकं मां
क्षुद्रं द्रविणमूढं मंदमतिं ॥ ४२ ॥ एवं व्यायन्नुपायं निश्चिनोति दास्य इति ॥ स्त्रीरत्नं दुहितरं तावद्दास्यामि तद्दत्तं पारिबर्हत्वेन रत्नमपीति

७७ बहुभिः कृतवर्मादिभिर्याचितां ॥ ७५ ॥ मणिं न प्रतीक्षामो न स्वीकुर्मः देव स्वयं तत्र नः स्थितिं करोतु फलभागिन इति तवाऽत्र
त्वात्त्वदीयं धनमस्माकमेवेति गूढोऽभिप्रायः ॥ ७६ ॥ इति श्रीभागवते दशमस्कंधे षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ सप्तपंचाशत्तमे तु पुनः शत
धन्वंधे प्राप्तं स्वर्द्युमशोमार्ष्टि हत्वा तौ क्रूरा हतान्मणेः ॥ अक्रूरस्तु गरीहत्य मणेः पात्रमथाच्युतः ॥ अपामंत्र्यत मे कांते सत्रामोक्षा कृष्णा

एवं व्यवसितो बुध्वा सत्राजित्स्वसुतां शुभां ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥ ७७ ॥ तां सत्यभामां भग
वानुपयेमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥ ७८ ॥ भगवानाह न मणिं प्रतीक्षामो वयं नृप ।
तवास्तां देवभक्तस्य वयं च फलभागिनः ॥ ७९ ॥ इति श्रीभागवते दशमस्कंधे स्यमंतकाहरणं नाम षट्पंचाशत्तमोऽध्या
यः ॥ ५६ ॥ श्रीशुक उवाच ॥ विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे सहरामो ययौ कु
रून् ॥ १ ॥ भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥ २ ॥ लब्ध्वैतदंतरं रा
जन् शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥ ३ ॥ योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य
नः ॥ कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ॥ ४ ॥ रामाय नमः ॥ श्रीकृष्णाय नमः श्रीरामाय नमः ॥

स्वयं ॥ सत्राजितः कृष्णात्राणभंगफलं व्यक्तीकर्तुमाह ॥ विज्ञातार्थोपीति ॥ पांडवान्बिलद्वारेण गतान्गृहान्निर्गतान् इत्येवं विज्ञातार्थो
पि नमः ॥ कुंतीं च दग्धामाकर्ण्य कुल्यकरणे कुलोचितसंव्यवहारार्थं ॥ १ ॥ अन्येषां तद्दुःखं हङ्गस्वभावात् भीष्मादीन्संगम्य ते तु कृष्णः ॥ २ ॥ न
ऊचतुः सत्राजित्कथं मणिं दास्यतीत्यवोचतः ॥ योऽस्मभ्यमिति ॥ भ्रातरं प्रसेनं गतं कस्मान्नान्वियात् म्रियतामित्यर्थः ॥ ३ ॥ राम ॥ ॥

५ जग्मिवान्जगाम ।६।७।८।९।१०।११। हेलनं प्रति कृत्वेह वृजिनमपराधं ।१२। अपीतो हतः सप्तदशसंख्याकान्संयुगात् ।१३। तोय

एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः । शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥५॥ स्त्रीणां विक्रोशमाना-
नां क्रंदंतीनामनाथवत् । हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान् ॥६॥ सत्यभामा च पितरं हतं वीक्ष्य शुचा-
र्दिता । व्यलपत्तात तातेति हा हतास्मीति मुह्यती ॥७॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं । कृष्णाय विदि-
तार्थाय तप्ताचख्यौ पितुर्वधं ॥८॥ तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकतां । अहो नः परमं कष्टमित्यस्राक्षौ वि-
लेपतुः ॥९॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरं । शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः ॥१०॥ सोपि कृतो-
द्यमं ज्ञात्वा भीतः प्राणपरीप्सया । साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ॥११॥ नाहमीश्वरयोः कुर्यां हेल-
नं रामकृष्णयोः । को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥१२॥ कंसः सहानुगोपीतो यद्द्वेषात्याजितः श्रिया ॥
जरासंधः सप्तदशसंयुगाद्विरथो गतः ॥१३॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत । सोप्याह को विरुध्येत
विद्वानीश्वरयोर्बलं ॥१४॥ य इदं लीलया विश्वं सृजत्यवति हंति च । चेष्टां विश्वसृजो यस्य न विदुर्मोहिता जया
॥१५॥ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना । दधार लीलया बाल उच्छिलींध्रमिवार्भकः ॥१६॥ नमस्तस्मै
भगवते कृष्णायाद्भुतकर्मणे । अनंतायादिभूताय कूटस्थायात्मने नमः ॥१७॥ प्रत्याख्यातः स तेनापि शतधन्वा
महामणिं । तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥१८॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ । अन्वयातां महा-
वेगैरश्वै राजन्गुरुद्रुहं ॥१९॥

मत्कः सोपकेमवतात्वमित्यभिप्रेत्याह ॥ यद्दस्मितिश्रुत्या मायया मोहिता अजयेति संधिरार्षः ।१५।१६।१७। अंतर्यामि कूटस्थो नियन्ता तस्मिन्
कृतवर्मणि न्यस्याथोपलायत ।१८। गुरुः श्वशुरः तद्द्रुहं १९

शतयोजनमात्रगामित्वात्ततः परं गंतुमशक्यं तत्र पतितं हयं विसृज्य त्यक्त्वा ॥ २० ॥ पदातेर्भगवांस्तस्य अचिनोत् स्वागमयामास तत्र
वस्त्रे मणिः स्थितीति सर्वं ज्ञात्वा तया विदित्वापि रामवंचनायत थाकृतवानिति भावः ॥ २१ । २२ । अन्वेष अन्विष्य ॥ २३ । सर्वज्ञस्येत चेष्टि

मिथिलायामुपवने विसृज्य पतितं हयं ॥ पद्भ्यामधावत्संत्रस्तः कृष्णोऽप्यन्वद्रवद्रुषा ॥ २० ॥ पदातेर्भगवांस्तस्य
पदातिस्तिग्मनेमिना ॥ चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं ॥ २१ ॥ अलब्धमणिरागत्य कृष्ण आहाग्रजां
तिके ॥ वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥ २२ ॥ तत आह बलो नूनं स मणिः शतधन्वना ॥ कस्मिंश्चित्पुरुषे
न्यस्तस्तमन्वेष पुरं व्रज ॥ २३ ॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेश यदुनंदनः ॥ २४
तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः ॥ अर्हयामास विधिवदर्हणीयं समर्हणैः ॥ २५ ॥ उवास तस्यां कतिचिन्
मिथिलायां समा विभुः ॥ मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ २६ ॥ ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोध
नः २७ ॥ केशवो द्वारकामेत्य निधनं शतधन्वनः ॥ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ २८ ॥ ततः सका
रयामास क्रिया बंधोर्हतस्य वै ॥ साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः ॥ २९ ॥ राम राम राम राम

तं महं कारयेति मात्वा पूर्वमस्तु राह ॥ अहमिति ॥ २४ । २५ ॥ कतिचित्समाः संवत्सरान् ॥ २६ ॥ प्रासंगिकमाह ततइति ॥ २७ ॥ = सत्यभामामप्य
वंचयदिति तत्र च यत्नाह केशव इति ॥ २८ ॥ बंधोः सत्राजितः सांपरायिकाः पारलौकिकाः ॥ २९ ॥ राम राम राम राम राम ॥

व्यूषतुर्द्वारकायाः सकाशात् क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्तकौ ॥ तत्राक्रूरः कृष्णानुमते नैव गतः कृतवर्मा तु
भक्तपक्षपातप्रकाशनाय भयादिवोपेक्षित इति गम्यते ॥ कथमन्यथा सर्वज्ञेश्वरत्वं च नन्तयोः संभवतीति तदेव श्रीवाराणस्यां दानपतिस
मात्व्यया मणिहस्ते अक्रूरे ककुद्मवेदिकैर्महाधैर्ये यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कौरवीकारोऽत्र पतित्वेसत्य

अक्रूरः कृतवर्मा च श्रुत्वा शतधनुर्वधं ॥ व्यूषतुर्भयवित्रस्ता द्वारकायाः प्रयोजकौ ॥२९॥ अक्रूरे प्रोषिते रिष्टान्यास
न्वै द्वारकौकसां ॥ शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥३०॥ ततोऽरिष्टं हृषीकेशो दृष्ट्वा सर्वान्मनीषिणः ॥ क
स्मादिहारिष्टान्यासन्नपृच्छतां मे यथातथं ॥३१॥ इत्यंगोपदिशंत्येके विस्मृत्य प्रागुदाहृतं मुनिवासनिवासे किं घटेता
रिष्टदर्शनं ॥३२॥

भामाभामादीनामपि विश्वासे जनसंग्रहाय अक्रूरस्याह्वयसाक्षेपं श्रीकृष्णः प्राह ॥ इदं च भगवन्मतं तं गोपके वचनं क्व धर्योन्यत्वारण्यम
क्रूराणनयने वर्णयति ॥२९॥ तदेव श्राकृतं हृषयितुमनुवदति ॥ अक्रूरे प्रोषित इति ॥३०॥ दूषयति इतीति ॥ अंग हे राजन् श्रीकृष्णस्य माहा
त्म्यं विस्मृत्येति ॥ तदेवाह मुनिवास इति ॥ मुनीनां वासो यस्मिन् स एव निवासः श्रीकृष्णः तस्य निवासे सति ॥ अक्रूरागमनमात्रेणारि
ष्टदर्शनं किं घटेत तत्र दिक्कां विनानघटेतेत्यर्थः ॥३२॥ श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री राम ॥

पुनस्तान्मतमेवानुवर्णयति ॥ क्वापि देशोऽस्मिन्भगवति वर्षति सति ॥ २३ ॥ २४ ॥ इत्येवंभूतमक्रूरं महिमप्रतिपादनपरं दृष्ट्वा नानावाक्यं श्रु
त्वा सत्यमेव तथाप्येतावदेव कारणं न भवति ॥ किं तु मणेरयमपराध इति मत्वा इत्येतदंतं परमतं ॥ २५ ॥ विज्ञातमपि विलंबेन सत्राजितोऽत्र
तएव चित्तं तस्य ॥ अयं भावः महाभागवतस्यास्य मर्यादत्वेऽपि मणेरपेक्षैव नास्ति यस्मादाहूतो मणिना सहैवागत इति ज्ञात्वेति ॥ २६

देवे वर्षति काशीशः श्वफल्कायागताय वै ॥ स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत्स्म काशिषु ॥ २३ ॥ तत्सुतस्तत्प्रभा
वोऽसावक्रूरो यत्र यत्र हि ॥ देवोऽभिवर्षते तत्र नोपतापो न मारिका ॥ २४ ॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणं ॥ इ
ति मत्वा समानीय प्राहाक्रूरं जनार्दनः ॥ २५ ॥ पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिलचित्तज्ञः
स्मयमान उवाच ह ॥ २६ ॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥ स्यमंतको मणिः श्रीमान्विदितः सर्वमेव नः
२७ ॥ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः ॥ दायं निनीयापः पिंडान्विमुच्यर्णं च शेषितं ॥ २८ ॥ तथापि दुर्धरस्त्व
न्यैस्त्वय्यास्तां सुव्रते मणिः ॥ किं तु मामग्रजः सम्यङ्न प्रत्येति मणिं प्रति ॥ २९ ॥ दर्शयस्व महाभाग बंधूनां शांतिमा
वह ॥ ४० ॥

२७ ॥ ततः किमत आह ॥ सत्राजित ॥ अतः पिंडानुन्नीय दत्त्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सु
ताः गृह्णीयुरिति शास्त्रं तथा च स्मरंति मन्वादयः ॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ तत्सुतो गोत्रजो बंधुः शिष्याः सब्रह्मचारिण इति २८
अग्रजोऽपि न प्रत्येति न विश्वसिति ॥ २९ ॥ नास्तीति वचनं वक्तव्यं ॥ ४० ॥

ततः अक्रूरकृतवर्माणः संतता मायावर्तत इति ॥४०॥ आख्यानं उक्तः हृदि स्मरेत् इति वा ॥४१॥ रजः मिथ्याभिशापं संमृज्य अन्यैः ईर्ष्यमित्यादि
मिषेण प्रीत्या भूयस्तस्मै प्रत्यर्पितवानिति ॥४२॥ दुष्कीर्तिं तन्मूलं दुरितं चेति ॥४३॥ इति दशमस्कंधे सप्तपंचाशत्तमोऽध्यायः ॥५७॥
अष्टपंचाशत्तमे तु कृष्णः पंचकन्या गृहीतवान् ॥ कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणां ॥ कालिंदी निजलाभाय तपः परमुपेयुषी ॥

अक्रूरं किन्नमावात्यवर्तते कुरु वेदयः ॥४०॥ एवं सामभिरालब्धः श्वफल्कतनयो मणिं ॥ आदाय वाससाछन्नं द
दौ सूर्यसमप्रभं ॥४०॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ॥४१॥
यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दु
रितमपोह्य याति शांतिं ॥४२॥ इति श्रीभागवते दशमस्कंधे स्यमंतकोपाख्याने सप्तपंचाशत्तमोऽध्यायः ॥५७॥ श्रीशु
क उवाच ॥ एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः ॥ इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥१॥ दृष्ट्वा त
मागतं पार्था मुकुंदमखिलेश्वरं ॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं ॥२॥ परिष्वज्याच्युतं वीरा अंगसंग
हतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥३॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं ॥ फाल्गुनं प
रिरभ्याथ यमाभ्यामभिवादितः ॥४॥ परमासन आसीनं कृष्णा कृष्णमनिंदिता ॥ नवोढा व्रीडिता किंचिच्छनैरेत्या
भ्यवंदत ॥५॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः ॥ निषसादासनेऽन्ये च पूजिताः पर्युपासत ॥६॥ पृथां ॥

परितोष्य निर्याय वासमिंद्रप्रस्थमध्यागमन् प्रतीतान् प्रत्यागतान् पितुः पदगोहे पुनः सर्वैर्दृष्टान् युयुधानः सात्यकिः ॥१॥ प्राणा इंद्रियाणि मुख्यं
पंचवृत्तिं प्राणमिव ॥२॥ द्वेषस्यैः प्राणमंतरात्मसमेनालिंगितः कनिष्ठाभ्यां समभिवंदितो बभूव ॥४॥ कृष्णा द्रौपदी बहुभार्या सत्यपि अनिं
दितानिंदारहिता पार्थैर्नवमचिरमूढापि प्रतीता ॥५॥६॥

अतिहार्देन स्नेहेन आर्द्रे सजले दृशौ यस्याः तया परिष्वक्तः तथा परिपृष्टा बांधवा यस्य सः ॥७॥ प्रेम्णा वैक्लव्यं तेन रुद्धकंठो यस्याः क्लेशा
पाये आत्मनिदर्शनं यस्य तं भजतां भक्तानां क्लेशापायाद् आत्मानं दर्शयतीति वा ॥८॥ ज्ञातीन् बंधून् नः अस्मान् यदा भ्राता अक्रूरः प्रेषि

पृथां समागत्य कृताभिवादनस्तयातिहार्दार्द्रदृशाभिरंभितः ॥ आपृष्टवांस्तां कुशलं सह स्नुषां पितृष्वसारं परिपृ
ष्टबांधवः ॥७॥ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना ॥ स्मरंती तान् बहून् क्लेशान् क्लेशापायात्मदर्शनं ॥८॥ तदैव
कुशलं नोऽभूत् सनाथास्ते कृता वयं ॥ ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥९॥ न तेऽस्ति स्वपरभ्रांति
र्विश्वस्य सुहृदात्मनः ॥ तथापि स्मरतां शश्वत्क्लेशान् हंसि हृदि स्थितः ॥१०॥ युधिष्ठिर उवाच ॥ किं न आचरितं श्रे
यो न वेदाहमधीश्वर ॥ योगीश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसां ॥११॥ इति वै वार्षिकान्मासान् राज्ञा सोऽभ्यर्थितः सुखं
जनयन्नयनानंदमिंद्रप्रस्थौकसां विभुः ॥१२॥ एकदा रथमारुह्य विजयो वानरध्वजः ॥ गांडीवं धनुरादाय तूणौ चाक्ष
यसायकौ ॥१३॥ साकं कृष्णेन सन्नद्धो विहर्तुं विपिनं महत् ॥ बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥१४॥ तत्राविध्य
च्छरैर्व्याघ्रान् सूकरान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान् हरिणान् शशशल्लकान् ॥१५॥ तान्निन्युः किंकरा राज्ञे मे
ध्यान्पर्वण्युपागते ॥ तृट्परीतः परिश्रांतो बीभत्सुर्यमुनामगात् ॥१६॥ राम राम राम राम राम राम

तः ॥९॥ ज्ञातीनिति वचनात्त्वां भ्रमो मोहं वारयंती स्तौति न तेऽस्तीति अत्र हेतुः विश्वस्येति सुहृच्च आत्मा च तस्य हंसि नाशयसि ॥१०॥ कुमेधसां विष
यासक्तचित्तानां दृष्टोऽसि ॥११॥ सुखमवसदिति शेषः अभ्यर्थित इति वा क्रियासमाप्तिर्वा ॥१२॥ कालिंदीदर्शनप्रसंगमाह एकदेति अक्षय्याः सा
यका ययोस्तौ तूणौ इषुधी ॥१३॥१४॥१५॥ राज्ञे युधिष्ठिराय मेध्यान् कर्माहान् बीभत्सुरर्जुनः

श्रीभा° द° ३°
२५

सख्या श्रीकृष्णेन ॥१७॥१८॥१९॥ अयं मां कामयेदिति शंकयाह ॥ नान्यमिति ॥२१॥२२॥२३॥ आदावेव तद्विद्वानुषंगात्तत्कालीनं चरित्रांतर
माह ॥ यदैवेति ॥ पार्थैर्यदैव संदिष्टो विज्ञापितः श्रीकृष्णस्तदैव तेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास ॥२४॥ किंच भगवानिति

तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ॥ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां ॥१७॥ तामासाद्य वरारोहां सुद्विजां
रुचिराननां ॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां ॥१८॥ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि ॥ मन्ये
त्वां पतिमिच्छंतीं सर्वं कथय शोभने ॥१९॥ कालिंद्युवाच ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं
तपः परममास्थिता ॥२०॥ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं ॥ तुष्यतां मे स भगवान्मुकुंदोऽनाथसंश्रयः ॥२१॥ का
लिंदीति समाख्याता वसामि यमुनाजले ॥ निर्मिते भवने पित्रा यावदच्युतदर्शनं ॥२२॥ तथावदद्गुडाकेशो वासुदे
वाय सोपि तां ॥ रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् ॥२३॥ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतं ॥ कार
यामास नगरं विचित्रं विश्वकर्मणा ॥२४॥ भगवांस्तत्र निवसन्स्वानां प्रियचिकीर्षया ॥ अग्नये खांडवं दातुमर्जुन
स्यास सारथिः ॥२५॥ सोग्निस्तुष्टो धनुरदाद्धयाञ्छ्वेतान्रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥२६॥
मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् ॥ यस्मिन्दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥२७॥ स तेन समनुज्ञा
तः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥२८॥

तिशये ऐश्वर्यगुणवानपि अर्जुनस्य धनुरादिलाभाय सारथिमाप स खांडवं नामेंद्रस्य वनं ॥२५॥ अक्षयौ अक्षयसायकौ ॥२६॥ खांडवदाहे क
वह्नेः सकाशात् अर्जुनाय यस्मिन्निति सामान्यतो निर्देशः यस्यामित्यर्थः ॥ जलस्थलयोर्दृशोर्दृष्ट्योर्भ्रमः यद्वा जले स्थलवद्दृक् दृष्टिर्यस्मिन्
[illegible] स्थलत्वेन भ्रम आसीदिति ॥२७॥

राम
२५

रुत्रुणपः अत्रुर्जुने वयस्मिन् ॥ २९ ॥ पंचमं मित्रविंदाविवाहमाह ॥ विंदाऽनुविंदाविति ॥ आवंत्यो अवंतिराजानौ ॥ ३० ॥ षष्ठमाह नग्नजिदिति ॥ कोस
लः अयोध्याधिपतिः सत्या नाम कन्या अभवत् ॥ देवी कांतिमती नाग्नजितीति पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३२ ॥ वीरस्य गंधमपि न सहंते इ

अथोपयेमे कालिंदीं सुपुण्येऽर्त्वृक्ष ऊर्जिते ॥ वितन्वन्परमानंदं स्वानां परममंगलम् ॥ २९ ॥ विंदानुविंदावावंत्यौ दुर्योध
नवशानुगौ ॥ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ॥ ३० ॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः ॥ प्रसह्य हृतवान्कृ
ष्णो राजन्राज्ञां प्रपश्यतां ॥ ३१ ॥ नग्नजिन्नाम कौसल्य आसीद्राजातिधार्मिकः ॥ तस्य सत्याभवत्कन्या देवी नाग्नजिती नृ
प ॥ ३२ ॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्धर्षान्वीर्यगंधासहान्खलान् ॥ ३३ ॥ तां श्रुत्वा वृष
जिल्लभ्यां भगवान्सात्वतां पतिः ॥ जगाम कौसल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥ तं कौसल्यपतिः प्रीतः प्रत्युत्थानास
नादिभिः ॥ अर्हणेनापि गुरुणा पूजयन्प्रतिनंदितः ॥ ३५ ॥ वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिं ॥ भू
यादयं मे पतिराशिषोऽमलाः ॥ करोतु सत्या यदि मे धृतव्रताः ॥ ३६ ॥ अर्चितं पुनरित्याह नारायण जगत्पते ॥ आत्मानंदे
न पूर्णस्य करवाणि किमल्पकः ॥ ३७ ॥ यत्पादपंकजरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः सह कपालैः ॥ लीलात लो
नूः स्वकृतसेतुपरीप्सया यः काले दधत्स भगवान्मम केन तुष्येत ॥ ३८ ॥ श्रीशुक उवाच ॥ तमाह भगवान्हृष्टः कृतासन
परिग्रहः ॥ मेघगंभीरया वाचा सस्मितं कुरुनंदन ॥ ३९ ॥ राम राम श्री राम श्रीराम श्री श्री ॥

इति तथा तान्खलान् दुर्धर्षान् ॥ ३३ ॥ हृष्यान्जयति यस्तेन लभ्यां ॥ ३४ ॥ प्रतिनंदितः तं प्रतिनंदितवान् श्रीकृष्णेन वा स प्रतिनंदितः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

हे नरेंद्र राजन्यबंधोः क्षत्रियस्य शुल्कदा द्रव्यादिप्रदाः ॥४०॥ गुणानामेकमेव धाम स्थानं यस्यांगे ॥४१॥४२॥ दुर्दांता अशिक्षिता दुरव

श्रीभगवानुवाच ॥ नरेंद्र याच्ञा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्व
दीयां न हि शुल्कदा वयं ॥३९॥ राजोवाच कोन्यस्तेभ्यधिको नाम कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्य
नपायिनी ॥४०॥ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥४१॥ सप्तैते गोवृ
षा वीर दुर्दांता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥४२॥ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन वरो
भवानभिमतो दुहितुर्मे श्रियः पते ॥४३॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लील
यैव तान् ॥४४॥ बद्ध्वा तान् दामभिः शौरिर्भग्नदर्पान् हतौजसः ॥ व्यकर्षल्लीलया बद्धान् बालो दारुमयान् यथा ॥४५॥ त
तः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥४६॥ राजपत्न्यश्च दुहितुः
कृष्णं लब्ध्वा प्रियं पतिं ॥ लेभिरे परमानंदं जातश्च परमोत्सवः ॥४७॥ शंखभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्र
मुदिताः सुवासःस्रगलंकृताः ॥४८॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवास
सां ५०

ग्रहा अप्रग्राह्याः ॥ कुतस्तदाह ॥ एतैरिति भग्ना भंगं प्राप्ताः ॥४२॥ एतान्यो निगृह्णाति तस्य कन्येति समयः कृतः यत यदि इमे गोवृषाः ॥४४॥
सप्तधा कृत्वेति बह्वीनां योषितां मत्प्राणवाहं संभोगयोग्यः स्यामिति प्रत्ययसाधनाय प्रदर्शनार्थमात्मनः सप्तधाकारता ॥४५॥४६॥४७॥४८॥४९॥ नि
[illegible] युवतीनां तद्दासीनां ५०

नागात्मनागेभ्यः शतगुणान्नवलक्षाणि रथात् ॥ रथेभ्यः शतगुणान्नवकोटीः ॥ अश्वात् अश्वेभ्यः शतगुणान्नवपद्मानि ५१॥५२ यदुभि
र्गोवृषैः भग्नवीर्या अपि सुदुर्मर्षा रुरुधुः ॥ ५३ ॥ अस्यतः क्षिपतः ३ युंजनानिति यावत् ॥ ५४ ॥ सप्तमं विवाहमाह ॥ श्रुतकीर्तिरिति ॥ श्रुत

नवनागसहस्राणि नागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ॥ ५१ ॥ दंपती रथमारोप्य मह
त्या सेनया हतौ ॥ स्नेहप्रक्लिन्नहृदयः प्रेषयामास कोसलः ॥ ५२ ॥ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां ॥ भग्नवीर्याः
सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥ ५३ ॥ तानस्यतः शरव्रातान्बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानि
व ॥ ५४ ॥ पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥ ५५ ॥ श्रुतकीर्तेः सुतां भद्रामुप
येमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥ ५६ ॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां ॥ स्वयंवरे
जहारैकः स सुपर्णः सुधामिव ॥ ५७ ॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चा
रुदर्शनाः ॥ ५८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टपंचाशत्तमोध्यायः ॥ ५८ ॥ राम राम राम कृष्ण॥

कीर्तिर्नाम पितृष्वसा तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजां ॥ ५६ ॥ अष्टममाह सुतां चेति ॥ एक एव स श्रीकृष्णो लक्ष्मणां जहार ॥ ५७ ॥ तस्य नि
रोधः अंतःपुरं तस्मात् ॥ ५ ॥ रुक्मिणीजांबवतीभामासत्याभद्राबलक्ष्मणाः ॥ कालिंदी मित्रविंदा चेत्यष्टौ पट्टमहिष्यः ॥ ५८ ॥ इति दशमे अष्टपंचाश
त्तमोध्यायः ॥ ५८ ॥

ऽनघष्ठितमेभौमंहत्वातेनाहृताहरेः ॥ कन्याः सहस्रशः प्राप्य पारिजातं दिवोहरत् ॥ परिणीयततस्ताभिस्तन्मनोरथपूरणैः ॥ आत्मा
रामोऽप्यसौ मे नेतहृहेष्वगृहस्थवत् ॥ येनताः स्त्रियो निरुद्धाः सभौमःचकास्तयेनकारणेनहृतः तदावद्वेति ॥१॥ इंद्रेणभौममविचेष्टितं
ज्ञापितः सन् ॥ प्राग्ज्योतिषपुरंनाम नगरं ययावित्यन्वयः कथंभूतेन इंद्रेण हृतकुंडलं यस्य तेन लोकप्रधानत्वादिंद्रस्य वरुणस्य छत्रहरणेपितस्यैव
मानभंगाइति ततश्चोक्तं ॥ हृते कुंडले यस्याः सा अदितिर्बंधुर्माता यस्य तेन ॥ हृतममराद्रेःस्थानं मणिपर्वतलक्षणं यस्य तेन ॥ सत्यभामाया

राजोवाच ॥ यथाहतो भगवता भौमो येन च ताः स्त्रियः ॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥१॥ श्रीशुक उवाच ॥ इंद्रेण
हृतछत्रेण हृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं ॥२॥ सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ
गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं ॥३॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं ॥ गदया निर्बिभेदाद्रीन् शस्त्रदुर्
गाणि सायकैः ॥४॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ शंखनादेन यंत्राणि हृदयानि मनस्विनां ॥५॥ प्राका
रं गदया गुर्व्या निर्बिभेद गदाधरः ॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं ॥६॥ मुरः शयान उत्तस्थौ दैत्यः पंचशिरा
जलात् ॥७॥

पुष्पेः भगवंतमिंद्र आगत्य विज्ञापितवान् तदा तस्य कौतुकाय तया भार्यया सह ययावित्युक्तं ॥ यद्वा त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति
इति स्त्रियामोक्तं भूम्यै वरं दत्तं सत्यं कर्तुं सत्यभामाया भूम्यंशत्वात्तया सह ययौ ॥ यद्वा नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपि
ता सत्यभामां लययतात्वं पारिजातं दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं तामानीतवानिति ज्ञेयं ॥२॥ गारुडेनया
नेकारणं गिरिदुर्गैरित्यादि तैरुपलक्षितं जलाग्न्यनिलैश्च दुर्गं विमानेर्दुर्गमं ॥३॥४॥५॥ युगांताशनेर्ध्वनिवद्भीषणं परिशयानो जलात्

८ ॥ आविध्य आत्तोद्यमः महान्ननादेत्यन्वयः ॥ ९ ॥ तस्मै श्रीकृष्णाय गदां व्यमुंचत ॥ १० ॥ ११ ॥ इंद्रतेजसा वज्रेण प्रतिक्रियया हेतुभूतया अमर्षजुषः
१२ ॥ पीठं पीठनामानं निरगात्र निरगमन् १३ ॥ १४ ॥ निकृत्तानि शीर्षादीनि येषां तान् १५ ॥ १६ ॥ शतघ्नीं शक्तिविशेषं ॥ १७ ॥ विचित्रा वाजाः पत्राणि येषां

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगांतसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथो
रगः ॥ ८ ॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः ॥ स रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमा
वृणोत् ॥ ९ ॥ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधोजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रु
षा व्यमुंचत ॥ १० ॥ तामापतंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोजितः शिरांसि च
क्रेण जहार लीलया ॥ ११ ॥ व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा ॥ तस्यात्मजाः सप्त पितुर्वधातुराः
प्रतिक्रियामर्षजुषः समुद्यताः ॥ १२ ॥ तेषांतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ पीठं पुरस्कृत्य चमू
पतिं मृधे भौमप्रयुक्ता निरगन्धृतायुधाः ॥ १३ ॥ प्रायुंजतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥
तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥ १४ ॥ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजां
घ्रिवर्मणः ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः ॥ १५ ॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयो
धिप्रभवैर्निराक्रमत् ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा ॥ १६ ॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीं
योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ॥ निकृत्तबाहूरुशि
रोंघ्रिविग्रहं चकार तर्ह्येव हताश्वकुंजरं ॥ १७ ॥

तैर्बाणैर्निकृत्ता बाहवः शिरांसि कंधराः अंघ्रयः विग्रहा देहाश्च यस्य तत्तत्तर्ह्येव तं यदा विव्यधुः तस्मिन्नेव क्षणे ॥ १७ ॥ रामाय श्रीकृष्ण ॥

ताम्रो

श्रीभा॰
१० ३
२८

अन्याश्चर्यं कुरूद्वहेति संबोधनं । तथाहि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तत्प्राप्तेः पूर्वमेव तत्सर्वं सैन्यं हत्वा पश्चात्तानि शस्त्रास्त्राणि चिच्छेद

यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह । हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ १८ ॥ उह्यमानः सुपर्णेन प
क्षाभ्यां निघ्नता गजान् ॥ १९ ॥ गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः । पुरमेवाविशन्नार्ता नरकोऽयुध्यभ्यपत ॥ २० ॥ दृष्ट्वा
विद्रावितं सैन्यं गरुडेनार्दितं स्वकं ॥ तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः ॥ २१ ॥ नाकंपत तया विद्धो मालाहत इव
द्विपः ॥ शूलं भौमोऽच्युतं हन्तुमाददे वितथोद्यमः ॥ २२ ॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः ॥ अपाहरद्गजस्थस्य च
क्रेण क्षुरनेमिना ॥ २३ ॥ सकुण्डलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् ॥ हाहेति साध्वित्यृषयः सु
रेश्वरा माल्यैर्मुकुन्दं विकिरंत ईडिरे ॥ २४ ॥ ततश्च भूः कृष्णमुपेत्य कुण्डले प्रतप्तजांबूनदरत्नभास्वरे ॥ सवैजयंत्या वन
मालयार्पयत्प्राचेतसं छत्रमथो महामणिं ॥ २५ ॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितं ॥ प्रांजलिः प्रणता राजन्भ
क्तिप्रवणया धिया ॥ २६ ॥ राम ॥ ॥ श्री ॥ राम श्री ॥ राम ॥

तत्र प्रत्येकं शस्त्रमस्त्रं च त्रिभिः शरैरित्याश्चर्यं ॥ १८ ॥ किं च गरुत्मतेति ॥ १९ ॥ यतः यया शक्त्या वज्रः प्रतिहतः ॥ २० ॥ अस्पौ गरुडस्तु नाकं
पत गरुडे वितथोद्यमः स्वयं ॥ २१ । २२ । २३ । प्रतप्तं जांबूनदं येषु निरत्नानि तैर्भास्वरे सर्वशक्तं छत्रं वरुणस्य शिवरं महामणिं चार्पयदिति ॥ २४ । २५ । राम

२६ २८

ऐश्वर्यं ज्ञात्वा भूमिः स्तौति ॥ नमस्त इति ॥ परमात्मन् देवाद्यंतर्यामिन् ॥२६॥ येन मंत्रेण तुष्टात्मा प्रसन्नः सर्वसाक्षी तेन मंत्रेण नमस्यति ॥ पंक
जं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः ॥ अत एव सत्कीर्तिमयी पंकजमाला विद्यते यस्य तस्मै ॥ एवंभूतं ध्यायतां पंकजवत् सुप्रसन्ने तापो
पशमने नेत्रे यस्य तस्मै पंकजवत् सुमेव्यौ पंकजांकितौ वा अंघ्री यस्य तस्मै नमः इति ॥२७॥ किंच भगवते निरतिशयैश्वर्याय वासुदेवाय सर्व
भूताश्रयाय अत एव विष्णवे व्यापिने न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवतीति पुनः सर्वभूताश्रयत्वे पुरुषाय सर्वस्मात् कार्यात् पूर्व

भूमिरुवाच ॥ नमस्ते देवदेवेश शंखचक्रगदाधर ॥ भक्तेच्छोपात्तरूपाय परमात्मन्नमोस्तु ते ॥२६॥ नमः पंकजनाभा
य नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२७॥ नमो भगवते तुभ्यं वासुदेवाय विष्णवे ॥ पुरुषाया
दिबीजाय पूर्णबोधाय ते नमः ॥२८॥ अजाय जनयित्रेस्य ब्रह्मणोनंतशक्तये ॥ परावरात्मन् भूतात्मन् परमात्मन् नमो
स्तु ते ॥२९॥

मेव सते ॥ पूर्वमेवाहमिहासमिति तत्पुरुषत्वमिति श्रुतेः ॥ एतदपि कुतः ॥ आदिबीजाय ॥ आदेर्जगत्कारणस्यापि कारणाय ॥ एवमपि
नष्टदादिवज्जाड्यमित्याह ॥ पूर्णबोधायेति ॥२८॥ नन्वेवमपि स्वकारणात् सर्वसत्त्वं न स्यादत आह ॥ अजायेति स्वयमजायास्य जगतो
जनयित्रे उभयत्रापि क्रमेण हेतुद्वयं ब्रह्मणो ऽनंतशक्तये इति च दृष्टवत्त्वादजत्वमनंतशक्तित्वाज्जनयितृत्वमित्यर्थः ॥ नन्वपि त्रा
दयः पुत्रादीनां जनकाः तेषां च तत्सर्वे तेषां च भूतानि तेषां च स्वकर्मद्वारेण जीवः किमत्राह ॥ तत्राह परमात्मन्नित्यादि ॥ पित्राद्यात्मत्वात्त्व
मेव जनक इत्यर्थः ॥२९॥ ॥ श्री रामाय नमः श्रीकृष्णाय नमः राम श्री श्री श्री श्री राम

श्रीभा
१०उ
२९

नत्रगुणाः विक्षोभ्य त्वत्त्यादि हेतवः तेव प्रधानस्यैव तस्य च पुरुषः क्षोभकः ॥ तत्र च कालो निमित्तमिति प्रसिद्धं किमत्राहं ॥ तत्राह ॥ त्वं वा इति ॥ तमसो
धारणेऽप्यसंहृत एव स्थानाय पालनाय जगतः स्थित्याद्यर्थं गुणत्रयम् आदित्वमेव बिभर्षि हे अज असीत्यर्थः ॥ कालप्रधानपुरुषाश्च त्वदव्यतिरि
क्तान सन्तीति त्वं तु परः सर्वव्यतिरिक्तः अतस्त्वमेव जगन्नयतेत्यर्थः ॥२८॥ कार्यकारणप्रपंचस्य तदव्यतिरेकं उपपादयति ॥ अहमिति ॥ अहं भूमिर्मा
त्राणीति देवा मन इंद्रियाणीति च त्रिविधाहंकारकार्याणि कर्ता अहंकारः ॥ एवं स्तुत्वा प्रार्थयते तस्येति ॥ हे प्रपन्नार्तिहर तस्य नरकस्यायं

त्वं वै सिसृक्षुस्त्रय उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः ॥ स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो
भवान्परः ॥२८॥ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि ॥ कर्ता महानित्यखिलं चराचरं त्वय्य
द्वितीये भगवन्नयं भ्रमः ॥२९॥ तस्यात्मजोयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः ॥ तत्पालयैनं कुरु हस्तपंक
जं शिरस्यमुष्याखिलकल्मषापहं ॥३०॥ श्रीशुक उवाच ॥ इति भूम्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया ॥ दत्त्वाभयं
भौमगृहं प्राविशत्सकलर्द्धिमत् ॥३१॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं ॥ भौमाहृतानां विक्रम्य राजभ्यो
ददृशे हरिः ॥३२॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः ॥ मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितं ॥३३॥ भूयात्प
तिरयं मह्यं धाता तदनुमोदतां ॥ इति सर्वाः पृथक्कृष्णे भावेन हृदयं दधुः ॥३४॥ राम राम राम राम

भयदत्तो नाम भीतः ॥ अत एव मया तव पादपंकजमुपसादितः ॥३०॥ अभयं दत्त्वा ॥ शताधिकमित्यपि ज्ञातव्यं ॥ यथाह पराशरः ॥ कन्या
पुरे स कन्यानां षोडशातुलविक्रमः ॥ शताधिकानि ददृशे सहस्राणि महामना इति ॥ राज इत्युपलक्षणं सिद्धादिभ्यश्चेति ॥ तथा ते
नैवोक्तं ॥ देवसिद्धासुरादीनां नृपाणां च जनार्दन ॥ हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे इति ॥३१।३२।३३॥ श्रीरामाय नमः

राम
२९

प्राहिणोत्स स्थापयामास तत्र दृष्टाः कमनीयाङ्गता विरजोंबराः ताः शिविकाभिः ॥ अपि च महाकोशानिति २७। २८ स प्रियः सत्यभामायास
हितः २९। ४ ॥ गृहोद्यानं निष्कुटं उपशोभयति यः सेंद्रान्विबुधान्निर्जित्येति इंद्रकृष्णयोः संग्राम उक्तः ४ ॥ ननु कथं प्रसादितः स्वमनोरथे
न ॥ श्रीकृष्णेन सहेंद्रस्य संग्राम इत्याशंक्याह ॥ यया चेति ॥ अच्युतमर्थसाधनं चेति कर्मद्वयं याचतेर्धातोर्विगृह्यते विग्रहं करोति स्म

ताः प्राहिणोद्द्वारवतीं तत्र दृष्टविरजोंबराः ॥ नरयानैर्महाकोशान्रथाश्वान्नृद्रविणं महत् ॥ २७ ॥ ऐरावतकुलेभांश्च
तुर्दंतांस्तरस्विनः ॥ पांडुरांश्चतुरः षष्टिं प्रेषयामास केशवः ॥ २८ ॥ गत्वा हर्म्यं भवनं दत्त्वादित्यैव कुंडले ॥ पूजित
स्त्रिदशेंद्रेण सहेंद्राण्या पाच सप्रियः ॥ २९ ॥ नोदितो भार्ययोत्पाट्य पारिजातं गृहं गमत् ॥ आरोप्य सेंद्रान्विबुधान्निर्जि
त्योपानयत्तु तं ॥ ४० ॥ स्थापितः सत्यभामाया गृहोद्यानोपशोभनः ॥ अन्वगुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ४१
यया च आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनं ॥ सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो
धिराज्यतां ॥ ४२ ॥ अथो मुहूर्त एकस्मिन्नानागारेषु ताः स्त्रियः ॥ यथोपयेमे भगवांस्तावद्रूपधरोऽव्ययः ॥ ४४ ॥ गृहे
ष्वथासामनपायतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः ॥ रेमे रमाभिर्निजकामसंप्लुतो यथेतरो गार्हस्थ्यकर्मे
धिकांश्चरन् ॥ ४४ ॥

हानपितरामनपतां धर्मिकतां धिक ॥ ४२ ॥ यथा यथावत् ॥ अनेन देवक्यादिबंधुजनसमागमोऽपि सूचितः इहं यौगपद्येन सूचितः ॥ अव्य
यः सर्वत्रापि संपूर्णो वै ॥ ४३ ॥ अहो भाग्यं नारीणामित्याह ॥ ४४ ॥ गृहे स्थिति ॥ अतर्क्याणि कर्माणि करोतीति तथा सः निरस्तसाम्यमति
शयश्च येषु ॥ अन्येषां तेषु गृहेष्वनपायी अवस्थितः ॥ रमाभिर्लक्ष्म्या अंशभूताभिर्निजकामसंप्लुतः स्वानंदपरिपूर्णः गार्हस्थ्यकर्माधिकान्गृ
हस्थधर्मान् ४४

श्रीभा०
द० ३
२

अनुरागहाससहितमवलोकं चतत्स्वर्वकं नवसंगमं चतन्नर्मजल्पं चतस्मिन्नुल्लज्जां च भेजुः ॥ ५५ ॥ विश्रमणं संवाहनं केशप्रसाधः केशप्र
साधनं दासीनां शतानि विद्यंते यासां तथाभूता अपि स्वयमेव विभोर्दास्यं विदधुरिति ॥ ५६ ॥ इति श्रीदशमस्कंधे एकोनषष्टितमोऽध्यायः
॥ ५९ ॥ अथ षष्टितमे कृष्णः परिहासेन रुक्मिणीं ॥ कोपयित्वा ततः प्रेमकलहे तामसांत्वयत ॥ १ ॥ रामरामजनानंदमहोदयविडंबनैः ॥ ह
रुक्मिण्याः प्रेमकलहकृत्यनैश्वर्यमीर्यते ॥ स्वतल्पस्थं स्वपर्यंकस्थं ॥ २ ॥ वक्ष्यमाणं तत्किमपपाः श्रियः श्रीकृष्णे परमप्रेमसंभावयितुं

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमेधितयानुरागहासावलो
कनवसंगमजल्पलज्जाः ॥ ५५ ॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसा
धशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥ ५६ ॥ इति श्रीभागवते दशमस्कंधे एकोनषष्टितमो
ऽध्यायः ॥ ५९ ॥ बादरायणिरुवाच ॥ कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखी
जनैः ॥ १ ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः ॥ स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥ तस्मिन्नंतर्गृहे
भ्राजन्मुक्तादामविलंबिना ॥ विराजिते वितानेन दीपैर्मणिमयैरपि ॥ ३ ॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादि
तैः ॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ॥ ४ ॥ पारिजातवनामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजै राजञ्जाल

तस्योक्तमेव तत्र मनः स्मारयति ॥ यस्त्विति ॥ २ ॥ आदौ तावत्त्रिभिः श्लोकैर्मंदिरमनुवर्णयति ॥ तस्मिन्निति ॥ तत्र हेतुः मुक्तादामाह
भ्राजंति यानि मुक्तादामानि तेषां विलंबाः संति यस्मिन् तेन वितानेन विराजिते तल्पतीयं तातां विराजितपदेनान्वयः ॥ ३ ॥ सुगंधतया द्विरे
फकुलैर्नादितैः प्रविशद्भिश्चंद्ररश्मिभिः ॥ ४ ॥ निर्गच्छद्भिरगुरुसंभवैर्धूपैश्च इति अतिमनोहरत्वं दर्शितं ॥ ५ ॥ ॥ राम श्रीरामायनमः

राम
२

पयसः क्षीरस्य फेन इव मृडुनि पर्यंकस्थे कशिपूत्तमे हंसतूलिकायां उपतस्थे असेवत ॥ ४ ॥ तदेवाभिनयति वालव्यजनमिति ॥ ५ ॥ उपाच्युतम
च्युतसमीपे सा मणिनूपुराभ्यां रेजे क्वणयंती मणिमयो नूपुरौ कूजयंती तथांगुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा वस्त्रांतेन गूढौ
स्थगितौ कुचौ तयोः कुंकुमं तेन शोणो हारः तस्या भासा तथा नितंबधृतया परार्ध्या अमूल्या कांच्या कांचीतया च रेजे ॥ ६ ॥ तां निरीक्ष्य प्रीतः सन् स्म
यमानो हरिः ॥ आबभाषे कथंभूतां यालीलया धृततनोरतनोः तस्य अनुरूपं रूपं यस्याः तां ॥ यथोक्तं श्रीपराशरेण ॥ देवत्वे देवदेहेयं मानुषत्वे च मा

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे ॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिं ॥ ४ ॥ बालव्यजनमादाय रत्नदंडं सखी
करात् ॥ तेन वीजयती देवी उपासां चक्र ईश्वरं ॥ ५ ॥ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रह
स्ता ॥ वस्त्रांतगूढकुचकुंकुमशोणहारभासा नितंबधृतया च परार्ध्यकांच्या ॥ ६ ॥ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य
यालीलया धृततनोरनुरूपरूपा ॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥ ७ ॥ श्री
भगवानुवाच ॥ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः ॥ महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः ॥ ८ ॥ तान्प्रा
प्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् ॥ दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषे समान् ॥ ९ ॥ रामाय श्रीरामाय

नुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमिति ॥ किंच अलकैः कुंडलाभ्यां निष्केन पदकेनालंकृतेन कंठेन च चतुर्दिक्षु शोभिते वक्त्रे
उल्लसंती स्मितसुधा यस्यास्तां ॥ ७ ॥ सर्वगुणोत्कर्षज्ञापितवक्तुमिदंदेत्यादिमध्यायेनाहेकादशभिः ॥ श्रीभगवानुवाच ॥ राजपुत्रीति ॥ हे राजपुत्रि लोक
पालानामिव भूतिरैश्वर्यं येषां तैः ॥ तथा महानुभावैर्दानैरूपादिभिरूर्जितैश्च सर्वैमींप्सितासि ॥ ८ ॥ तान्हित्वा नोस्मान् असमान्कस्माद्ववृषे वृत

वतीत्वं ॥

किंच प्रायशः राजभ्यो जरासंधादिभ्यो बिभ्यतो भयं प्राप्नुवंतः ॥ १२ ॥ अस्पष्टवर्त्मनामविज्ञाताचाराणां ॥ अलोकपथमद्वीपारतं प्रपदवीं मार्ग-
मास्थिता अनुसृता ॥ १३ ॥ किंच निष्किंचनाः ॥ १४ ॥ आत्मसमं परस्परमनुरूपं जन्मैश्वर्याभ्यां सहिता आकृतिः रूपं जातिर्वा सम्भवाय आकृतिः ॥ १५
नदीर्घा समीक्षा विचारो यस्याः तया ॥ १६ ॥ अथ इदानीमपि न हि किमित्यानीतासि इति चेदित्याशंक्याह ॥ चैद्येति मम मां द्विषंति ॥ १८ ॥ स्मयनु

राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् ॥ १२ ॥ अस्पष्टवर्त्मनां पुंसा-
मलोकपथमीयुषां ॥ आस्थिताः पदवीं सुभ्रु प्रायः सीदंति योषितः ॥ १३ ॥ निष्किंचना वयं शश्वन्निष्किंचनजनप्रि-
याः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजंति सुमध्यमे ॥ १४ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री
च नोत्तमाधमयोः क्वचित् ॥ १५ ॥ वैदर्भि एतदविज्ञाय त्वयादीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥
१६ ॥ अथात्मनोनुरूपं वै भजस्व क्षत्रियर्षभं ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥ १७ ॥ चैद्यशाल्वजरासंधदंत-
वक्रादयो नृपाः ॥ मम द्विषंति वामोरु रुक्मी चापि तवाग्रजः ॥ १८ ॥ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये ॥ आनीता- १०
सि मया भद्रे तेजोपहरतासतां ॥ १९ ॥ उदासीना वयं नित्यं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योति-
रक्रियाः ॥ २० ॥ बादरायणिरुवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् ॥ २१ ॥
इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं ॥ आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ॥

त्तये गर्वापनयनाय स्त्रीणां मतिङः सहमोरासीनं अकामत्वं वाह ॥ उदासीना इति ॥ देहयोः देहगेहयोः ॥ उदासीनाः ॥ अत एव ज्योतिरक्रियाः
ज्योतिः प्रदीपादिवत्साक्षिमात्रतया क्रियारहिता आस्महे इति ॥ २० ॥ अविश्लेषाद्धेतोः आत्मानं प्रियेवेत्यर्थः इव शब्दः ॥ २१ ॥ २२ ॥ ॥ ६ ॥

चिंताल्लक्षणमाह ॥ पदेति ॥ नखैररुणा श्रीः कांतिर्यस्य तेन सुजातेन सुकुमारेण पदा ॥ २३ ॥ सुदुःखमप्रियश्रवणं तद्भयं त्यागाशंका याशो
कः अनुतापः तैर्विनष्टा बुद्धिर्यस्याः ॥ श्लथंति पतंति वलयानि यस्मात् तस्माद्धस्तात् देहश्च पपात विक्लवा अवशा धीर्यस्याः तस्याः ॥ २४ ॥
हास्यस्य प्रौढिं गांभीर्यं चतुर्भुज इति ॥ उत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतचतुर्भुज इत्यर्थः ॥ सम्मृज्याविर्बभ्र अश्रुकले अश्रु

पदा सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः ॥ आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुः
खरुद्धवाक् ॥ २३ ॥ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्तात् श्लथद्वलयतो व्यजनं पपात ॥ देहश्च विक्लवधिया सहसै
व मुह्यन् रंभेव वातविहता प्रविकीर्य केशान् ॥ २४ ॥ तद्दृष्ट्वा भगवान् कृष्णः प्रियायाः प्रेमबंधनं ॥ हास्यप्रौढिमजानंत्याः क
रुणः सोन्वकंपत ॥ २५ ॥ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥ केशान् समुह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ॥ २६ ॥ प्रमृ
ज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आश्लिष्य बाहुना राजन्ननन्यविषयां सतीं ॥ २७ ॥ सांत्वयामास सांत्वज्ञः कृपया कृ
पणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥ २८ ॥ श्रीभगवानुवाच ॥ मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां ॥
त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने ॥ २९ ॥ मुखं च प्रेमसंरंभस्फुरिताधरमीक्षितुं ॥ कटाक्षेपारुणापांगं सुंदरभ्रुकुटी
कट ३

त

भिः ॥ २७ ॥ सांत्वयामास अनुनीतवान् ॥ २८ ॥ मा मां त्वद्वचः किं वदिष्यसीति श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं व
तत्यतः ॥ हे अंगने सुंदरि ॥ २९ ॥ प्रेमसंरंभेण प्रणयकोपेन स्फुरितः कंपितोऽधरो यस्मिन् तत् कटाक्षेन कटाक्षाः तैः आक्षेपेणारुणौ अपांगौ
यस्मिंस्तत् भ्रुवौ सुंदरे कुटिले भ्रुकुटीतटं यस्मिंस्तत् ॥ ३० ॥ ॥ राम राम श्री श्री श्री श्रीकृष्णायनमः परमाय ॥
ते

श्रीभा
९५
२२

ननु कल्ह हे किं कौतुकं कर्तुं वा अत आह ॥ अयं हीति ॥ नर्मैर्नर्मभिर्यामः कालः ॥ ३१ ॥ ३२ भगवतस्तस्यै स्वर्यमुक्तं सुखं स व्रीडहासेन रुचिरेण
स्निग्धेनापांगेन वीक्षमाणा ॥ ३३ ॥ असमत्वभयं ड्गाश्रयणे प्रबलैः कलिः ॥ अराज्ञत्वमविज्ञाता लौकिके हावसादनं ॥ निष्किंचनत्वं तस्त्री
तिरायानां दुर्गणीयता ॥ अनौचित्यं निर्गुणत्वं हृद्याज्ञाया चभिस्त्रिभिः ॥ औदासीन्यमकामत्वं स्वदोषाः षोडशा सतः ॥ अज्ञत्वाद्धीवं दर्शितं वै भै
ष्म्याः राज्ञां बहूनां गुणानां ॥ हे अर्हन्मर्मोदितान् भैष्मीन्यषेधन्नेतु तान्स्तवैः ॥ श्रीभगवतः स्वनिंदापराणि यानि वचनानि तानि सर्वोत्कर्षपरत

अयं हि परमो लाभो गृहेषु गृहमेधिनां ॥ यन्नर्मैरीयते यामः प्रियया भीरु भामिनि ॥ ३१ ॥ श्रीशुक उवाच ॥ सैवं भगवता
राजन्वैदर्भी परिसांत्विता ॥ ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥ बभाष ऋषभं पुंसां वीक्षंती भगवन्मुखं ॥ स
व्रीडहासरुचिरस्निग्धापांगेन भारत ॥ ३३ ॥ रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाह यद्वै भवान्भगवतोऽसदृशी वि
भूम्नः ॥ क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ ३४ ॥ ॥ राम राम ॥

याव्याख्यानाणा प्रतिभाषते ॥ तत्र षड्भक्तं कस्मान्नो वहृषे समानिति तत्रासाम्यं सत्यमेवेत्याह ॥ नन्विति हे अरविंदवि लोचन त्रयाणां ब्रह्मा
दीनामप्यधीशो नियंता त्वं क्व ॥ क्व चाहं गुणप्रकृतिः त्रिगुणस्वभावा प्राकृता गुणमयी प्रकृतिर्वा ॥ नन्वहमेवाधीश्वरी श्रीः सर्वैरुपास्य
त्वादित्यत आह ॥ अज्ञैः सकामैर्गृहीतौ पादौ यस्याः सा ॥ ३४ ॥ राम राम श्री श्री श्री श्री श्री श्री राम राम ॥

राम
२२

यदुक्तं राजभ्यो बिभ्यतः समुद्रं शरणं गतानिति तत्राह सत्यमिति ॥ हे उरुक्रमेति भयाभावं दर्शयति ॥ गुणाः शब्दादयस्त एव राजानस्तेभ्य इति रा
जानस्तेभ्यो भयादिवेति ॥ अंतः हृदये समुद्रे तद्वदगाधे विषयाकारैरपरिछिन्न इत्यर्थः ॥ शेते निद्राल्लतया प्रकाशत उपलंभनमात्रश्चैतन्य
घन आत्मा भवानिति ॥ बलवद्भिः कृतद्वेषानिति यदुक्तं तदपि सत्यमित्याह ॥ नित्यमिति ॥ कर्मेंद्रियगणैः ज्ञातितैर्बहिर्मुखैर्वैरिंद्रियगणैर्द्वे
ष्ट्यभिप्रायेण बहुवचनं ॥ ज्ञातितैरिंद्रियगणैर्येषामिति वा तैस्त्वं नित्यं कृतविग्रहः तेषु तवाप्रतीतिः यदुक्तं त्यक्तनृपासनानिति तत्राह त्वमे

सत्यं भयादिव गुणेभ्य उरुक्रमांतः शेते समुद्र उपलंभनमात्र आत्मा ॥ नित्यं कदिंद्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकैर्नृ
पपदं विधुतं तमोंऽध ॥ ३५ ॥ त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यं यस्मादलौकिकमिवेहित
मीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंत ॥ ३६ ॥ ॥ राम श्री रामायनमः श्रीकृष्णायनमः ॥ ॥

वेत्याह ॥ त्वत्सेवकैरिति ॥ त्वत्सेवकैरिति ॥ नृपाणां पदमासनं अंधं गाढं तम एव तत् अविवेकबहुलत्वात् त्वत्सेवकैरेव तत् त्यक्तं किं पुन
र्वक्तव्यं ॥ त्वया त्यक्तमिति ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषामिति यदुक्तं तदपि तथैवेत्याह ॥ त्वत्पादेति ॥ नृपशुभिर्नराका
रैः पशुभिः किं पुनर्वक्तव्यं तव वर्त्मास्फुटमिति ॥ किंच ॥ यस्माद्ये भवंतमनुवर्तंते तेषामपीहितमलौकिकमिव ॥ अथो किं पुनर्वक्तव्यमतएव
श्वरस्येहितमलौकिकमित्यर्थः ॥ आस्थिताः पदवीं सुभ्रु प्रायः सीदंति योषित इति ॥ अस्य परिहारं स्वस्पति ॥ यद्वा कुर्येति पंचमश्लोके ॥ ३६

श्रीभा
द० उ
३२

निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजंति सुमध्यमे इति श्लोकोक्तं दोषत्रयं परिहरति । निष्किंचन इति द
रिद्रत्वाल्लक्षणं निष्किंचनत्वं तव न घटत इत्याह ॥ यस्मा इति ॥ अन्यतो बलिभुजः ब्रह्मा अपि ब्रह्मादयो यस्मै भगवते बलिं हरंति तस्य सर्वे
श्वरस्य भवतो दरिद्रता न घटत इत्यर्थः ॥ निष्किंचनजनप्रिय इत्यत्र तत्पुरुषेण च बहुव्रीहिणा वा निंदा स्यादिति स्वयमपि उभयथा स्तौति
प्रेष्ठो भवानिति ॥ तेन वित्ते कर्तृभूते न ये निष्क्रांता विनिष्किंचनाः ॥ विद्यया तु तुंगः विद्याचरणः ॥ निष्कृणा वित्तः निष्किंचनः बलिभुजांलो

निष्किंचनो ननु भवान्न यतोऽस्ति किंचिद्यस्मै बलिं बलिभुजोपि हरंत्यजाद्याः ॥ न त्वा विदंत्यसुतृपोंतकमाढ्यतांधाः प्रेष्ठो
भवान्बलिभुजामपि तेपि तुभ्यं ॥ ३७ ॥ त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वांछया सुमतयो विसृजंति कृत्स्नं तेषां वि
भो समुचितो भवतः समाजः पुंसः स्त्रियश्च रतयोः सुखदुःखिनोर्न ॥ ३८ ॥ ॥ राम राम श्री राम रामं ॥

केश्वराणां ब्रह्मादीनां त्वं प्रेष्ठः तेपि तुभ्यं तवेति ॥ तस्मात्प्रायेण नैवाढ्या मां भजंतीत्यस्योत्तरं न त्वा विदंतीति ॥ आढ्यतया अंधाः त्वामंतकं
न विदंतीति अतस्ते असुतृपः असूनेव तर्पयंति ॥ न त्वां भजंतीत्यर्थः ॥ ३७ ॥ बलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदंती ॥ ययोरेव समं वित्त
मित्यनेनोक्तमसमानत्वं परिहरति ॥ त्वं वेति ॥ फलात्मा परमानंदरूपः ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ समाजः
सेव्यसेवकत्वलक्षणः संबंधः ॥ न तु पुंसः ॥ स्त्रियश्च मिथो रतयोः ॥ अत एव तत्कृतसुखदुःखिनोः स्तदाकुलयोरित्यर्थः ॥ ३८ ॥ राम रामं ॥

राम
३२

मिन्नभिः श्राचिंताश्रुधेत्यस्य परिहारमाह ॥ तमिति ॥ भिन्नपदमाख्यानं न्यस्तं दंडं मुनिभिरितिमुधेत्यस्य परिहारः ॥ आत्मेति ॥ यदर्थं सर्वं प्रियं
तस्य ज्ञातात्मात्मनः तव वर्णानं न हृष्येत्यर्थः ॥ किंच आत्मद इति ॥ वेदे भूतं तद विज्ञाय त्वया दीर्घं समीक्ष्येयेति ॥ स्वस्मिन्नुक्तं दोषद्वयं परिहरति
इतीति ॥ इति ज्ञात्वैव मे मया हृतोसीत्यज्ञानपरिहारः ॥ हित्वेति अदीर्घसमीक्षापरिहारः ॥ भवतो भ्रुवः सकाशाडदीरितो यः कालवेग

त्वं न्यस्तं दंडं मुनिभिर्गदितानुभाव आत्मात्मदस्त्वजगतामिति मे हृतोसि ॥ हित्वा भवद्भ्रुव उदीरितकालवेगाध्यला
श्रिषो ज्ञभवनाकपतीन्नुकुतोन्ये ॥ ३८ ॥ नाद्यं वचस्तव वदाग्रज यस्तु भूयान्विद्राम्य शार्ङ्गनिनदेन जहर्थ सांत्व ॥ सिंहो
यथा स्वबलिमीशपशून्नुस्वभागं तेभ्यो भयाद्य उदधिंशरणं प्रपन्नः ॥ ३९ ॥ ॥ रामायश्रीकृस्नायनमः ॥ ॥

स्त्रेन धृत्वा आशिषो येषां तान् ॥ ब्रह्मादीनपि विहाय कुतोन्ये वराका इत्यर्थः ॥ ३८ ॥ स्वाज्ञानं परिहृत्य प्रकर्षांतरगुणावर्णनं पदीर्घको
परिसंभेगणतस्मिन्नेवाज्ञानमापादयति ॥ नाद्यमिति ॥ सिंहो यथा पशून्विद्राव्य स्वबलिं हरति तथा शार्ङ्गधनुर्निनादेनैव जरासंधा
धीन्विद्राव्य सांत्व भागं श्रियं यस्त्वं जहर्थ हृतवान सितस्य तव राजभ्यो भयाद् उदधिं प्रपन्न इति ॥ यद्वचो भाषणं तेन्नाद्यं मां ध्यंन घटते इत्य
र्थः ॥ ३९ ॥ राम श्री रामायनमः श्री श्री श्री श्री श्री श्री श्री श्री श्री श्रीरामायनमः

श्रीभा
ट ३
३४

यच्चान्यदस्पृष्टवर्त्मनामित्यादिना अर्थात्त्वां भजतः सीदंतीत्यवसादनं अभावहत्त्वमुक्तं तदपि मंदमेवेत्याह यद्यांकयेति ॥ यस्तव भजन
वाक्यात्तपशिवामणयोक्तपोत्तमाः ॥ अंगो वेनस्य पिता वेन्यः पृथुः ज्ञायते भारतः नाकपृष्ठो ययातिर्गयश्चादिर्येषां ते ॥ यणतेतव पद
वीमार्गमाश्रितास्ते किं सीदंति न सीदंत्येव अपितु त्वत्पदं प्राप्ता इत्यर्थः ॥ एवं चकोपावेशेनावसादनस्य परिहारः दस्पृष्टवर्त्मनामित्येतदा

पा

यद्यांकयात्तपशिवामणयोंगवैन्यज्ञायंतनाकपृष्ठगयादयेकपत्यं ॥ राज्यं विसृज्य विविशुर्वरमंतत्राद्य सीदंतिते तेउ
पदवीं यदिहास्थिताः किं ॥ २३ ॥ कान्यं अर्थेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनतापवर्गं ॥ लक्ष्म्यालयं त्ववि
गणय्य गुणालयस्य मर्त्या सदोरुभयमर्थविविक्त दृष्टिः ॥ २४ ॥ राम राम श्री श्री राम राम ॥

नेतरे विहायात्रोत्कर्षः ॥ २३ ॥ यच्चोक्तं कैवल्यमधाम्नतोनुरूपमितितत्राह श्लोकद्वयेन कान्यमिति ॥ गुणानामालयस्य तव पादसरोजगंधं जन
नतायाः अपवर्गमोक्षरूपं लक्ष्म्या आलयंतत्सेव्यं सज्जिर्महद्भिर्मुखरितं वर्णितं माघ्राय लब्धविराणय्य मर्त्यो मरणधर्मिका सदाउ
रुभयं यस्पतमन्यंकाहीङ्अर्थयेतसेवेत अर्थविविक्ताः दृष्टिर्यस्याः सा ॥ गुणालयस्येत्यनेन गुणैर्हीन इति यदुक्तं तदपास्तं ॥ २४ ॥

राम
३४

अतस्त्वामेवाहमभजमित्याह ॥ तंत्वेति ॥ प्रार्थ्यते स्पादिति अरणांशरणं स्तुतिभिर्देवतिर्यगादिभिर्जन्मभिः प्रागंतरेत्वर्थवाद
कुलकर्मश्रवणोरित्यर्थः ॥ कथंभूतस्य तव यस्त्वमहत्तस्य संसारस्य अपवर्गोनाशो यस्मात्सभजं तमुपयाति आत्मसात्करोति
तस्य तवांघ्रिरिति भीतस्य हि शरणमेवानुरूपं भजन योग्य अतस्त्वामहमभजमित्यर्थः ॥४३॥ एवोक्ते राज्ञो बहवो गुणाराज्ञा इत्री
पिलाभूपैर्लोकपालविभूतिभिरित्यादिना तत्रसेर्ष्यं सशापं सांगुलिभंगं चाहहहा अप्यो ॥ तस्याः स्युरिति ॥ खरा इव केवलं भारवाहाः
गावो बलीवर्दा इव नित्यं मापारक्लिष्टाः श्वान इवावमताः ॥ बिडाला इव कृपणा हि स्त्रासष्टत्या इव किंकराः नृपाः तस्या इभगायाः

तेलानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च कामपूरं ॥ स्यान्मेतवांघ्रिरशरणं स्तुतिभिर्भ्रमंत्पायो वैभवं
तमुपयात्यपवृत्तापवर्गः ॥४३॥ तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोश्वबिडालभृत्याः ॥ य
त्कर्णमूलमरिकर्षणनोपयाया युष्मत्कथा मृडविरिंचसभासु गीता ॥४४॥ त्वक्श्मश्रुरोमनखकेशपिनद्धमंत
र्मांसास्थिरक्तकृमिविट्कफवातपित्तं ॥ जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥४५॥
अस्त्वंबुजाक्ष मम ते चरणानुरागा आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः ॥ यर्हस्य वृद्धय उपात्तरजोतिमात्रो मामीक्ष

पतयाः स्युर्यस्याः कर्णपथं न प्राप्नुयात्त्वत्कथेति ॥४३॥ नन्वाहितेपदाब्जमकरंदमजिघ्रती या स्त्री विमूढा सकांतोयमिति मतिर्यस्याः सा
कांतमतिः कामयंती जीवच्छवं भजति त्वगादिभिर्बहिः पिनद्धं मंतर्मांसादिमयमिति ॥४५॥ यदुक्तं उदासीना वयमिति तत्राह ॥ अस्त्व
ति ॥ यद्यपि त्वं निरपेक्षस्तथापि मम ते चरणानुरागोस्तु मयि च मय्यपि न अतिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य ते आत्मन् आत्म
न्येवरतस्य तर्हि तव तेन कोनलाभः त्वच्चरणानुरागएवमहांल्लाभः किंच यर्हि अस्य विश्वस्य वृद्धये उपात्तोरजोतिमात्रो उत्कंगं ये
न सततया सूतः सन्मामीक्षस्व ॥ अप्यर्थेहहर्षे तदेवनः परमानुकंपा अत्यनुग्रह इति ॥४६॥ ॥ ॥ ॥ ॥ ॥ ॥

तदेवंतडङ्कंसर्वश्रुतिमिथ्या व्यायश्रमन्नचिन्तामंत्रमुपदिशंत्याहद्वाभ्यांनैवेति॥ अथात्मनोनुरूपमित्यादितेवचःअलीकंमिथ्येतिनम
न्येयतोहेतोर्लोकेकन्यायाएवक्वचिद्रतिर्भवति॥ यथाकाशिराजकन्यानांअंबांबिकांबालिकानांतिसृणांमध्येअंबायाएवसाल्वे
रतिर्जातातद्वत्॥४७॥ सूढायाः परिणीतायाअपीतिउभयस्मात्लोकद्वयात्च्युतोभ्रष्टइति॥४८॥ प्रलंबिताउपहसितासिअन्वा
त्थअन्वाप्नोतिवर्ती॥४९॥ मयिएकांतभक्तायास्तेकामाः संत्येव॥ अकामायकामानिहनत्येमोक्षपर्यवसायिनइत्यर्थः॥५॥ अनुवादे

नैवालीकमहंमन्येवचस्तेमधुसूदन॥ अंबायाइवहिप्रायःकन्यायाःस्याद्रतिःक्वचित्॥४७॥ व्यूढायाश्चापि
पुंश्चल्यामनोभ्येतिनवंनवं॥ बुधोसतींनबिभृयात्तांबिभ्रदुभयच्युतः॥४८॥ श्रीभगवानुवाच॥ साध्व्येतच्छ्रोतुका
मनराजपुत्रिप्रलंबिता॥ मयोदितंयदन्वात्थसर्वंतत्सत्यमेवहि॥४९॥ यान्यान्कामयसेकामान्मय्यकामायभा
मिनि॥ संतिह्येकांतभक्तायास्तवकल्याणिनित्यदा॥५०॥ उपलब्धंपतिप्रेमपातिव्रत्यंचतेनघे॥ यद्वाक्यैश्चाल्यमा
नायानधीर्मय्यपकर्षिता॥५१॥ येमांभजंतिदांपत्येतपसाव्रतचर्यया॥ कामात्मानोपवर्गेशंमोहितामममायया॥
५२॥ मांप्राप्यमानिन्यपवर्गसंपदंवांछंतियेसंपदएवतत्पतिं॥ तेमंदभागानिरयेपियेनृणांमात्रात्मकत्वान्निरयःसु
संगमः॥५३॥

नववान्दत्वातामभिनंदति॥ उपलब्धमिति॥ यद्यस्मान्मयिवर्तमानाधीर्नापकर्षितानान्यविषयाजाता॥५१॥ एकांतभक्तिमभिनंदयता
मेवदृढीकर्तुंसकामान्भक्तान्निंदति॥ येमामिति॥ दांपत्येदांपत्यउपभोगयस्तुलाभार्थं॥५२॥ मायामोहितत्वमेवोपपादयति॥ मांप्राप्येति॥ अप
वर्गाणांसहसंपदोयस्मिंस्तं तंमांप्राप्यप्रसाद्ययेकेवलसंपदएवविषयान्वांछंतिनतुमांतत्पतिं तासांसंपदामहमेवपतिर्येभ्यस्तं॥ तेवि
षयानिरयेपिअतिनिकृष्टयोनावपिस्युः तान्किंच तेषांमात्रात्मकत्वात्विषयात्मकत्वान्निरयःसुसंगमः शोभनसंगमएवस्यादतो
मंदभाग्याइत्यर्थः ५३

तस्मात् हे स्वामिन् त्वया मयि भवमोचनी निष्कामा अनुष्टितिः कृतादिष्ट्या एतन्न भद्रं कथंभूता वल्लेः खड्गक्षतांडराशिशोडशभिप्रायायायात्र
तएव अहं भरायाः प्रागात पर्णपरायाणि निष्कृतिर्जुषो वंचनपरायाः स्त्रियः स्वतरामसौ अनुष्टितिः खड्गक्षतेति ॥५४॥ किंच संततिनिष्कामाः
प्रेमोचमध्यनुवर्तमाना बाह्याः किंतु त्वया सहृशी कापि न पश्यामीति तस्या भक्तिं बद्धमानेनाभिनंदति ॥ नत्वा दृशीमिति त्रिभिः ॥ उप
श्रुतोः सत्याः कथायस्यमे ॥५५॥ पोढाहपर्वीण्अनिरुद्धविवाहे ॥ अन्नगोष्ठ्यां सूतसभायां तस्य भ्रातुर्वधतस्मिन्काले कालान्तरेत

दिष्ट्या हे स्वर्य सकृन्मयि त्वया कृता अनुष्टितिर्भवमोचनी वल्लेः ॥ खड्गक्षतासो स्वतरां डराशिशोह्य संभरायानिष्कृतिं
जुषस्त्रियः ॥५४॥ नत्वा दृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि मानिनि यथा स्वविवाहकाले प्राप्तान्नृपान्विगण
य्य रहो हरो मे प्रस्थापितो द्विज उपश्रुतसत्कथस्य ॥५५॥ भ्रातुर्विरूपकरणं युधि निर्जितस्य प्रोद्वाहपर्वणि च तद्
धमक्षगोष्ठ्यां ॥ दुःखं समुत्थमसहोस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते ॥५६॥ दूतस्त्वयात्मलभने
सुविविक्तमंत्रः प्रस्थापितो मयि चिरायति शून्यमेतत् ॥ मत्वा जिहासमिदमंगमनन्ययोग्यं तिष्ठेत तत्त्वयि च यं प्रति

दकुसमरणतः ॥ कुनः कुनः समुत्थं दुःखं अस्माभिरयोगो वियोगस्तद्भीत्या असहः सोढवती असि अनेनैव अनिरुद्धविवाहानंतर्य
मपि ज्ञातव्यं ॥५६॥ किंच दूत इति ॥ आत्मलभने मत्प्राप्त्यर्थं मयि विरायति स्वाभाविनि विवाहे आगंतव्यमिति कृते सति समये कथंचि
दप्राप्नुवति सति पतिर्हि ... शून्यं मत्वा इदमनन्ययोग्यमंगं जिहासेत्यक्तुमिष्टामित्यस्यामीत्येवं हृतः प्रस्थापितः तथाहं कृते त्वया
यद्दूतो जनास नान्नभेयभवत् प्रमादं जह्यामसत्त्व तद्दृष्टां तज्जन्मभिः स्यादिति ॥ यद्वा अजिहासमिति केदं त्यक्तुमिष्टे इत्यर्थः ॥ तत्त्वक
मेत्वय्येवतिष्टेतन तत्रेति कर्तुं शक्यमित्यर्थः ॥ किंतु त्वां प्रति केवलं नंदयामोहयामइति ॥५५॥ राम श्री राम श्रीरामाय ॥

सौरतसंलापैः स्मारतनर्मगोष्ठीभिः ॥५९॥ इति श्रीभागवते दशमस्कंधे षष्टितमोध्यायः ॥६०॥ एकषष्टितमे शौरेः पुत्रपौत्रादिसंततिः
अनिरुद्धविवाहे च रुक्मिणो रामतो वधः ॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीषु चस्त्रियान् ॥ कोटिशः पुत्रपौत्रादीन्गृहमेधी रैवयोजयत ॥ तदे
तद्वत्तमाह ॥ एकैकश इति ॥ कृष्णस्य अबला भार्याः सर्वा आत्मनियासंपत्तत्यापितुः सकाशात् अनवमान् ॥१॥ प्रेष्ठं न्यमंसत अच्यु

श्रीशुक उवाच ॥ एवं सौरतसंलापैर्भगवाञ्जगदीश्वरः ॥ स्वरतो रमया रेमे नरलोकं विडंबयन् ॥५९॥ तथान्यासामपि
विभुर्गृहेषु गृहवानिव ॥ आस्थितो गृहमेधीयान् धर्माल्लोकगुरुर्हरिः ॥६०॥ इति श्रीदशमस्कंधे रुक्मिणीविवाहे ष
ष्टितमोध्यायः ॥६०॥ श्रीशुक उवाच ॥ ओं एकैकशस्ताः कृष्णस्य पुत्रान्दश दशाऽबलाः ॥ अजीजनन्ननवमान्पितुः सर्वा
त्मसंपदा ॥१॥ गृहादनपगं वीक्ष्य राजपुत्र्योच्युतं स्थितं ॥ प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः ॥२॥ चार्वब्जकोशव
दनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनि
ताविभ्व्यः ॥३॥

तस्य प्रियतमं पत्येकं स्वं स्वं मेनिरे न तस्य तत्त्वं आत्मारामत्वं विदंति ता आत्मारामत्वं ज्ञानशक्तिहृद्येन ॥ चार्विति ॥ चार्वब्जकोशवद्वदनं
च आयतानि बाहू नेत्राणि च सप्रेमणा हासरसेन वीक्षितानि वल्गुजल्पाश्च भगवता एतैः स्वैः स्वैरनेकैर्विभ्रमैस्तस्य मनो विजेतुं ह वै
न समशकन् न शशक्नुवन् ॥ विभ्व्यः परिपूर्णाः ॥३॥ राम श्री राम श्री रामायनमः श्रीपरमेश्वराय ॥

तासां विभ्रमान्वर्णयन्नेतद्धि हरणेति ॥ स्मायेति ॥ स्मायो गूढहसितं तद्युक्तः अवलोकलवः कटाक्षलेशस्तेन दर्शितः सूचितः भावोभिप्रा
यः तेन हारि मनोहरं यच्च भ्रूमंडलं तेन प्रहिताः प्रस्थापिताः सौरता रतमंत्राः तेषु शौंडैः प्रगल्भैरनंगस्य बाणैः शरैः स्वेषु
करणैः कामशास्त्रप्रसिद्धैर्यस्येंद्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकुरिति ॥ ४ ॥ अनुरागगर्भहासावलो
कनवसंगमलालसाडौत्सुक्यं चते आद्यायस्य विभ्रमकंदर्पस्य तं भजे ॥ अनुरागगर्भहासावलोकनवसंगमलालसाद्यं भजेः तस्य

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणैर्य
स्येंद्रियं विमथितुं करणैर्न शेकुः ॥ ४ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां ॥ भेजु
र्मुदाविरतमेधितयानुरागहासावलोकनवसंगमलालसाद्यं ॥ ५ ॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूल
विश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥ ६ ॥ तासां
या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः ॥ अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥ ७ ॥ चारुदेष्णः सुदेष्ण
श्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः ॥ ९ ॥ प्र
द्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ॥ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चंद्रभानुर्बृहद्भा
नुरतिभानुस्तथाष्टमः ॥ १० ॥ श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ ११ ॥ श्री श्री रामकृष्णाय नमः ॥

मनो विजेतुं न शेकुरिति वा ॥ ५ ॥ किं च पत्युः ब्रह्मादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति ॥ प्रौढभावेपि नवसंगमाद्यभिधानं आगतस्यागतस्यैवै
नौत्सुक्येन च तथा प्रतीतेः ॥ तेषामेव श्लोकानां प्रत्याख्यानांतरे पुनः कारादयति निरतिसौंदर्यात् ॥ ६ ॥ प्रासंगिकमुक्त्वा प्रकृतमाह ॥ तासामिति
स्यापुत्राणां या सांता सां मध्ये अष्टौ महिष्यो याः प्रागुक्ताः तत्पुत्रानिति ॥ ७।८।९ ।१०।११ ॥ राम राम राम राम राम ॥

१२ श्रीमानिति वसोः कुंतेर्वा विशेषणं ॥१३॥ भद्रोनाम एकल्लः एकः सोमकोवरः कनीयानिति एते कालिंद्याः सुताइति ॥१७॥ माद्र्यास्त्व
स्याणायाः ॥१५॥ वृधिर्दशम एते मित्रविंदात्मजाः ॥१६॥ संग्रामजित्प्रभृतयः सप्तकाता भद्रायाः सुताः शोभ्यानामपि सैव ॥१०।१८।१९॥ एते

सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ विजयश्चित्रकेतुश्च वसुमान्द्रविडः क्रतुः ॥ जांबवत्याः सुता एते सां
बाद्याः पितृसंमताः ॥१२॥ वीरश्चंद्रोश्वसेनश्च चित्रगुर्वेगवान्वृषः ॥ आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितेः सुताः
॥१३॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः ॥ शांतिर्दर्शः पौर्णमासः कालिंद्याः सोमकोवरः ॥१४॥ प्रघोषो गात्र
वान्सिंहो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोपराजितः ॥१५॥ वृको हर्षोनिलो गृध्रो वर्धनोन्ना
द एव च ॥ महांसः पवनो वह्निर्मित्रविंदात्मजाः क्षुधिः ॥१६॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोरिजित् ॥ जयः सुभ
द्रो भद्राया वाम आयुश्च सत्यकः ॥१७॥ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥१८॥ प्रद्युम्नाच्चानिरुद्धोभूद्रु
क्मवत्यां महाबलः ॥ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥१९॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥ मा
तरः कृष्णजातानां सहस्राणि च षोडश ॥२०॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥ कृष्णेन परिभूत
स्तं हंतुं रंध्रं प्रतीक्षते ॥२१॥ एतदाख्याहि भगवन्द्विषोर्वैवाहिकं मिथः ॥२२॥ राम राम श्री श्री श्रीराम॥

षां चेति अन्येषामपि कृष्णपुत्राणां शतसंख्यत्वेपि पुत्राः पौत्राश्च कोटिशो बभूवुः ततो हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मार
यति ॥ मातरः कृष्णजातानामिति वशब्देनाधिका ज्ञेया ॥२०॥ यः कृष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति ॥२१॥ वैवाहिकं विवाहनिमि
त्तं २२

ननु किमणो भिप्रायं कथं जानीम इति चेदत आह ॥ अनागतमिति ॥ अतीन्द्रियदस्मदादीन्द्रियागोचरं ॥ विप्रकृष्टं दूरस्थं व्यवहितं कुड्या
द्यन्तरितं ॥ २२ ॥ यद्यपि श्रीरुक्मणा वमानितः ॥ तथापि वैरमनुस्मरन्नपि व्यत वत्सादादन्वमोदते त्यर्थः ॥ २४ ॥ तत्रोत्तरं स्वयंवरे रुक्मवत्या
हृतः स त्र

अनागतमतीतं च वर्तमानमतीन्द्रियं ॥ विप्रकृष्टं व्यवहितं सम्यक्पश्यन्ति योगिनः ॥ २२ ॥ श्रीशुक उवाच ॥ यद्य
प्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥ व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं ॥ २४ ॥ हृतः स्वयंवरे साक्षादनं
५ गोऽयतनस्तथा ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥ २५ ॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली उ
पयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥ २६ ॥ दौहित्रायानिरुद्धाय पौत्रीं रुक्म्याददाद्धरेः ॥ रोचनां बद्धवैरोपि
स्वसुः प्रियचिकीर्षया ॥ २७ ॥ जानन्नधर्मं तद्यौनं स्नेहपाशानुबंधनः ॥ २८ ॥ तस्मिन्नभ्युदये राजन्रुक्मिणी रामके
शवौ ॥ पुरं भोजकटं जग्मुः सांबप्रद्युम्नकादयः ॥ २९ ॥ तस्मिन्निवृत्त उद्वाहे कालिंगप्रमुखा नृपाः ॥ दृप्तास्ते रु
क्मिणं प्रोचुर्बलमक्षैर्विनिर्जय ॥ ३० ॥ अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत् ॥ इत्युक्तो बलमाहूय तेनाक्षै
रुक्म्यदीव्यत ॥ ३१ ॥ शतं सहस्रमयुतं रामस्तत्राददे पणं ॥ तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलं ॥ ३२ ॥ दंतान्स
दर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ॥ ३३ ॥

राज्ञो निर्जित्य जहारेति ॥ २५ ॥ सर्वासामेवैका कन्येति तत्सर्वविवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह ॥ रुक्मिण्या इति ॥ २६ ॥ २७ ॥
यौनं विवाहः तद्यौनमधर्मं जानन्निति ॥ २८ ॥ द्विषदन्नं न भोक्तव्यं द्विषंतं नैव भोजयेदित्यादिलोकविरोधात् ॥ अस्वर्ग्यं लोकविद्वि
ष्टं हितमप्याचरेन्नहि इति विधा चेत्यर्थः ॥ लोकविरुद्धाचरणफलं वक्तुमाह ॥ तस्मिन्निति ॥ २९ ॥ ३० ॥ अदीव्यताक्रीडत ३१ ॥ ३२ ॥ ३३ ॥

निष्काणांलक्षमेकंपणंकृतवान्रुक्मीतंकपटं ॥३४॥ न्यर्बुदंदशकोटीःसहंसोमितोरामआददे ॥३५॥ छलमाश्रितोरुक्मीमयाजितमि

रुक्मि

ततोलक्षंरुक्म्यगृह्णाद्ग्लहंतत्राजयद्बलः ॥३७॥ जितवानहमित्याहरुक्मीकैतवमाश्रितः ॥३८॥ मन्युनाक्षोभितःश्रीमा
न्समुद्रइवपर्वणि ॥ जात्यातारुणाक्षोतिरुषान्यर्बुदंग्लहमाददे ॥३९॥ तंचापिजितवान्रामोधर्मेणछलमाश्रितः ॥ रुक्मी
जितंमयात्रेमेवदंतुप्राश्निका इति ॥३६॥ तदाब्रवीन्नभोवाणीबलेनैवजितोग्लहः ॥ धर्मतोवचनेनैवरुक्मीवदतिवैमृ
षा ॥४१॥ तमनादृत्यवैदर्भोदुष्टराजन्यचोदितः ॥ संकर्षणंपरिहसन्बभाषेकालचोदितः ॥४०॥ नैवाक्षकोविदायू
यंगोपालावनगोचराः ॥ अक्षैर्दीव्यंतिराजानोबाणैश्चनभवादृशाः ॥४२॥ रुक्मिणैवमधिक्षिप्तोराजभिश्चोपहासितः
क्रुद्धःपरिघमुद्यम्यजघ्नेतंनृपसंसदि ॥४३॥ कलिंगराजंतरसागृहीत्वादशमेपदे ॥ दंतानपातयत्क्रुद्धोह्यहसद्विवृतैर्द्वि यो
जैः ॥४४॥ अन्येनिर्भिन्नबाहूरुशिरसोरुधिरोक्षिताः ॥ राजानोदुद्रुवुर्भीताबलेनपरिघार्दिताः ॥४६॥ निहतेरुक्मि
णिस्यालेनाब्रवीत्साध्वसाधुवा ॥ रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिः ॥४७॥ ततोनिरुद्धंसहसूर्ययावरं
रथंसमारोप्ययगुःकुशस्थलीं ॥ रामादयोभोजकटाद्दशार्हाःसिद्धाखिलार्थामधुसूदनाश्रयाः ॥४८॥ इति श्रीद्श
मस्कंधेएकषष्टितमोध्यायः ॥६१॥

त्याह ३६।३७।३८।३९।नृपसंसदिनृपसभायां ४०।४१।४२।४३।सूर्ययानवोढयासिद्धाअखिलार्थाअभ्युदयाःशत्रुवधादयोयेषांते ४८ इतिदश
मस्कंधेएकषष्टितमोध्यायः ६१ राम
३७

द्विशुकस्य ष्टित मेव प्रोक्तमनिरुद्धस्य रोधनं ॥ कन्यया रममाणस्य बाणेन बद्ध बाहुना ॥ अनिरुद्धो द्वेह्यस्मिन्बाणपायादस्य संप्रयोगे ॥ श्री
हस्तः ॥ श्रीहरं जित्वा बाणबाहुन्नपाक्रिनत ॥ २ ॥ १ । २ । ३ । ४ । पुराधिपं पुरपालकं ॥ ५ ॥ ६ ॥ काममुहायतीति काममुहः सचासौ

श्रीराजोवाच ॥ ॐ बाणस्य तनयामूषामुपयेमे यदूत्तमः ॥ तत्र युद्धमभूद्घोरं हरिशंकरयोर्महत् ॥ एतत्सर्वं म
हायोगिन्समाख्यातुं त्वमर्हसि ॥ १ ॥ श्रीशुक उवाच ॥ बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ॥ येन वामनरू
पाय हरये दायि मेदिनी ॥ २ ॥ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः
३ ॥ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा ॥ तस्य शंभोः प्रसादेन किंकरा इव तेऽमराः ॥ सहस्रबाहुर्वाद्येन ताण्ड
वेऽतोषयन्मृडं ॥ ४ ॥ भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेण च्छंदयामास स तं वव्रे पुराधिपं ॥ ५ ॥ स एकदा
ह गिरिशं पार्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजं ॥ ६ ॥ नमस्ये त्वां महादेव लोकानां गुरुमी
श्वरं ॥ पुंसामपूर्णकामानां काम पूरामरांघ्रिपं ॥ ७ ॥ दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ॥ त्रिलोक्यां प्रतियोद्धारं
न लभे त्वदृते समं ॥ ८ ॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं ॥ आद्ययां चूर्णयन्नद्रीन्भीतास्तेऽपि प्रदुद्रुवुः ॥ ९
तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥ १० ॥ इत्युक्तः कुमतिर्हृष्टः स्व
गृहं प्राविशन्नृप ॥ प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः ॥ ११ ॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिं कन्या
लभत कांतेन प्रागदृष्टश्रुतेन सा ॥ १२ ॥ सा तत्र तमपश्यंती क्वासि कांतेति वादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला
व्रीडिता भृशं ॥ १३ ॥ बाणस्य मंत्री कुंभांडश्चित्रलेखा च तत्सुता ॥ सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता ॥ १४ ॥

वमरांघ्रिपः कल्पवृक्षस्तं ॥ ७ ॥ कंडूत्या अनिभृतैः अभीतैर्दोर्भिः अद्रीन्चूर्णयन् आद्यया आगामं ॥ ९ ॥ ११ स्ववीर्यस्य नाशनं नाशकं केतुभं
गं प्रतीक्षमाणः ॥ ११ ॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह तस्योषेति ॥ प्राद्युम्निनानिरुद्धेन तत्रापि स्वप्ने ॥ १२ ॥ तं कांतं न पश्यंती सा

उषासमागमं चित्रलेखाविद्यया तामसबाणस्य ... नं ५६

श्रीभा
६३
६९

हस्तग्राहं भर्तारं १८।१९।२०।१९ ।त्वया दृष्टस्तेषां मध्ये कोवा भवेदिति देवादीन्यथावत्पटे लिखत् ॥ ३ ॥ प्रद्युम्नं लिखितं वीक्ष्याधोमुखीय
मिति लज्जिता २०।२२।२३। शोणितपुरं नीत्वा २४ ॥ पुंभिर्दुष्प्रेक्ष्ये गृहे स्थितमशंकं ॥ २५ ॥ सचपरार्ध्यैर्मूल्यैः स्रग्गंधादिभिः शुश्रूषण

कं त्वं मृगयसे सुभ्रु कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेद्यापि राजपुत्र्युपलक्षये ॥ १६ ॥ उषोवाच ॥ दृष्टः कश्चिन्नरः स्व
प्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयंगमः ॥ १७ ॥ तमहं मृगये कांतं पाययित्वाधरं मधु ॥
मां क्वापि यातः स्पृहयंतीं क्षिप्त्वा मां वृजिनार्णवे ॥ १७ ॥ चित्रलेखोवाच ॥ व्यसनं तेपकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये न
रं यस्ते मनोहर्ता तमादिश ॥ १९ ॥ शुक उवाच ॥ इत्युक्त्वा देवगंधर्वसिद्धचारणपन्नगान् ॥ दैत्यान्विद्याधरान्यक्षान्मनुजांश्च यथा
लिखत् ॥ २ ॥ मनुजेषु च सा वृष्णीन् शूरमानकदुंदुभिं ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ २१ ॥ अनिरुद्धं विलिखितं
वीक्ष्योषावाङ्मुखी [illegible] असावसाविति प्राह स्मयमाना महीपते ॥ २२ ॥ चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ ययौ
विहायसा राजन्द्वारकां कृष्णपालितां ॥ २३ ॥ तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रिय
मदर्शयत ॥ २४ ॥ सा च तं सुंदरवरं विलोक्य मुदितानना ॥ दुष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समं ॥ २५ ॥ परार्ध्यवासःस्रग्गं
धधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः ॥ २६ ॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥ ना
हर्गणान्स बुबुधे उषयापहृतेंद्रियः ॥ २७ ॥ तां तथा यदुवीरेण भुज्यमानां हतव्रतां ॥ हेतुभिर्लक्षयांचक्रुरप्रीतां दुरव
च्छदैः ॥ २८ ॥ भटा आवेदयांचक्रू राजंस्ते दुहितुर्वयं ॥ विचेष्टितं लक्षयामः कन्यायाः कुलदूषणं ॥ २९ ॥ राम रा ॥

पूर्वं कर्मचितः सन् ॥ २६ ॥ उषयापहृतेंद्रियो हर्गणान्न दिनसमूहान्न बुबुधे ॥ २७ ॥ आप्रीतामतिदुष्टां दुरवच्छेदैः स्फादयितुमशक्यैः ॥ २८
विचेष्टितं विरुद्धाचरणं ॥ २९ ॥ राम राम राम श्री राम श्री कला राम राम राम राम राम ॥

राम
६३

अनपायिभिः अपायः अपसरणं प्रमादो वा तद्रहितैः पालितेऽपि दुष्प्रेक्ष्या सती यस्याः तस्याः पुंभिर्दूषणं कृतेति न विद्महे न जानी
मह इति ॥ २९ ॥ ३ ॥ कामस्यात्मनो देहाज्जातं ॥ ३१ ॥ अभिनृम्णया सर्वमंगलया तस्या अंगसंगेन स्तनकुंकुमं यस्यां तां स्रजं बाह्वोर्मध्ये वह

अनपायिभिरस्माभिर्गुप्तायाः स्वगृहे प्रभो ॥ कन्याया दूषणं पुंभिर्दुष्प्रेक्ष्याया न विद्महे ॥ २९ ॥ ततः प्रव्यथितो बाणो
दुहितुः श्रुतदूषणः ॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहं ॥ ३० ॥ कामात्मजं तं भुवनैकसुंदरं श्यामं पिशंगांबरमं
बुजेक्षणं ॥ बृहद्भुजं कुंडलकुंतलत्विषा स्मितावलोकेन च मंडिताननं ॥ ३१ ॥ दीव्यंतमक्षैः प्रिययाभिनृम्णया तदंगसंग
स्तनकुंकुमस्रजं ॥ बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः ॥ ३२ ॥ स तं प्रविष्टं वृतमाततायिभि
र्भटैरनीकैरवलोक्य माधवः ॥ उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसया ॥ ३३ ॥ जिघृक्षया तान्परितः प्र
सर्पतः शुनो यथा सूकरयूथपोऽहनत् ॥ ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥ ३४ ॥ तं नागपाशै
र्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह ॥ उषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरोदिषीत् ॥ ३५ ॥
इति श्रीभागवते महापुराणे दशमस्कंधे अनिरुद्धबंधो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ श्री श्री राम राम ॥

मिदधानं मधुमल्लिका वसंतसंभवा मल्लिका तदाश्रितां तस्याग्र इति आर्षः संधिः तस्या अग्रे इत्यर्थः ॥ ३२ ॥ आततायिभिरुद्यतशस्त्रैः
माधवोऽनिरुद्धः मौर्वं मुरलोहविशेषः ॥ तन्निर्मितं ॥ ३३ ॥ ३४ ॥ शोकविषादाभ्यां विह्वला अश्रुवशात् अश्रूणां कलाबिंदवो ययोस्ते अक्षिणी
यस्याः सा ॥ ३५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधटीकायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥ श्री रामाय नमः श्रीकृष्णाय नमः

श्रीभा°
द° ३°
४°

त्रिषष्टितमेवाथबाणयादवसंगरे ॥ ख्यातिर्ध्वनिरेणारोडेण बाणबाहुभिदो हरेः ॥ १ ॥ १ कर्मबंधनादिकं च २ रामकृष्णानुवर्तिन इति तौ पूर्वतो नि
र्गताविव्यर्थः ३ सर्वतोदिशमित्यस्योत्तरेणान्वयः ४ भज्यमानानि पुरोद्यानादीनि इति द्वंद्वैकवद्भावः ॥ अट्टालाः प्राकारादुपरितनास्तु

श्रीशुक उवाच ॥ अपश्यतां चानिरुद्धं तद्बंधूनां च भारत ॥ चत्वारो वार्षिका मासा व्यतीयुरनुशोचतां ॥ १ ॥ नारदात्तदुपाक
र्ण्य वार्तां बद्धस्य कर्म च ॥ प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥ २ ॥ प्रद्युम्नो युयुधानश्च गदः सांबोथ सारणः ॥ नं
दोपनंदभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतो दिशं ॥ रुरुधुर्बाणनगरं समंतात्सा
त्वतर्षभाः ॥ ४ ॥ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं ॥ प्रेक्ष्य बाणो रुषाविष्टस्तुल्यसैन्योभिनिर्ययौ ॥ ५ ॥ बाणार्थे भग
वान्रुद्रः ससुतः प्रमथैर्वृतः ॥ आरुह्य नंदिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥ आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणं ॥ कृष्ण
शंकरयोरासीत्प्रद्युम्नगुहयोरपि ॥ ७ ॥ कुंभांडकूपकर्णाभ्यां बलेन सह संयुगः ॥ सांबस्य बाणपुत्रेण बाणेन सह सा
त्यकेः ॥ ८ ॥ ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ॥ गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शंकरानुचराञ्छौ
रिर्भूतप्रमथगुह्यकान् ॥ डाकिनीर्यातुधानांश्च वेतालान्सविनायकान् ॥ १० ॥ प्रेतमातृपिशाचांश्च कुष्मांडान्ब्रह्मरा
शरैः क्षसान् ॥ द्रावयामास तीक्ष्णाग्रैः शार्ङ्गधनुश्च्युतैः ॥ ११ ॥ पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्ङ्गिणे ॥ प्रत्यस्त्रैः श
मयामास शार्ङ्गपाणिरविस्मितः ॥ १२ ॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतं ॥ आग्नेयस्य च पार्जन्यं नैजं पाशु
पतस्य च ॥ १३ ॥

त्तरस्थानानि ४ अभिनिर्ययौ बाणः ५ वृतः स्कंदः तत्सहितः प्रमथैर्गणैः ॥ रामकृष्णाभ्यां युयुधे ॥ ६ । ७ । ८ । ९ । १० । ११ ॥ १२ ॥
प्रत्यस्त्राण्येवाह ॥ ब्रह्मास्त्रस्येति ॥ नैजं नारायणास्त्रं ॥ १३ ॥ श्री श्री राम राम राम राम श्रीकृष्ण ॥

राम
४°

१४ ॥ शिखिना मयूरेण वाहनेन ॥ १५ ॥ तयो रनीकानि हतनाथानि येषां तानि १६ । १७ । १८ । १९ । २० । अनिरीक्षंस्तिर्यङ्मुखो बभूवेति ॥ २१ ॥ ज्वर
स्तु योद्धुमभ्यधावदिति ॥ २२ ॥ नारायणः शीतज्वरं मसृजत् ॥ २३ ॥ माहेश्वरः समाक्रंदन् युयुधे ॥ २४ ॥ आत्मानं परमशक्तिमंतं मन्यमानः
श्रीकृष्णं तापयितुं प्रवृत्तः स्वयमेव तप्तः सन् तं परमेश्वरं ज्ञात्वा स्तुवन्नमस्करोति ॥ नमामीति ॥ त्वा त्वां अनंतशक्तिं नमामि यतः परे

मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितं ॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥ १४ ॥ स्कंदः प्रद्युम्नबाणौ
घैरर्द्यमानः समंततः ॥ असृग्विमुंचन् गात्रेभ्यः शिखिनापक्रमद्रणात् ॥ १५ ॥ कुंभांडः कूपकर्णश्च पेततुर्मुसलार्दि
तौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १६ ॥ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोतिमर्षणः ॥ कृष्णमभ्यद्रवत्संख्ये
रथी हित्वैव सात्यकिं ॥ १७ ॥ धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै ॥ एकैकस्मिन् शरौ द्वौ द्वौ संदधे रणदुर्मदः ॥ १८ ॥ ता
नि चिच्छेद भगवान् धनूंषि युगपद्धरिः ॥ सारथिं रथमश्वांश्च हत्वा शंखमपूरयत् ॥ १९ ॥ तन्माता कोटरा नाम नग्ना मुक्त
शिरोरुहा ॥ पुरोवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥ २० ॥ ततस्तिर्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ॥ बाणश्च ताव ३८
द्विरथः छिन्नधन्वाविशत्पुरं ॥ २१ ॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥ अभ्यधावत दाशार्हं दहन्निव दिशो
दश ॥ २२ ॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरं ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ २३ ॥ माहेश्वरः समाक्रंद
न्वैष्णवेन बलार्दितः ॥ अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः ॥ २४ ॥ शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः ॥ २५
ज्वर उवाच ॥ नमामि त्वानंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिरूपं ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्र

शं ब्रह्मादीनामीशं ततश्च हेतुः सर्वात्मानं सर्वस्यात्मानं चेतयितारं तत्कुतः केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनं तदेवं सर्वं चेतयितृत्वेन परमेश्वर
त्वमुक्तं किंच ॥ विश्वस्य सृष्ट्यादिहेतुत्वादपीत्याह ॥ विश्वोत्पत्तीति ॥ नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह ॥ यत्तद्ब्रह्मेति यद्ब्रह्म तदेव त्वमित्य
र्थः किंच तद्ब्रह्मेत्यत्राह ब्रह्मलिंगं ब्रह्म वेदेन लिंग्यते ज्ञायते इति तत्कुतः प्रशांतं सर्वविक्रियारहितत्वात्साक्षा

किंच यावत्स्मविशेषं वस्तु तत्र वयं प्रभवामः त्वयि तु सर्वविशेषातीते न कस्यापि प्रभुत्वं किं तु त्वमेव सर्वप्रभुरिति ॥ तन्निमात्रत्वं विवृण्वन्नमस्य
ति ॥ काल इति कालः क्षोभकः कर्म निमित्तं तदेव फलाभिव्यञ्जकाभिव्यक्तः स्वभावः तत्संस्कारो जीवस्तद्वान् ॥ द्रव्यं भूतसूक्ष्माणि क्षेत्रं शरीरं
प्राणः सूत्रम् आत्मा अहंकारो विकारः ॥ एकादशेन्द्रियाणि महाभूतानि चेति षोडशकस्तत्संघातो देहः एतस्य च बीजरोहवत्प्रवाहः
रोहोऽङ्कुरः देहाद्बीजरूपं कर्म ततोङ्कुररूपो देहः ॥ ततः पुनरेवमिति प्रवाहः एषा त्वन्माया तस्या निरोधः अपोहो यस्मिन् तं त्वां निषेधाव
धिभूतं प्रपद्ये भजे इति ॥ २७ ॥ ननु देवकीतनयस्य मे कथमेवंभूतत्वं तत्राह ॥ नानाभावैरिति ॥ सर्वोपाधिविनिर्मुक्त एव त्वं यथा लील

कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः तत्संघातो बीजरोहप्रवाहस्तन्मायैषा तन्निषेधं प्रपद्ये
२७ ॥ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानाञ्जन्मैतत्ते भारहारा
य भूमेः ॥ २८ ॥ तप्तोहं ते तेजसा दुःसहेन शीतोग्रेणात्युल्बणेन ज्वरेण तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन्यावदा
शानुबद्धाः ॥ २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ रामघ ॥

यास्वीकृतैर्मत्स्याद्यवतारैर्देवान्बिभर्षि पालयसि तदर्थं लोकसेतून्वर्णाश्रमधर्मांश्च तदर्थं तदनुष्ठातॄन्साधूंश्च तदंगत्वेन तून्मा
र्गांश्च दैत्यादीन् हंसि संहरसि ॥ एवमेतदपि तव जन्म भूमेर्भारहरणाय लीलावतारो न कस्यापि त्वं तनय इत्यर्थः ॥ २८ ॥ अतोऽज्ञानत
स्त्वदभिभवे प्रवृत्तं मां तज्ज्वरेत्याशयेनाह ॥ तप्तोहमिति ॥ ते तेजसा त्वत्सृष्टेन ज्वरेण शीतोग्रेण शीतज्वरेण परसंतापकस्य युक्त
एव संताप इति वेदत आह ॥ तावदिति ॥ सेवायां प्रवृत्तानां न भवितमिति भावः ॥ २९ ॥ राम श्री कृष्णाय नमः ॥

हे त्रिशिरः क्षेत्र अपयातु मदाज्ञापालकः सन्सुखं विचर ॥ कासावाज्ञा तमाह ॥ य इति नौ आवयोरिमं संवादं यः स्मरेत् तस्य त्वत्तो न भयं भवेत्
त्वया भयं नोत्पादनीयमित्यर्थः ॥ २० । २१ । ३४ । ३३ । ३६ ॥ भक्तरक्षार्थं श्रीरुद्रो भगवंतं स्तौति ॥ त्वहीति ॥ अयमर्थः त्वामज्ञात्वा अयं छुध्यते इति व
चित्रं यतस्त्वं वाङ्मये ब्रह्मण्यपि गूढं शब्दब्रह्म अभिधाविषयत्वात् ॥ अतः परं ज्योतिर्ज्योतिषामपि प्रकाशकत्वादविषय इत्यर्थः ॥ कथं तर्हि
प्रतीतिरत आह ॥ यमिति ॥ अमलात्मनां स्वतः प्रकाशत इत्यर्थः ॥ आस्तां तावन्निर्गुणस्य तव ज्ञानं लीलयाधिष्ठितस्त्वया या विराड्वि

श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयं ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयं ॥ ३२ ॥ इत्युक्तोऽच्युत
मानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनं ॥ ३३ ॥ ततो बाहुसहस्रेण नानायुधधरोऽसुरः
मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ॥ ३४ ॥ तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ॥ चिच्छेद भगवान्बाहूञ्छाखा
इव वनस्पतेः ॥ ३५ ॥ बाहुषु छिद्यमानेषु बाणस्य भगवान्भवः ॥ भक्तानुकंप्युपव्रज्य चक्रायुधमभाषत ॥ ३६ ॥ श्रीरुद्र उवा
च ॥ त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ॥ यं पश्यंत्यमलात्मान आकाशमिव केवलं ॥ ३७ ॥ नाभिर्नभोऽग्निर्मुखमंबुरे
तो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी ॥ चंद्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेंद्रः ॥ ३८ ॥ राम श्रीराम ॥ ॥

ग्रहः ॥ सोऽपि न ज्ञायते इत्यर्थः ॥ ३५ ॥ उडुंबरफलांतर्वर्तिमशकैर्विना उडुंबरफलमित्याशयेन विराड्रूपेणास्तौति द्वाभ्यां ॥ नाभिरिति ॥ यस्य नभ
आदयो नाभ्याद्यवयवाः स भगवान् लोककल्पः प्रसीद इत्युत्तरेणान्वयः ॥ नभो यस्य नाभिः अग्निर्मुखं अंबु रेतः द्यौः शीर्षं आशा दिशः श्रुतिः श्रव
णेंद्रियं उर्वी अंघ्रिः ॥ चंद्रो मनः ॥ अर्को दृक् ॥ अहं श्रीशिव आत्मा अहंकारः समुद्रो जठरं इंद्रः भुजा बाहुः इंद्रादयो लोकपाला बाहव इत्यर्थः ३६

ओषधयोरोमाणियस्यकृष्णानुवृत्तिःस्पष्टतार्थः॥अंबुवाहाःकेशाःविरिंचोधिषणाबुद्धिःप्रजापतिर्विसर्गोमेढ्रंधर्मोहृदयंलोकैःकल्प्यतेअव
कल्प्यतेइतिलोककल्पः॥२४॥ननुप्रादेशिकशरीरस्यनभसोनाभित्वादीनिइत्यतआह॥नवेति॥हेअंगधामन्अप्रच्युतस्वरूपभवाय
अभ्युदयायनकेवलमेतावत्॥किंतुअस्मदनुग्रहार्थमपीत्याह॥वयंचेति॥सर्वेलोकपालाःत्वयापालिताःसप्तापिभुवनानिपालया
मइति॥२५॥ननुयदिभावयितारोवयंविभाव्यानिभुवनानिसंति॥तर्हिकथमुक्तंत्वंहिब्रह्मेति॥नहिब्रह्मत्वेममसजातीयविजाती

रोमाणियस्यौषधयोंबुवाहाःकेशाविरिंचोधिषणाविसर्गः॥प्रजापतिर्हृदयंयस्यधर्मःसवैभवान्पुरुषोलोककल्पः
२४॥नवावतारोयमजुंगधामन्धर्मस्यगुप्त्यैजगतोभवाय॥वयंचसर्वेभवतानुभाविताविभावयामोभुवनानिसप्त॥२५
त्वमेकआद्यःपुरुषोद्वितीयस्तुर्यःस्वदृग्घेतुरहेतुरीशः॥प्रतीयसेथापियथाविकारंस्वमाययासर्वगुणप्रसिद्ध्यै॥२६

यभेदःसंभवतीत्यतआह॥त्वमिति॥एकःसजातीयरहितःकुतआद्यःपुरुषःपुरुषाणामवस्थात्रयवतामाद्यःप्रकृतिस्थतःपुरुषः
कुतस्तुरीयःशुद्धइत्यर्थःतदपिकुतःस्वदृक्स्वप्रकाशज्ञानरूपः॥शुद्धोदेवहिउपाधियोगाज्जीवाजायंते॥यथाग्नेःक्षुद्राविस्फुलिं
गाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेएवात्मानोव्युच्चरंतीतिश्रुतेः॥अतःसजातीयभेदरहितःकिंचाद्वितीयःविजातीयरहितोपि
कुतःहेतुःसर्वस्यतथास्वयंहेतुरहेतुश्चेतिकथंतर्हिप्रतिशरीरंजीवभेदःप्रतीयतेअतआह॥प्रतीयसेइतिसर्वगुणप्रसिद्ध्यैसर्ववि
षयप्रकाशनाय॥२६॥ राम श्रीकृष्णायनमः रामायनमः श्रीरामायनमः परमहंसायनमः॥ श्रीवासुदेवायनमः

तर्हिकिमहमेवसंसारीत्युच्यते नहि नहि सदृष्टांतमाह ॥ यथैवेति ॥ हेप्रभमनः स्वछायया मेघपटलरूपयापरदृष्ट्याछादितः पिहितोपि
सूर्यः ॥ छायांमेघं च रूपाणि च समेघांतरितान् घटादीनपि संचकास्ति प्रकाशयति एवं गुणेनाहंकारेण स्वकार्येणजीवावरकेणतद्दृ
ष्ट्यापिहितोपि गुणान्सत्वादीनुपाधीन् ॥ गुणिनश्च उपहितान् जीवांश्च कास्ति आत्मप्रदीपः स्वप्रकाशः अतः सर्वसाक्षिणस्तवन
संसारइत्यर्थः ॥ ७० ॥ किंच मायया अयस्यान्यान्मोहयतः तवकुतः संसृतिरित्याशयेनाह ॥ यन्माययेति ॥ पुत्रादिषु प्रसक्ता वृजिनार्णवेडुः

यथैवसूर्योपिहितः स्वछायया छायांच रूपाणि च संचकास्ति ॥ एवं गुणेनापिहितोगुणांस्त्वमात्मप्रदीपोगुणि
नश्चभूमन् ॥ ७० ॥ यन्मायया मोहितधियः पुत्रदारगृहादिषु ॥ उन्मज्जंति निमज्जंति प्रसक्ता वृजिनार्णवे ॥ ७१ ॥ देवदत्तमि
मं लब्ध्वा नृलोकमजितेंद्रियः ॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ ७२ ॥ यस्त्वां विसृजते मर्त्य आत्मा
नं प्रियमीश्वरं ॥ विपर्ययेंद्रियार्थार्थे विषमत्त्यमृतं त्यजन् ॥ ७३ ॥ अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः सर्वा
त्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरं ॥ ७४ ॥ राम राम श्रीकृष्णाय राम जप राम श्री रामा

त्वसागरे उन्मज्जंति देवादियोनिषु निमज्जंति स्थावरादिषु ॥ तदुक्तं वायवीये ॥ विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोरिति ॥ ७१ ॥ एवं जी
वेश्वरयोरवस्थानिरूप्येदानीमभजंतं निंदति द्वाभ्यां ॥ देवेति ॥ देवेन त्वया कर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ॥ ७२ ॥ शोच्यत्वे हेतुः
यस्त्वामिति ॥ विपर्ययया विपरीता अनात्मा प्रियाश्च अनीश्वराश्च ये इंद्रियार्थाः ॥ पुत्रादयस्तदर्थे ॥ ७३ ॥ अहमन्ये च शुद्धमनसः त्वामेव भक्ता
इत्याह ॥ अहमिति ७४ ॥ राम ॥ श्री ॥ राम ॥ श्री ॥ राम ॥

भगवतो भजनीयत्वे हेतुत्वं दंतज्ञक्तिं प्रार्थ्यते । समत्वे हेतुः प्रशांतमिति सुहृत्त्वमाह सुहृत् तद्बुद्धिप्रवर्तकत्वात् आत्मा च सर्वात्मकत्वा
त् । एवंभूतं देवमीश्वरं त्वां । न चान्यो भजनीयोऽस्तीत्याह अनन्यमेकं समानासमानजातीयरहितं तत्र हेतुः जगतामात्मनां च केतं निकेतम
धिष्ठानं । ४५ । स्वयं भक्तिरंगस्य स्वभक्तस्याभीष्टमाशास्ते । अयमिति दैत्यपतौ प्रह्लादे । ४६ । व्यवसितं संकल्पः । ४७ । वैरोचनिर्बलिः अवध्य

तं त्वां जगत्स्थित्युदयांतहेतुं समं प्रशांतं सुहृदात्मदैवं । अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवं ॥ ४५ ॥ अ
यं ममेष्टो दयितोऽनुवर्ती मयाभयं दत्तममुष्य देव । संपद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४६ ॥ श्रीभगवा
नुवाच ॥ यदात्थ भगवंस्त्वं नः करवाम प्रियं तव । भवतो यद्व्यवसितं तन्मे साध्वनुमोदितं ॥ ४७ ॥ अवध्योऽयं ममाप्येष वैरोच
निसुतोऽसुरः । प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥ ४८ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया । सूदितं च बलं भू
रि यच्च भारायितं भुवः ॥ ४९ ॥ चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामरः । पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥ ५० ॥
इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः । प्राद्युम्निं रथमारोप्य सवध्वा समुपानयत् ॥ ५१ ॥ अक्षौहिण्या परिवृतं सुवा
सः समलंकृतं । सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५२ ॥ स्वराजधानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्व
रां । विवेश शंखानकदुंदुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५३ ॥ य एवं कृष्णविजयं शंकरेण च संयुगं ॥ संस्मरे
त्प्रातरुत्थाय न तस्य स्यात्पराजयः ॥ ५४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ राम राम ॥

स्तावत् । किंच प्रह्लादायेति । अन्वयो वंशः । ४८ । तर्हि किमित्येवं कृतं तत्राह दर्पोपशमनायेति । ४९ । अजरामरत्वाच्चत्वार इति । ५० । सुहृद्वधानुवया
रुद्रानुमोदित इति । ५२ । तदभिप्रेत्य तस्यैव बाणं ... भगतस्यैव कालात पौरादिभिरभ्युद्यतः अभिमुखमागत्य सत्कृतः । ५३ । ५४ । इति दशमे त्रिषष्टितमोऽध्यायः ॥ ६३

अनिरुद्धानयनं

६ ८

ततः स्पृष्टितमेव कृष्णोद्धृतं शापादमोचयत ॥ ब्रह्मस्वहारिदोषोस्य राज्ञो ऽस्ना न शिक्षयत ॥ विस्मृतिभाग्यभोगादिमदोन्नदमनोरमाः ॥ अत्र शा
स्य प्रहस्त्र कृष्णोद्धृणोद्धारप्रसंगतः ॥ १ ॥ पिपासिताः तृषिता जलं विचिन्वंतः सत्वं जीवितं च ॥ २ ॥ कृकिलासं वीक्ष्य ॥ ३ ॥ चर्ममयैः पाशैः तांतवैः तं
तमयैश्च ॥ ४

श्रीशुक उवाच ॥ एकदोपवनं राजन्जग्मुर्यदुकुमारकाः ॥ विहर्तुं सांबप्रद्युम्नचारुभानुगदादयः ॥ १ ॥ क्रीडित्वा सुचिरं तत्र
विचिन्वंतः पिपासिताः ॥ जलं निरुदके कूपे ददृशुः सत्वमद्भुतं ॥ २ ॥ कृकिलासं गिरिनिभं वीक्ष्य विस्मितचेतसः ॥ तस्य
चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः ॥ ३ ॥ चर्मजैस्तांतवैः पाशैर्बद्ध्वा पतितमर्भकाः ॥ नाशक्नुवन्समुद्धर्तुं कृष्णायाच
ख्युरुत्सुकाः ॥ ४ ॥ तत्रागत्यारविंदाक्षो भगवान्विश्वभावनः ॥ वीक्ष्योज्जहार वामेन तं करेण सलीलया ॥ ५ ॥ स उत्तमश्लो
ककराभिमृष्टो विहाय सद्यः कृकिलासरूपं ॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक ॥ ६ ॥ पप्रच्छ वि
द्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः ॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनं ॥ ७ ॥ दशामिमां वा
कतमेन कर्मणा संप्रापितोस्यतदर्हः सुभद्र ॥ आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं ॥ ८ ॥ श्रीशु
क उवाच ॥ इति स्म राजा संपृष्टः कृष्णेनानंतमूर्तिना ॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा ॥ ९ ॥ नृग उवाच ॥ नृगो नाम न
रेंद्रोहमिक्ष्वाकुतनयः प्रभो ॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशत ॥ १० ॥ श्री श्री राम श्री राम ॥

२

ततं तप्तचामीकरं स्वर्णं तद्वद्वर्णो यस्य सः ॥ अद्भुता अलंकारांबरस्रजो यस्य सः स्वर्गी देवो बभूवेति ॥ ६ ॥ यत् यदि क्षमं योग्यं ॥ ७ ॥ ८ ॥ यदि ते
कर्णमस्पृशमिति ॥ असंदेहे वचनं यदिवेदाः प्रमाणं स्युरितिवत् कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥ १० ॥ रामायकृष्णायनमोनमः ॥ ॥

श्रीभा
१० ३
७७

किंच किंत्विति सर्वेषां भूतानामात्मनो बुद्धेः साक्षिणस्ते अविदितं किंतु न किंचित ॥११।१२।१३। ऋतव्रतेभ्यः सत्याचारेभ्यः तपसाक्रान्ताः श्व
र्व्यापिताश्च ते ब्रह्मणि विदान्या अत्युदाराः ॥ अयाचनशीलाश्च ते संतश्च तेभ्यः ॥१४॥ स्तवं वापी कूपादि चरितं कृतं ॥१५॥ एवं वर्तमानस्य मम
संकटं किंचिदापन्नं श्रुणुत्वित्याह ॥ कस्यचिदिति ॥ द्विजमुख्यस्य प्रतिग्रहनिष्ठस्य संपृक्ता मिलिता ॥ अविदुषा ब्राह्मणस्येयं इति ज्ञानता

किंनु ते विदितं नाथ सर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशो वक्ष्येथापि तवाज्ञया ॥११॥ यावंत्यः सिकता भूमेर्या
वंत्यो दिवि तारकाः ॥ यावंत्यो वर्षधाराश्च तावतीरददं स्म गाः ॥१२॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हे
मशृंगीः ॥ न्यायार्जिता रौप्यखुराः सवत्सा दुकूलमालाभरणा ददावहं ॥१३॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबे
भ्य ऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादं युवभ्यो द्विजपुंगवेभ्यः ॥१४॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः
सदासीस्तिलरौप्यशय्याः ॥ वासांसि रत्नानि परिच्छदान्रथानिष्टं च यज्ञैश्चरितं च पूर्तं ॥१५॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौ
र्मम गोधने ॥ संपृक्ताविदुषा सा च मया दत्ता द्विजातये ॥१६॥ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तं ॥ ममेति प्रतिगृह्या
ह नृगो मे दत्तवानिति ॥१७॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ ॥ भवन्दातापहर्तेति तच्छ्रुत्वा मेभवद्भ्रमः ॥१८॥
अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै ॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां ॥१९॥ भवंतावनुगृह्णीतां किंकर
स्याविजानतः ॥ समुद्धरतं मां कृच्छ्रात्पतंतं निरयेऽशुचौ ॥२०॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् ॥ नान्यद्गवाम

१६। १७। प्रतिग्रहिणोक्तं दोनेति ॥ स्वामिनोक्तं अपहर्तेति ॥ अभवद्भ्रमः व्याकुलोभवमित्यर्थः ॥१८॥ तदा उभावपि प्रत्येकमनुनीतौ प्रार्थितौ
कथं तदाह ॥ गवामिति सार्धेन १९।२०। अपरः प्रतिग्राही ब्राह्मणः यद्यत्स्वलयोक्तमन्यदपि गवामयुतं यदि तदपीमां विहाय नेच्छामि इत्यु
क्त्वा गां त्यक्त्वा ययावित्यर्थः ॥२१

राम
७७

एतस्मिन्नंतरे इति ॥ इतः सर्वपापाभावान्नेतुमसमर्थ इति भावः ॥ २२ ॥ उताहो इत्येकं पदं अथवा सर्वेशुभमिति नांतमिति यमस्य यमस्य स्वस्य
वा वाक्यं पश्येप पश्यामि ॥ २३ ॥ हे देव यम सर्वमशुभं भुंक्ते इति मयोक्ते स्वयमः पतेतिप्राह ॥ २४ ॥ उद्वेदेन श्रीकृष्णसंगेन विस्मितः सन् आत्मनो
भाग्यमभिनंदति ॥ सत्वमिति ॥ हे विभो सत्वं ममाक्षिपथः लोचनगोचरः सन् कथं साक्षात्त्वं सन्नोसीति भाव ः ॥ किमत्राश्चर्यं तदाह परः

एतस्मिन्नंतरे याम्ये हृते नीतो यमस्त्वयं ॥ यमेन दृष्टस्तत्राहं देवदेव नमस्यते ॥ २२ ॥ सर्वं त्वमशुभं भुंक्ष्व उताहो स्वपतेशुभं
नांत दानस्य धर्मस्य पश्ये पल्लोकस्य भास्वतः ॥ २३ ॥ सर्वं देवाशुभं भुंज इति प्राह पतेति सः ॥ तावदद्राक्षमात्मानं कोकि
लाम्पतनं प्रभो ॥ २४ ॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव ॥ स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः ॥ २५ ॥ स
त्वं कथं मम विभो क्षिपथः परात्मा योगीश्वरैः श्रुतिदृशामलहृद्विभाव्यः ॥ साक्षादधोक्षज उरुव्यसनांधबुद्धेः स्यान्
मेनुदृश्यइहयस्य भवापवर्गः ॥ २६ ॥ देवदेव जगन्नाथ गोविंद पुरुषोत्तम ॥ नारायण हृषीकेश पुण्यश्लोकाच्युताव्य
य ॥ २७ ॥ अनुजानीहि मां कृष्ण यातं देव गतिं विभो ॥ यत्र क्वासि सतश्चेतो भूयान्मे त्वत्पदास्पदं ॥ २८ ॥ श्रीकृष्णाय

आत्मा अत एव योगीश्वरैरपि दृशा उपनिषच्चक्षुषा अमले हृदि विभाव्यः ॥ अतो यतोधोक्षजः ॥ अक्षजमैंद्रियकज्ञानं तदधः अतो
गोचरस्तस्मात् ॥ यस्येह भवापवर्गौ भवेतां तस्य भवानुदृश्यः स्यात् ॥ उरुव्यसनेन नष्टा किल आसत्वभवबुद्धिः येनाधबुद्धेस्तु मम एतच्चित्रमित्य
र्थः ॥ २६ ॥ उद्रिक्तभक्तिवद्धुधा संबोधयन्ननुज्ञापयति ॥ अन्विति ॥ अनुजानीहि इति देवलोके वर्तमानस्यात्मनो मनसा सन्निधिं प्रार्थय
ते ॥ यत्र क्वापीति ॥ त्वत्पदमास्पदं विषयो यस्य तथाभूतं भूयादिति ॥ २८ ॥ रामे श्री श्री रामा यश्री कृष्णायनमो नमः

श्रीभा
द ३
७५

यास्य त्वमति ॥ नम इति ॥ सर्वभावाय सर्वस्य भावो जन्म येन तस्मै ब्रह्मणे कर्तृत्वेपि अविकाराय अतः ॥ अनंतशक्तये अनंतमायाख्याश
क्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयायेत्युपादानत्वमुक्तं ॥ श्रीकृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तं ॥ कृषिर्भूवाचकः शब्दो णश्च
निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति स्मृतेः ॥ किंच यो मानानामिष्टापूर्तादिकर्मणां पतये फलदात्रे ॥ अयं भावः एवंभूत
त्वां विहाय गंतुमनिच्छन्नपि यामि प्रारब्धकर्मफलभोगायेति ॥ ३ ॥ ३१ ॥ ३२ ॥ मनाक् ईषदपि भुक्तं सत् अग्नेः अग्निसदृशस्य तेजीयसः

नमस्ते सर्वभावाय ब्रह्मणेऽनंतशक्तये ॥ कृष्णाय वासुदेवाय योमानांपतये नमः ॥ ३ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा तं परिक्र-
म्य पादौ स्पृष्ट्वा स्वमौलिना ॥ अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां ॥ ३१ ॥ कृष्णः परिजनं प्राह भगवान्देवकीसु-
२ तः ॥ ब्रह्मण्यदेवो धर्मात्मा राजन्याननुशिक्षयन् ॥ ३१ ॥ दुर्जरं वत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोपि किमुत राज्ञा- त
मीश्वरमानिनां ॥ ३३ ॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिः क्वचित् ॥ ३४ ॥
हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३५ ॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति
त्रिपूरुषं ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ॥ ३६ ॥ राजानो राजलक्ष्म्यांधा नात्मपातं विचक्षते ॥ निरयं येऽभि-
मन्यंते ब्रह्मस्वं साधु बालिशाः ॥ ३७ ॥

अतितेजस्विनोपि दुर्जरं ३१।३४ किंच विषादपि घोरमित्याह ॥ हिनस्तीति ॥ संसर्गि संसर्गेण मारकत्वादमितव्यत्वस्मात् ॥ तदपि नेत्याह ॥ वह्निरिति ॥ अ-
पि च समूलमिति ॥ वह्निर्हि स्वल्पात्स्व क्षोभयति ॥ ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं तदपि समूलमिति ॥ ३५ ॥ दुरनुज्ञातं यथायथावदन-
नुज्ञातं त्रिपूरुषं कुलं स्वयं पुत्रं पौत्रं च प्रसह्य हृतं । बलात् राजाद्याश्रयतः ३६ ये ब्रह्मस्वमभिमन्यंते इच्छंति ते निरयमेवाभिमन्यंते अतो बालिशाः ब्रा-
ह्मा आत्मपातं न चक्षते इति ॥ ३७ ॥

अपि च शृंहनीति ॥ २५ ॥ ३५ ॥ ४० ॥ दृष्ट्वा श्रीमकास्नायां धातः ॥ ४७ ॥ प्रणमेन मामि ४३ ॥ न केवलमर्थवाद विभीषिकेयं किंतु प्रत्यक्षमित्याह
ब्राह्मणार्थ इति ॥ ४४ ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ पंचषष्टितमे रामः स्वक्रीडां गोकुलमागतः ॥ रम

दुहंति यावतः पांसून् क्रंदतामश्रुबिंदवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ॥ ३८ ॥ राजानो राजकुल्याः
श्च तावतोब्दान्निरंकुशाः ॥ कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ॥ ३९ ॥ स्वदत्तां परदत्तां वा ब्रह्मीं हृतिं हरेच्च यः ॥ षष्टि
वर्षसहस्राणि विष्टायां जायते कृमिः ॥ ४० ॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नराः ॥ पराजिताश्च्युता राज्याद्भवंत्यु
द्वेजिनोहयः ॥ ४१ ॥ विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४२ ॥ यथाहं
प्रणमे विप्राननुकालं समाहितः ॥ तथा नमत यूयं च योन्यथा मे स दंडभाक् ॥ ४३ ॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पा
तयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ ४४ ॥ एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः ॥ पावनः सर्व
लोकानां विवेश निजमंदिरं ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे नृगोपाख्यानं नाम चतुःषष्टितमोऽध्या
यः ॥ ६४ ॥ श्रीशुक उवाच ॥ बलभद्रः कुरुश्रेष्ठ भगवान्रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं ॥ १
परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च ॥ रामोभिवाद्य पितरावाशीर्भिरभिनंदितः ॥ चिरं नः पाहि दाशार्ह सानुजो
जगदीश्वर ॥ इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥ राम श्री राम श्री राम श्री राम ॥

मानद्व गोपीभिः कालिंद्याकर्षणं महान् ॥ रामस्य चरितं चित्रं कालिंद्याकर्षणादियत् ॥ पौंड्रकोन्मादिकस्यस्पष्टथगक्रमतः परं ॥ १ ॥
आशीर्भिरभिनंदितो बभूव ॥ २ ॥ तदाह चिरमिति ॥ ३ ॥ राम राम राम राम श्री श्री राम श्री राम राम ॥

गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैरभिवंदितो बभूवेत्यर्थः ॥ अपिवयथाक्यइति ॥ ४ ॥ तेसर्वेस्वेषुयादवेषुतंराममनामयमारोग्यंपप्रच्छुः
तेचतेनपृष्टाइति ॥ ५ ॥ कृष्णेकमलपत्राक्ष्ये संन्यस्ताखिलराधसः त्यक्तसर्वविषयाः ॥ ६ ॥ ७ ॥ ८ ॥ रामस्यसंदर्शनेनादृताः सादराः ॥ ९ ॥ १० ॥ ११ ॥

गोपवृद्धांश्चविधिवद्यविष्ठैश्चाभिवंदितः ॥ यथावयोयथासख्यंयथासंबंधमात्मनः ॥ ४ ॥ समुपेत्याथगोपाला
हास्यहस्तग्रहादिभिः ॥ विश्रांतंसुखमासीनंपप्रच्छुःपर्युपागताः ॥ ५ ॥ पृष्टाश्चानामयंस्वेषुप्रेमगद्गदयागिरा ॥ कृ
ष्णेकमलपत्राक्षेसंन्यस्ताखिलराधसः ॥ ६ ॥ गोप्यऊचुः ॥ कच्चिन्नोबांधवारामसर्वेकुशलमासते ॥ कच्चित्स्मरथनोरा
मयूयंदारसुतान्विताः ॥ ७ ॥ दिष्ट्याकंसोहतःपापोदिष्ट्यामुक्ताःसुहृज्जनाः ॥ निहत्यनिर्जित्यरिपून्दिष्ट्यादुर्गंस
माश्रिताः ॥ ८ ॥ गोप्योहसंत्यःपप्रच्छूरामसंदर्शनादृताः ॥ कच्चिदास्तेसुखंकृष्णःपुरस्त्रीजनवल्लभः ॥ ९ ॥ कच्चित्स्मरति
वाबंधून्पितरंमातरंचसः ॥ अप्यसौमातरंद्रष्टुंसकृदप्यागमिष्यति ॥ १० ॥ अपिवास्मरतेस्माकमनुसेवांमहाभुजः ॥
११ ॥ मातरंपितरंभ्रातॄन्पतीन्पुत्रान्स्वसॄनपि ॥ यदर्थेजहिमदाशार्हदुस्त्यजान्स्वजनान्प्रभो ॥ १२ ॥ तानःसद्यःपरि
त्यज्यगतःसंछिन्नसौहृदः ॥ कथंनुतादृशंस्त्रीभिर्नश्रद्धीयेतभाषितं ॥ १३ ॥ कथंनुगृह्णंत्यनवस्थितात्मनोवचःकृत
घ्नस्यबुधाःपुरस्त्रियः ॥ गृह्णंतिवैचित्रकथस्यसुंदरस्मितावलोकोच्छ्वसितस्मरातुराः ॥ १४ ॥ राम राम ॥

तर्हितद्वमनेयुष्माभिःप्रतिबंधःकिंनकृतः तद्वाक्यविश्वासादितिचेत्तन्नुविश्वासःकिमितिकृतः तत्राहुः कथंन्विति ॥ १२ ॥ कृतं
बहुलात्नानाविधानिवाक्यानितत्राप्याहुः कथंनुगृह्णंतीतिचित्रकथस्यविचित्रकथाकथनकोविदस्यकिंचसुंदरंस्मितंयस्मिन्नुतेनाव
लोकेनोच्छ्वसितःस्वभितोयःस्मरःतेनातुराः ॥ १३ ॥

म

अपरा ऊचुः॥ किंन इति कालस्तावत्तस्य चास्माकं च यात्येव किं तु तस्य तथैवास्माकं च दुःखेनेत्येतावानेव विशेष इति ध्वनितं १४।१५ ना
नाविधस्यानुनयस्य कोविदः॥१६॥ मधुं चैत्रं माधवं वैशाखं गोपीनां रतिमिति॥ श्रीहलक्रीडासमये समुत्पन्नानामतिबालानां चान्यासामि

किं नस्तत्कथया गोप्यः कथाः कथयतापराः॥ यात्यस्माभिर्विना कालो यदि तस्य तथैव नः॥१४॥ श्रीशुक उवाच
इति प्रहसितं शौरेर्जल्पितं चारुवीक्षितं॥ गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः॥१५॥ संकर्षणस्ताः कृष्णस्य संदेशै
दः हृदयंगमैः॥ सांत्वयामास भगवान्नानानुनयकोविदः॥१६॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च॥ रामः क्ष
पासु भगवान् गोपीनां रतिमावहन्॥१७॥ पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना॥ यमुनोपवने रेमे सेविते स्त्रीग
णैर्वृतः॥१८॥ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात्॥ पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत॥१९॥ तं गंधं मधुधारा
लः याया वायुनोपहृतं बलात॥ आघ्रायोपगतस्तत्र ललनाभिः समं पपौ॥२०॥ उपगीयमानचरितो वनिताभिर्हलायुधः
वनेषु विचरत्क्षीवो मदविह्वललोचनः॥२१॥ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया॥ बिभ्रत्स्मितमुखांभोजं
स्वेदप्रालेयभूषितं॥२२॥ स आजुहाव यमुनां जलक्रीडार्थमीश्वरः॥ निजं वाक्यमनादृत्य मत्त इत्यापगां बलः॥२३
अनागतां हलाग्रेण कुपितो विचकर्ष ह॥२४॥ राम श्री श्री राम राम राम राम श्रीराम

तिथसिद्धिः॥१७॥ पूर्णचंद्रस्य कलाभिर्मरीचिभिर्मृष्टे धौते उज्ज्वले कौमुदीगंधवायुना कुमुद्वतीनां गंधवातेन सेविते॥ यद्वा कौमुदीशब्देन तद्विक
सिता निकुमुदानिलक्ष्यंते कुमुदगंधवायुनेत्यर्थः१८ वारुणी सुधया सहोत्पन्ना मदिरा १९।२० क्षीबो मत्तः २१ स्वेद एव प्रालेयं हिमं तेन भूषितं २२ मत्तोय-
मित्यनादृत्यानागतामापगां नदीं २३।२४

आकृताआहूतायतयस्मान्नागच्छसितेनेच्छेनेष्यामि॥२४॥चकिताकंपिता॥२५॥एकांशेनशेषांशेन॥२६॥२७॥विज्ञगाहइअवगाहनंकृतवान्॥२८॥
आगता आहूतायतयस्मान्नागच्छसि तेनेच्छे नेष्यामि॥२४॥चकिता कंपिता॥२५॥एकांशेन शेषांशेन॥२६॥२७॥विजगाह अवगाहनं कृतवान्॥२८॥
उत्तीर्णायनिर्गतायअसितांबरादीनिकांतिर्ददौकांतिर्लक्ष्मीः॥यथोक्तैवस्त्रैः॥वरुणप्रहितांचास्मैमालामम्लानपंकजां॥समुद्राभेतथा
वक्रिनीलेलक्ष्मीरयच्छतेति॥हारंवधोचबलेप्रतिलक्ष्मीवाक्यं॥ज्ञातदृपमयंचैकंकुंडलवज्रभूषणं॥देवेमांप्रतिशृक्लीअपोशांतीभूषणं

पापेत्वंमामवज्ञाययन्नायासिमयाहूता॥नेष्येत्वांलांगलाग्रेणशतधाकामचारिणीं॥२७॥एवंनिर्भर्त्सिताभीताय
मुनायदुनंदनं॥उवाचचकितावाचंपतितापादयोर्नृप॥२८॥रामरामहाबाहोनजानेतवविक्रमं॥यस्यैकांशेनवि
धृताजगतीजगतःप्रभो॥२९॥परंभावंभगवतोभगवन्मामजानतीं॥मोक्तुमर्हसिविश्वात्मन्प्रपन्नांभक्तवत्सल
॥३०॥ततोव्यमुंचद्यमुनांयाचितोभगवान्बलः॥विजगाहजलंस्त्रीभिःकरेणुभिरिवेभराट्॥३१॥कामंविहृत्यस
लिलादुत्तीर्णायासितांबरे॥भूषणानिमहार्हाणिददौकांतिःशुभांस्रजं॥३२॥वसित्वावाससीनीलेमालामा
मुच्यकांचनीं॥रेजेस्वलंकृतोलिप्तोमाहेंद्रइववारणः॥३३॥अद्यापिदृश्यतेराजन्यमुनाकृष्टवर्त्मना॥बलस्यानंत
वीर्यस्यवीर्यंसूचयतीवहि॥३४॥एवंसर्वानिशायातापकैवरमतोव्रजे॥रामस्याक्षिप्तचित्तस्यमाधुर्यैर्व्रजयोषि
तां॥३५॥इति श्रीभागवते महापुराणे दशमस्कंधे बलदेवविजयेयमुनाकर्षणंनामपंचषष्टितमोऽध्यायः॥६५॥
रामायनमः श्री रामाय श्रीराम जयराम श्रीराम श्रीराम श्रीकृष्णायनमोनमः॥राम॥

क्रियांइत्यादि॥२९॥वसित्वापरिधायआमुच्यकंठेनिधायचंदनादिभिरालिप्तः॥३३॥३४॥एकैवएकैवनिशायथामाधुर्यैर्विलासैः॥३५॥
इतिभागवतेमहापुराणेदशमस्कंधेटीकायांबलदेवविजयेयमुनाकर्षणंनामपंचषष्टितमोऽध्यायः॥६५॥ ॥ राम राम राम॥

॥१ पौंड्रकः

षट्षष्टितमे काशीं हत्वा हैपौंड्रकं हरिः॥ तन्मित्रं च ततो दृप्तं तत्सुदक्षिणवधादिकं॥१॥ प्रस्तोभितः प्रोत्साहितः बालैरज्ञैः॥२॥ बालकृतो नृपः
बालैर्नृपत्वेन क्रीडायां परिकल्पितः॥३॥४॥५॥६॥७॥ हे मूढ उत्स्रक्ष्ये त्वयि वेक्षिष्यामि येः सहत्वमेवं विकत्थसे तैः सह पीत्यर्थः॥ यद्वा येः कृति

श्रीशुक उवाच॥ नंदव्रजं गते रामे करूषाधिपतिर्नृपः॥ वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत॥१॥ त्वं वासुदेवो भ
गवानवतीर्णो जगत्पतिः॥ इति प्रस्तोभितो बालैर्मेने आत्मानमच्युतं॥२॥ दूतं च प्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्म
ने॥ द्वारकायां यथा बालो नृपो बालकृतोऽबुधः॥३॥ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुं॥ कृष्णं कमलपत्राक्षं रा
जसंदेशमब्रवीत॥४॥ वासुदेवोऽवतीर्णोऽहमेक एव न चापरः॥ भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज॥५॥ यानि त्व
मस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं॥६॥ श्रीशुक उवाच॥ कत्थनं तदुपाक
र्ण्य पौंड्रकस्याल्पमेधसः॥ उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा॥७॥ उवाच दूतं भगवान्परिहासकथामनु॥ उत्स्र
क्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे॥८॥ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः॥ शयिष्यसे हतस्तत्र भविता शरणं शु
नां॥९॥ इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत॥ कृष्णोऽपि रथमास्थाय काशीमुपजगाम ह॥१०॥ पौंड्रकोऽपि तदुद्योग
मुपलभ्य महारथः॥ अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतं॥११॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप
अक्षौहिणीभिस्तिसृभिरपश्यत्पौंड्रकं हरिः॥१२॥ राम ॥ राम ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

मेः सुदर्शनादिभिस्त्वमेवं श्लाघसे तानि उत्स्रक्ष्ये त्वामुत्पादयिष्यामीत्यर्थः॥८॥ मांसापणमेहि॥ अस्य पाठान्तरमाह॥ मुखमिति॥ वटाः श्वकाकादिवत्प
निर्विशेषाः तत्र तदा शुनां शरणमाश्रयो भविताऽसि॥९॥ काशीमिति पौंड्रकस्य पितृदामित्रपुरे वस्थानात॥१०।११॥ पार्ष्णिग्राहः पृष्ठतो
रक्षकः॥१२॥

श्रीभा
द० उ०
७८

१२ गारुडः कृत्रिमो ध्वजो यस्य तं ॥ अमूल्यो नर्घः मौलिराभरणं १३।१४।१५। गजस्यंदनादिचतुरंगबलं अर्दितवान् पृथक् प्रजाः चतुर्विधं भू
तग्रामं यथा युगांते अग्निरिति ॥ १७ ॥ आयोधनं रणस्थानं ॥ अरिणा चक्रेण चितं आकीर्णं माक्रीडनमिव कल्पांते महारुद्रस्य क्रीडास्था

शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितं ॥ बिभ्राणं कौस्तुभमणिं वनमालाविभूषितं ॥ १३ ॥ कौशेयवाससी
पीते वसानं गरुडध्वजं ॥ अमूल्यमौल्याभरणं स्फुरन्मकरकुंडलं ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्यवेशं कृत्रिममास्थितं
यथा नटं रंगगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदासिपरिघैः शक्त्यृष्टिप्रासतोमरैः ॥ असिभिः पट्टिशैर्बाणैः प्राह
रन्नरयो हरिं ॥ १६ ॥ कृष्णस्तु तत्पौंड्रककाशिराजयोर्बलं गजस्यंदनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्भृशं य
था युगांते हुतभुक् पृथक्प्रजाः ॥ १७ ॥ आयोधनं तद्रथवाजिकुंजरद्विपत्खरोष्ट्रैररिणावखंडितैः ॥ बभौ चितं मोद
वहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणं ॥ १८ ॥ अथाह पौंड्रकं शौरिर्भो भोः पौंड्रक यद्भवान् ॥ दूतवाक्येन मामाह
तान्यस्त्राण्युत्सृजामि ते ॥ १९ ॥ त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतं ॥ व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगं ॥ २०
इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौंड्रकं ॥ शिरोऽवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः ॥ २१ ॥ तथा काशिपतेः कायाच्छि
र उत्कृत्य पत्रिभिः ॥ न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २२ ॥ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः ॥ द्वा
रकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥ स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबंधनः ॥ बिभ्राणश्च हरे राजन्स्व
रूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतितमालोक्य राजद्वारे सकुंडलं ॥ किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ २५ ॥
राज्ञः काशिपतेर्ज्ञात्वा तदीयाः पुत्रबांधवाः ॥ पौराश्च हा हता राजन्नाथ नाथेति चारुदन् ॥ २६ ॥ श्री रामायनमः

नमिव २०।२१।२२। गिरेः शृंगं यथेति २३।२४।२५ प्रथमं किमिदमिति ॥ पश्चाद्वक्त्रमिति विभाव्य कस्य वेति संशयिरे संशयं कृतवंत इति २५

राम
७८

२६

संस्थाविधिमुत्तरक्रियां अपचितिं निष्कृतिं ॥२७॥ आत्मना बुद्ध्याभिसंधायाधस्य वस्य रुद्रदक्षिणो ऽत्युदारः ॥२८॥ वरमदात इत्याशिषे तदुक्त
वानित्यर्थः ॥२९॥ आर्त्विज्यमिव स्वनियोगकारिणं ॥ यज्ञस्य देवमृत्विजमिति श्रुतेः ॥३०॥ अत्रात्मनः प्रयोजितमिति ऋत्विक्त्वे प्रयोजितो

रुद्रदक्षिणस्तस्य तुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥२७॥ इत्यात्मनाभिसं
धाय सोपाध्यायो महेश्वरं ॥ रुद्रदक्षिणोर्वयामास परमेण समाधिना ॥२८॥ प्रीतो ऽविमुक्ते भगवांस्तस्मै वरमदात्प्र
भुः ॥ पितृहन्तृवधोपायं स वव्रे वरमीप्सितं ॥२९॥ दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजं ॥ अभिचारविधानेन स
चाग्निः प्रमथैर्वृतः ॥३०॥ साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः ॥ इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्व्र
ती ॥३१॥ ततोऽग्निरुत्थितः कुंडान्मूर्तिमानतिभीषणः ॥ तप्तताम्रशिखाश्मश्रुरंगारोद्गारिलोचनः ॥३२॥ दंष्ट्रोग्रभ्रु
कुटीदंडकठोरास्यः स्वजिह्वया ॥ आलिहन्सृक्विणी नग्नो विधुन्वंस्त्रिशिखं ज्वलन् ॥३३॥ पद्भ्यां तालप्रमाणाभ्यां
कंपयन्नवनीतलं ॥ सोऽभ्यधावद्वृतो भूतैर्द्वारकां प्रदहन्दिशः ॥३४॥ तमाभिचारदहनमायांतं द्वारकौकसः ॥ विलो
क्य तत्रसुः सर्वे वनदाहे यथा मृगाः ॥३५॥ अक्षैः सभायां क्रीडंतं भगवंतं भयातुराः ॥ त्राहि त्राहि त्रिलोकेश वह्नेः प्र
दहतः पुरं ॥३६॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं ॥ शरण्यः संप्रहस्याह मा भैष्टेत्यविता स्म्यहं ॥३७॥ राम ॥

कठोरा

६

विपरीतो भविष्यतीति निश्चितं ॥ अभिचारं कुर्वन् व्रती गृहीतनियमः ३१ तप्तं ताम्रमिव शिखा श्मश्रूणि च यस्य सः अंगारोद्गाराणि लोचनानि
यस्य सः ३२ दंष्ट्राभिरुग्रैर्भ्रुकुटीदंडैश्च कठोरं क्रूरमास्यं यस्य सः त्रिशिखं त्रिशूलं ३३ दिशः प्रदहन् ३४।३५ त्राहि त्राहि आह इति शेषः ३६ अहमवि
तास्मि रक्षिष्यामीति ३७

मार्थते २

श्रीभा
द०उ
७२

३७ ॥ रोदसीच प्रकाशयदितिशेषः ॥ यद्वा स्वतेजसा खादीन् अतिजाज्वल्यमानमत्यर्थं प्रकाशमानमित्यर्थः ॥ आर्दयत् अपीडयत् ॥ ३८
अर्दितोग्निर्येन कृत वांस्तदाह ॥ कृत्यानल इति ॥ सरूत्विग्भिर्जनैः सुदक्षिणं अन्यत् ॥ अभिचर्यते ऽनेनेत्यभिचारः ॥ ३९ ॥ अट्टादिसहितां अट्टाः
मञ्चाः ॥ ४०।४१।४२।इति दशमस्कंधे षट्षष्टितमोध्यायः ॥ ६६ ॥ सप्तषष्टितमे रामो गिरौ रैवतके मदात् ॥ स्वैरयुवतिभिः क्रीडन्नवधी

सर्वस्यांतर्बहिः साक्षी कृत्यां माहेश्वरीं विभुः ॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ३७ ॥ तत्सूर्यकोटि
प्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभं ॥ स्वतेजसा खं ककुभोथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमार्दयत् ॥ ३८
कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा स नृप भग्नमुखो निवृत्तः ॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्वि
ग्जनं समदहत्स्वकृतोभिचारः ॥ ३९ ॥ चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणां ॥ सगोपुराट्टाल
ककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालिनीं ॥ ४० ॥ दग्ध्वा वाराणसीं सर्वां विष्णुश्चक्रं सुदर्शनं ॥ भूयः पार्श्वमुपा
तिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥ ४१ ॥ य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमं ॥ समाहितो वा शृणुयात्सर्वपापैः प्रमु
च्यते ॥ ४२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे षट्षष्टितमोध्यायः ॥ ६६ ॥ श्रीराजोवाच ॥ भूयोहं श्रोतुमिच्छामि रा
मस्याद्भुतकर्मणः ॥ अनंतस्याप्रमेयस्य यदन्यत्कृतवान्विभुः ॥ १ ॥ श्रीशुक उवाच नरकस्य सखा कश्चिद्द्विविदो ना
म वानरः ॥ सुग्रीवसचिवः सोथ भ्राता मैंदस्य वीर्यवान् ॥ २ ॥ राम श्री जप राम जप राम श्रीराम

द्द्विविदं बलं कालिंदिदारणानंतरं रामचरितं द्विविधवधादि संगतमप्यनुक्तं तत्सर्वभावित्वेन पौंड्रकवधादिनिरूपणे दानीतमेव प्रस्तौति भूयोहमि
त्यादिना रामचरितश्रवणोत्कंठायामद्भुतकर्मत्वं हेतुः तत्र चानंतत्वं तत्र चाप्रमेयत्वमिति ॥ १ ॥ नरकस्य सखेति हरिणा वैरकारणमुक्तं सुग्रीवसचिव इति
तस्य मंत्रबलं मैंदस्य भ्रातेति रामायणे तस्यान्तप्रसिद्धतेन वीर्याधिक्यमुक्तमिति. २२

सावज्ञैर्नरकस्यापचितिरपचायं पराक्रमस्य विप्लवो नाशो यथा भवति तथा उग्रादीन दहदिति ॥३॥ किंच क्वचदिति कदाचित् सह्याद्रिविधः मित्रहा सवि
हेता ॥४॥ तस्य समुद्रस्य जलं दोर्भ्यां बाहुभ्यामुत्क्षिप्य वेलायाः कूले वर्तमानानामाप्लावयामासेति ॥५॥ आश्रमस्थान्वनस्पतीन्भक्त्वा आहव

साख्युः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं ॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ॥२॥ क्वचित्स शैलानुत्पाट्य तैर्दे
शान्समचूर्णयत् ॥ आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः ॥३॥ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलं देशा
न्नागायुतप्राणो वेलाकूले न्यमज्जयत् ॥५॥ आश्रमानृषिमुख्यानां कृत्वा भग्नवनस्पतीन् ॥ अदूषयच्छकृन्मूत्रैरग्नी
न्वैतानिकान्खलः ॥६॥ पुरुषान्योषितो दृप्तः क्ष्माभृद्द्रोणीगुहासु सः ॥ निक्षिप्य चाप्यधाच्छैलैः पेशस्कारीव कीटकं
७ ॥ एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥८॥ तत्रापश्यद्यदुपतिं रा
मं पुष्करमालिनं ॥ सुदर्शनीयसर्वांगं ललनायूथमध्यगं ॥९॥ गायंतं वारुणीं पीत्वा मदविह्वललोचनं ॥ विभ्राज
मानं वपुषा प्रभिन्नमिव वारणं ॥१०॥ दुष्टः शाखामृगः शाखामारूढः कंपयन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मा
नं संप्रदर्शयन् ॥११॥ तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥१२॥
ता हेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः ॥ दर्शयन्स्वगुदं तासां रामस्य च निरीक्षतः १३ तं ग्राव्णा प्राहरत्क्रुद्धो
बलः प्रहरतां वरः ॥ स वंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥१४॥ राम श्री श्री राम राम ॥

नीयाद्यग्निशुश्रूषादि हुतवान् ॥६॥ अपिधात् पिदधे पेशस्कारी भ्रमरः ॥७। ८। ९। प्रभिन्नं मत्तं ॥१०।११ जात्या स्वभावेनैव चापलं यासां ताः
१२ ॥ हेलयामास अवजज्ञे निरीक्षतः ॥ निरीक्षमाणस्य तमनादृत्येत्यर्थः ॥१३।१४॥ ॥ राम श्री राम राम राम ॥

श्रीभा
द ३
५

आस्फालयन्योषितां वासांसि ॥ आकृष्य पाटितवान् विप्रचक्रे एवमपकृतवान् ॥ १५ ॥ सालं वृक्षं ॥ १७ ॥ सुनंदेन मुसलेन अहनत् अह
न्निर्त्यर्थः तं वानरं ॥ २० ॥ मस्तिष्कं मस्तकावयवविशेषः ॥ गैरिकया लोहितधातुना नानुचिंतयन्नगणयन् १९।२०।२१।२२ अवृक्षं जात

गृहीत्वा हेलयामास धूर्तस्तं कोपयन्हसन् ॥ निर्भिद्य कलशं धृष्टो वासांस्यास्फालयन्बलं ॥ १५ ॥ कदर्थीकृत्य बल
वान्विप्रचक्रे मदोद्धतः ॥ तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् ॥ क्रुद्धो मुसलमादत्त हलं चारिजिघांसया ॥ १६ ॥ द्विवि
दोपि महावीर्यः सालमुद्यम्य पाणिना ॥ अभ्येत्य तरसा तेन बलं मूर्धन्यताडयत् ॥ १७ ॥ तं तु संकर्षणो मूर्ध्नि पतंत
मचलो यथा ॥ प्रतिजग्राह भगवान् सुनंदेनाहनच्च तं ॥ १८ ॥ मुसलाहतमस्तिष्को विरेजे रक्तधारया ॥ गिरिर्यथा गैरिक
या प्रहारं नानुचिंतयन् ॥ १९ ॥ पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाभिनत् २०
ततोन्येन रुषा जघ्ने तं चापि शतधाभिनत् ॥ एवं युध्यन्भगवता भग्ने भग्ने पुनः पुनः ॥ २१ ॥ आकृष्य सर्वतो वृक्षान्निर्वृक्ष
मकरोद्वनं ॥ ततोमुंचच्छिलावर्षं बलस्योपर्यमर्षितः ॥ २२ ॥ तत्सर्वं चूर्णयामास लीलया मुसलायुधः ॥ २३ ॥ स बाहू
तालसंकाशौ मुष्टीकृत्य कपीश्वरः ॥ आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् ॥ २४ ॥ यादवेंद्रोपि तं दोर्भ्यां त्यक्त्वा
मुसललांगले ॥ जत्रावभ्यर्दयत्क्रुद्धः सोपतद्रुधिरं वमन् ॥ २५ ॥ चकंपे तेन पतता सटंकः सवनस्पतिः ॥ पर्वतः कुरु
शार्दूल वायुना नौरिवांभसि ॥ २६ ॥ जयशब्दो नमःशब्दः साधु साध्विति चांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमव
र्षिणां ॥ २७ ॥ एवं निहत्य द्विविदं जगद्व्यतिकरावहं ॥ संस्तूयमानो भगवान्जनैः स्वपुरमाविशत् ॥ २८ ॥ इति द ॥ मे ॥ ष्ट

ताडयामास २३ जत्रौ कंठबाहुसंधौ २४ टंकाः सतोयविवराणि तत्सहितः २५ जगतां व्यतिकरं नाशं आवहतीति तथा २८ इति दशमे सप्तषष्टितमोध्यायः ६७

राम
५

अष्टषष्टितमे सांबे निबद्धे कौरवैर्युधि ॥ तद्विमोक्षाय रामेण नागाह्वयविकर्षणं ॥१॥ रामचरित्रांतरं निरूपयितुमाह ॥ दुर्योधनसुतामिति
समितिंजयः संग्राममजित ॥२।४॥ नोऽस्माकं महीमस्माभिर्दत्तां न ते भुंजत इत्यर्थः ॥३॥ यांति यास्यंति प्राणा इंद्रियाणीव सुसंय

श्रीशुक उवाच ॥ दुर्योधनसुतां राजन्लक्ष्मणां समितिंजयः ॥ स्वयंवरस्थामहरत्सांबो जांबवतीसुतः ॥१॥ कौरवाः
कुपिता ऊचुर्दुर्विनीतोयमर्भकः ॥ कदर्थीकृत्य नः कन्यामकामामहरद्बलात् ॥२॥ बध्नीतेमं दुर्विनीतं किं करिष्यंति
वृष्णयः ॥ येऽस्मत्प्रसादोपचितां दत्तां नो भुंजते महीं ॥३॥ निगृहीतं सुतं श्रुत्वा यद्येष्यंतीह वृष्णयः ॥ भग्नदर्पाः शमं या
ति प्राणा इव सुसंयताः ॥४॥ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः ॥ सांबमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः ॥५॥
दृष्ट्वानुधावतः सांबो धार्तराष्ट्रान्महारथः ॥ प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ॥६॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठति
ष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ॥७॥ सोपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः ॥ नामृष्य
त्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव ॥८॥ विस्फार्य रुचिरं चापं सर्वान्विव्याध सायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युग
पत्पृथक् ॥९॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् ॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥१०॥ तं तु ते विरथं च
क्रुश्चत्वारश्चतुरो हयान् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनं ॥११॥ तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि ॥ कु
मारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥१२॥

ताः प्राणा यामादिभिर्यमिताः ॥४॥ कुरुवृद्धो भीष्मस्तेनानुमोदिता उत्साहिताः ॥५।६॥ कर्णाग्रण्यः कर्णाग्रणीर्येषां ते षडेवेत्यर्थः ॥७॥ अपविद्धस्त्र
स्तः हतः अचिंत्यस्य श्रीभगवतोऽर्भः अचिंत्यश्चासावर्भश्चेति वा ॥ तदेवाह ॥ चतुर्भिरिति ॥ चतुर्भिस्तत्र रथपत्रवीप्सानुसंधेया तत्कर्म ते संमा
नितवंतः ॥८।९।१०।११॥ स्वस्य दुर्योधनस्य कन्यां च ॥१२॥

यतः कलिर्नैच्छत अतः सांत्वयित्वा ॥१७॥ जगामेति ॥१८॥ एतत् राजु प्रतिकूलत्वया अभिप्राय जिज्ञासयेत्यर्थः ॥१९॥ विधिवदभिवंद्य ॥२०॥
तं तु उद्धवमर्चयित्वा सत्कृत्य मंगलपाणयः उपायनहस्ताः ॥२०॥ दृष्ट्वा अपि प्रणेमुः ॥२१॥ यद्यूयमित्युग्रसेनस्य वाक्यं स्वरूपेण सहे ॥ अथाशु

तत्कुलानां विग्रहो नेच्छन्राजन्संजातमन्यवः ॥ उत्क्रुष्ट्वा मधमं चक्रुरुग्रसेनप्रचोदिताः ॥१३॥ सांत्वयित्वा तु तान्रामः सन्न २
द्धान्वृष्णिपुंगवान् ॥ नैच्छत् कुरूणां वृष्णीनां कलिं कलिमलापहः ॥१४॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा ॥
ब्राह्मणैः कुलवृद्धैश्च वृतश्चंद्र इव ग्रहैः ॥१५॥ गत्वा गजाह्वयं रामो बाह्योपवनमाश्रितः ॥ उद्धवं प्रेषयामास धृतरा
ष्ट्रं बुभुत्सया ॥१६॥ सोभिवंद्यांबिकापुत्रं भीष्मं द्रोणं च बाह्लिकं ॥ दुर्योधनं च विधिवद्राममागतमब्रवीत् ॥१७॥ तेति
प्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमं ॥ तमर्चयित्वाभिययुः सर्वे मंगलपाणयः ॥१८॥ तं संगम्य यथान्यायं गामर्घ्यं
च न्यवेदयन् ॥ तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलं ॥१९॥ बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयं ॥ परस्प
रमथो रामो बभाषेविक्लवं वचः ॥२०॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः ॥ तदव्यग्रधियः श्रुत्वा कुरुध्वमा
विलंबितं ॥२१॥ यद्यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकं ॥ अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया ॥२२॥ वीर्यशौ
र्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥२३॥ अहो महच्चित्रमिदं कालगत्या
दुरत्यया ॥ आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितं ॥२४॥ श्री रामायनमः श्रीहंसगोपालायनमः ॥

तमानीय समर्पयेतिशेषः ॥२२॥ वीर्यप्रभावः शौर्यमुत्साहः बलं सत्त्वं तैरुन्नद्धं उद्भृतं बलं कथमात्मनः शक्तेः सममनुरूपं ॥२३॥ राम
उपानत्पादरक्षा शिरआरोढुमिच्छति हीना अस्मान्आज्ञापयतीत्यर्थः ॥२४॥ राम श्री कृ स्ना य नमः श्रीश्रीराम॥ ५१

५१

असैव प्रपंचयतइतिवक्तुर्भिः यो नेनेन स्थायाया विवाहेन ॥ २५ ॥ अस्मडुपेक्षया स्माकमनाग्रहेण ॥ २६ ॥ अलमितिअतः पांतानिअपहरिष्य
मइत्यर्थः ॥ २७ ॥ अवसंधी तस्वीकुर्या डुर्योणोमेघः ॥ २८ ॥ जन्मनाबंधुभिश्चोपलक्षितयाश्रियाउन्नद्धउत्कटोमदोयेषां ते डुर्वीच्यंपकवंवाकंप

पतेयोनेनसंबद्धाः सहशाभ्यामनामनाः ॥ हस्मयः तुल्यतांनीताअस्मद्दत्तरूपासना ॥ २५ ॥ वामरव्यजनेशं वमातप
त्रेचपांडुरं ॥ किरीस्मासनंशय्यांभुंजेत्यस्मडुपेक्षया ॥ २६ ॥ अलंयहत्नानरदेवलांछनैर्दातुः प्रतीपैः फणिनोमिवाच्युते
येनः प्रसादोपचिताहियादवाआज्ञापयेत्यद्यगातत्रपावत ॥ २७ ॥ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अद
त्तेमववंधीतसिंहग्रस्तमिवोरणः ॥ २८ ॥ शुकउवाच ॥ जन्मबंधुश्रियोन्नद्धमदास्तेभरतर्षभ ॥ आश्राव्यरामंडुर्वाच्यमस
भ्याः पुरमाविशन् ॥ २९ ॥ दृष्ट्वा कुरूणांदौःशील्यंश्रुत्वावाच्यानिचाच्युतः ॥ अवोचत्कोपसंरब्धोडुष्प्रेक्ष्यः प्रहसन्मु
हुः ॥ ३० ॥ नूनंनानामदोन्नद्धाः शांतिंनेच्छंत्यसाधवः ॥ तेषांहिप्रशमोदंडः पशूनांलगुडोयथा ॥ ३१ ॥ अहोयदून्सुसंरब्धा
न्कृष्णंचकुपितंशनैः ॥ सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः ॥ ३२ ॥ तइमेमंदमतयः कलहाभिरताः खलाः ॥ तं
मामवज्ञायमुहुर्डुर्भाषान्मानिनोब्रुवन् ॥ ३३ ॥ नोग्रसेनः किलविभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयोलोकपालाय
स्यादेशानुवर्तिनः ॥ ३४ ॥ श्री राम श्रीराम श्री राम श्रीराम श्रीराम जयराम श्रीकृष्ण

असभ्या डुर्जनाः ॥ २९ ॥ नानाधनाभिजनादिमदैरुन्नद्धादंडएवप्रशमः प्रकर्षेणशामयतीतितथायथालगुडोदंडः ॥ ३१ ॥ डुर्भाषान् अवा
च्यानुक्तवान् ॥ ३३ ॥ डुर्भाषणमनुस्मरतिषड्भिः नोग्रसेनइतिविभुः आज्ञापयितुंसमर्थः ॥ ३४ ॥ श्रीकृष्णायनमः श्रीरामायपरमात्मनेनमः

श्रीभा
द टी
५२

अहो दृष्टाः श्रीहस्तमध्यासितुं नृपं तं इति कुपितमाह ॥ सुधर्मेत्यादित्रिभिः ३५ ॥ मौल्युत्तमैर्मौलिषु श्रेष्ठैः उत्तमांगैः उत्तमैर्मौलिभिरिति वा
उपासितानि तीर्थानि यैः तैः तेषामपि तीर्थं यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्य तीर्थत्वनिमित्तं किं च ब्रह्मा भवः श्रीश्चाह

सुधर्माक्रम्यते येन पारिजातोऽमरांघ्रिपः ॥ आनीय भुज्यते सोऽसौ न किलाध्यासनार्हणः ॥ ३५ ॥ यस्य पादयुगं साक्षा
च्छ्रीरुपास्तेऽखिलेश्वरी ॥ स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥ ३६ ॥ यस्यांघ्रिपंकजरजोऽखिललोकपालैर्मौल्यु
त्तमैर्धृतमुपासिततीर्थतीर्थं ॥ ब्रह्मा भवोऽहमपि यस्य कला कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥ ३७ ॥ भुज्यते
कुरुभिर्दत्तं भूखंडं वृष्णयः किल ॥ उपानहः किल वयं स्वयं तु कुरवः शिरः ॥ ३८ ॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानि
नां ॥ असंबद्धा गिरो रुक्षाः कः सहेतानुशासिता ॥ ३९ ॥ अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमु
त्तस्थौ दहन्निव जगत्त्रयं ॥ ४० ॥ लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं ॥ विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥
जलयानमिवाघूर्णं गंगायां नगरं पतत् ॥ आकृष्यमाणमालोक्य कौरवा जातसंभ्रमाः ॥ ४२ ॥ तमेव शरणं जग्मुः
सकुटुंबा जिजीविषवः ॥ सलक्ष्मणं पुरस्कृत्य सांबं प्रांजलयः प्रभुं ॥ ४३ ॥ राम रामाखिलाधार प्रभावं न विदाम ते ॥ मू
ढानां नः कुबुद्धीनां क्षंतुमर्हस्यधीश्वर ॥ ४४ ॥ रामायनमः श्रीकृष्णायनमः नमो भगवते वासुदेवाय

मपि उद्वहेम ॥ कथंभूता वयं यस्य कलायाः अंशस्य कला अंशाः ३७।३९ मत्तानामिव मद्यादिना द्रुप्ताः परुषाः अनुशासिता स्वयं
दंडकारः सन् ३९।४० लांगलाग्रेण दक्षिणतः प्राकारस्थले निर्वर्तितेन तद्विदार्य उत्पाट्य ४१।४२ जिजीविषवः इत्यत्र संधिरार्षः सोढव्यो

७३
७७

राम
५२

४५॥ शेषेशयनं करोषि शेषपर्यंके परिशिष्यमाणो यः स त्वमेवेति वा ॥४६॥ अस्मासु कोपस्त्वया न उचित एव तत्राह ॥ कोपस्त इति स्थितिपा
लनतत्परः तात्पर्यवान्कोपः पापं गते संबोधनं वा ॥४७॥ विश्वकर्मन् कृत्यं यस्य स त्वमिति संबोधनं ॥४८॥ वेपमानमयनं येषां तैः ॥४९॥ न

स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीश क्रीडतस्ते वदंति हि ॥४५॥ त्वमेव मूर्ध्नीदमनंत ली
लया भूमंडलं बिभर्षि सहस्रमूर्धन् ॥ अंते च यः स्वात्मनिरुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ॥४६॥ कोपस्तेऽखि
लशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः ॥४७॥ नमस्ते सर्वभूतात्मन्सर्वशक्तिधरा
व्यय ॥ विश्वकर्मन्नमस्तेऽस्तु त्वां वयं शरणं गताः ॥४८॥ श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः
सुप्रसन्नो मा भैष्टेत्यभयं ददौ ॥४९॥ दुर्योधनः पारिबर्हं कुंजरान्षष्टिहायनान् ॥ ददौ च द्वादशशतान्ययुतानि तुरंगा
मान् ॥५०॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्चसां ॥ दासीनां निष्ककंठीनां सहस्रं दुहितृवत्सलः ॥५१॥ प्रतिगृ
ह्य तु तत्सर्वं भगवान्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः ॥५२॥ ततः प्रविष्टः स्वपुरं हलायुधः
समेत्य बंधूननुरक्तचेतसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ॥५३॥ अद्यापि च पुरं ह्येतत्सूचय
द्रामविक्रमं ॥ समुन्नतं दक्षिणतो गंगायामनुदृश्यते ॥५४॥ एतत्ते कथितं सर्वं रामस्य चरितं महत् ॥ यः पठेच्छृणुयाद्वापि
सर्वपापैः प्रमुच्यते ॥५५॥ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टषष्टितमोऽध्यायः ॥६८॥ राम ॥ राम ॥

सामांशु द्वादशायुतानि ५०।५१ सुहृद्भिः कौरवैः ५२ मध्ये सभायां सभामध्ये ५३ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टषष्टितमोध्यायः
६८

तो

ष्कोनसप्ततितमे गार्हस्थ्यपतिमंदिरं ॥ कृष्णस्य नारदो दृष्ट्वा विस्मितोऽगात्ततः स्तुवन् ॥ १ ॥ दिदृक्षामभिनयेनाह ॥ चित्रमिति द्व्यष्टसह
स्राणीः उदावहत् परिणीतवान् ॥ २ ॥ तां द्वारवतीमनुवर्णयति सार्धत्रयेण पुष्पितेषु उपवनेषु उद्यानेषु च द्विजानामलीनां च कुलानि तै
र्नादितां ॥ ३ ॥ छुरितेषु व्याप्तेषु ॥ ४ ॥ महामरकतैः प्रख्यायंते प्रकाशंते इति तथा तैः स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥ ५ ॥ पत

श्रीशुक उवाच नरकं निहतं श्रुत्वा तथोद्वाहं च योषितां ॥ कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ॥ १ ॥ चित्रं बतैतदेकेन
वपुषा युगपत्पृथक् ॥ गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ २ ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् ॥ पु
ष्पितोपवनारामद्विजालिकुलनादितां ॥ ३ ॥ उत्फुल्लेंदीवरांभोजकल्हारकुमुदोत्पलैः ॥ छुरितेषु सरःसूच्चैः कूजितां
हंससारसैः ॥ ४ ॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ॥ महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥ ५ ॥ विभक्तर
थ्यापथचत्वरापणैः शालासभाभी रुचिरां सुरालयैः ॥ संसिक्तमार्गांगनवीथिदेहलीं पतत्पताकाध्वजवारिता
तपां ॥ ६ ॥ तस्यामंतःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ॥ ७ ॥ तत्र षोडशभिः
सद्मसहस्रैः समलंकृतं ॥ विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ ८ ॥ विष्टब्धं विद्रुमस्तंभैर्वैडूर्यफलकोत्तमैः
इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ॥ ९ ॥ राम राम राम राम राम राम राम

त्यः प्रचलंत्यः पताका येषां तैः ध्वजैर्वारित आतपो यस्यां तां ॥ ६ ॥ ७ ॥ तस्यां सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं षोडशभिः सद्मसहस्रैः सम
लंकृतं हरेरंतःपुरं विवेश तत्र च शौरेः पत्नीनां भवनेषु एकतमं विवेशेत्यन्वयः यत्र कौशलं त्वष्ट्रा दर्शितमित्यंतःपुरभवनयोर्विशेष
णं तदनुवर्णयति चतुर्भिः ॥ विष्टब्धमिति विद्रुमस्तंभैर्विष्टब्धं विधृतं वैडूर्यमयानि फलकोत्तमानि स्तंभाश्रयाणि छादनानि तैः इंद्रनी
लमयैः कुड्यादिभिश्चोपलक्षितं जगत्या भूमिकया इंद्रनीलमय्या अनाहता त्विट् प्रभा यस्याः तया ९

मुक्तादाम्नां विलम्बाः विविधानि लम्बनानि विद्यन्ते येषु तैः माल्योत्तमैः परिष्कृतैर्भूषितैः ॥ १० । ११ ॥ ईदृश समीपस्थघनो मे चोयमिति बुद्धिर्येषां ते
१२ ॥ अनुसवं सर्वकाले आत्मना समानानि गुणरूपवयांसि सुवेषोऽलंकारश्च यस्यास्तेन दासीसहस्रयुतया गृहिण्या सह ॥ १३ ॥ श्रियः कान्ता
याः पर्यंकतः अवीविशत् उपवेशयामास ॥ १४ ॥ अबिभ्रत् आ अभितो दधारेत्यर्थः बिभ्रदिति शत्रन्तं वा ॥ तदा सं स्नपाभिलाषवशाद्धेतु

॥ विमानैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्माल्योत्तमपरिष्कृतैः ॥ १० ॥ दासीभिर्निष्ककंठीभिः सु
वासोभिरलंकृते ॥ पुंभिः सकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ॥ ११ ॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवल
भीषु शिखंडिनोंग ॥ नृत्यंति यत्र विहितागुरुधूपमक्षैर्निर्यांतमीक्ष्य घनबुद्धय उन्नदंतः ॥ १२ ॥ तस्मिन्समानगुणरूपवयः
सुवेशदासीसहस्रयुतयानुसवं गृहिण्या ॥ विप्रो ददर्श चमरव्यजनेन रुक्मदंडेन सात्वतपतिं परिवीजयंत्या ॥ १३ ॥ तं सं
निरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतां वरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांज
लिरवीविशदासने स्वे ॥ १४ ॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना बिभ्रज्जगद्गुरुतमोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति
यद्गुणनामयुक्तं तस्यैव यच्चरणशौचमशेषतीर्थं ॥ १५ ॥ संपूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो वि
धिनोदितेन ॥ वाण्याभिभाष्य मितयामृतमिष्टया तं प्राह प्रभो भगवते करवाम किं ते ॥ १६ ॥ ॥ श्री ॥

तेषामन्वयः ॥ कथंभूतो यस्य चरणशौचं गंगाख्यं अशेषतीर्थं सः ॥ अत एव जगद्गुरुतमोपि सतां धर्मभृतां पतित्वादेवमकरोदित्यर्थः ॥ सतां प
तित्वे हेतुः ब्रह्मण्यदेव इति यत् गुणकृतं नाम तस्यैव यतो युक्तं सम्यक् सन्नमन् तत्तद्धर्मप्रवर्तमानानां येषामाचरणमित्यर्थः १५ अभिभाष्य दिष्टमात्र
दागमनमित्यादि श्रियमुक्ता ॥ १६ ॥

श्रीभगवता स्वस्यानर्हणमनर्हं मन्यमानस्तत्संभावयन्नाह ॥ नैवेति ॥ सर्वमित्रत्वादेव ममार्हणं न तु ममगोरवात् तर्हि कथं सादि
ष्वमैत्री तत्राह खलानां दमश्च नैवाद्भुतमिति कुतो जगतः स्थितिर्धारणं पालनं च ताभ्यां सह निःश्रेयसाय तवायं स्वेच्छावतार इ
ति वयं सम्यक् विद्मः ॥ अतः खलदमः साधुसंमाननं च युक्तमिति भावः ॥१७॥ यदुक्तं प्रभो किं करवामेति तत्राह ॥ दृष्टमिति ॥ भक्तजन

श्रीनारद उवाच ॥ नैवाद्भुतं किल विभो खिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानां ॥ निःश्रेयसाय हि ज
गतस्थितिरक्षणाभ्यां स्वैरावतार उरुगाय विदाम सम्यक् ॥१७॥ दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृ
दि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥१८॥ ततोन्य
दाविशद्गेहं कृष्णपत्न्याः स नारदः ॥ योगेश्वरेश्वरस्यांग योगमायाविवित्सया ॥१९॥ दीव्यंतमक्षैस्तत्रापि प्रियया
चोद्धवेन च ॥ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥२०॥ पृष्टश्चाविदुषेवासौ कदायातो भवानिति ॥ क्रिय
ते किं नु पूर्णानामपूर्णैरस्मदादिभिः ॥२१॥ अथापि ब्रूहि नो ब्रह्मन्जन्मैतच्छोभनं कुरु ॥ स तु विस्मित उत्थाय तूष्णी
मन्यदगाद्गृहं ॥२२॥ तत्राप्यचष्ट गोविंदं लालयंतं सुताञ्छिशून् ॥ ततोन्यस्मिन्गृहेऽपश्यन्मज्जनाय कृतोद्य
मं ॥२३॥ ॥

तायाः अपवर्गदं पुंसः किं च अतिदुर्लभतया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं किं च संसारकूपे पतितानां मुत्तरणावलंबमाश्र
यभूतं एवंभूतं तवांघ्रियुगलं मया दृष्टं अतः कृतकृत्योस्मि तथापि तव स्मरतिर्यथा स्यात् तथानुगृहाण ॥ ततस्तद्ध्यायन्ने
व नित्यं चरामीति ॥१८।१९॥ अक्षैर्दीव्यंतमित्यादौ च ददर्शेति ज्ञातव्यं २०।२१।२२।२३। राम श्री राम राम ॥

मी

विताना ग्नीनाहवनीयादीनग्निहोत्रेण पंचभिर्महायज्ञैर्यजंतं ॥ २४।२५।२६। २७। २८।२९।३०।३१।३२। कालेतत्समये विधिनाउपयायनंश यांणविवाहमित्यर्थः ॥ कल्पयंतं घटयंतं विभूतिभिर्विभवैः ॥ २२ ॥ स्थापनं दुहितृजामात्रादीनां स्वगृहान्गृहं हषात्तिनयंतं तन्महा

गृहं तंचवितानाग्नीन्यजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान्कापि भुंजानमवशेषितं ॥ २४ ॥ कापि संध्यामुपासीनं जपंतं ब्रह्मवाग्यतं ॥ एकत्र चासि चर्मभ्यां चरंतमपिवर्त्मसु ॥ २५ ॥ अश्वैर्गजैरथैः कापि विचरंतं गदाग्रजं ॥ कचिच्छय्या ने पर्यंके स्तूयमानं च वंदिभिः ॥ २६ ॥ मंत्रयंतं च कस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः ॥ जलक्रीडारतं कापि वारमु ख्या बलाहृतं ॥ २७ ॥ कुत्रचिद्दिजमुख्येभ्यो ददतं गाः स्वलंकृताः ॥ इतिहासपुराणानि शृण्वंतं मंगलानि च ॥ २८ ॥ हसंतं हास्यकथया कयाचित्प्रियया गृहे ॥ कापि धर्मं सेवमानमर्थकामौ च कुत्रचित ॥ २९ ॥ ध्यायंतमेकमात्मा नं पुरुषं प्रकृतेः परं ॥ शुश्रूषंतं गुरून्कापि कामैर्भोगैः सपर्यया ॥ ३० ॥ कुर्वंतं विग्रहं कैश्चित्संधिं चान्यत्र केशवं ॥ कुत्रापि सहरामेण चिंतयंतं सतां शिवं ॥ ३१ ॥ पुत्राणां दुहितॄणां च काले विध्युपयापनं ॥ दारैर्वरैस्तत्सदृशैः कल्पयं तं विभूतिभिः ॥ ३२ ॥ प्रस्थापनोपनयनैरपत्यानां महोत्सवैः ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ ३३ यजंतं सकलान्देवान्कापि क्रतुभिरूर्जितैः ॥ पूर्तयंतं कचित्कूपारामालयादिभिः ॥ ३४ ॥ चरंतं मृगयां कापि हयमारुह्य सैंधवं ॥ घ्नंतं ततः पशून्मेध्यान्परीतं यदुपुंगवैः ॥ ३५ ॥ अव्यक्तलिंगं प्रकृतिष्वंतःपुरगृहादिषु ॥ कापि चरंतं योगेशं तत्तद्भावबुभुत्सया ॥ ३६ ॥ अथोवाच हृषीकेशं नारदः प्रहसन्निव ॥ योगमायोदयं वीक्ष्य मानुषीमी

मुनरानयनं तैर्महोत्सवान्कल्पयंतं योगेश्वरेशस्य येषामपत्यानां महोत्सवान्वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुः तथाभूतान्कल्प यंतं ३४।३५।३६। अव्यक्तलिंगं वेषांतरेण कृत्वेत्यर्थः ॥

हे योगेश्वर आत्मन् आत्मनि मम मनसि तव स्वरूपेण वा निर्भाताः प्रतीतास्तव योगमायाः केवलं विदाम विस्मृतं न त्वत्परमार्थमिति भावः
३९ ॥ त्वन्मानुष्यनाट्येन मुह्यामि अतो मां प्रस्थापयेत्याह ॥ अनुजानीहीति ॥ ४० ॥ तत्तस्माल्लोकं शिक्षयन्निमं धर्ममास्थितः ॥ नतु तत्त्वतः
अतः हे पुत्र माखिदः मोहं माप्राप्नुहीति ॥ ४१ ॥ एवमनुगृहीतस्तमेकमेव संतं ददर्शेति ॥ ४२ ॥ मुहुर्दृष्ट्वा जातकौतुकोऽतःकौतुकनिर्विस्मितोऽभू

विदाम योगमायास्ते दुर्धर्षा अपि योगिनां ॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ॥ ३९ ॥ अनुजानीहि मां देव
लोकांस्ते यशसाप्लुतान् ॥ पर्यटामि तवोद्गायन्लीला भुवनपावनीः ॥ ४० ॥ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्य वक्ता
हं कर्ता तदनुमोदिता ॥ तच्छिक्षयन्लोकमिममास्थितः पुत्र माखिदः ॥ ४१ ॥ श्रीशुक उवाच ॥ इत्याचरन्तं तद्धर्मान्पाव
नान्गृहमेधिनां ॥ तमेव सर्वगेहेषु संतमेकं ददर्श ह ॥ ४२ ॥ कृष्णस्यानन्तवीर्यस्य योगमायामहोदयं ॥ मुहुर्दृष्ट्वा ऋ
षिरभूद्विस्मितो जातकौतुकः ॥ ४३ ॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना ॥ सम्यक्सभाजितः प्रीतस्तमेवा
नुस्मरन्ययौ ॥ ४४ ॥ एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेंग षोडशसहस्र
वरांगनानां सव्रीडसौहृदनिरीक्षणहाससजुष्टः ॥ ४४ ॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविष
याणि हरिश्चकार ॥ यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥ ४५ ॥ इति श्रीभागव
ते महापुराणे दशमस्कंधे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ राम श्री रामा यनमः श्रीरामायनमः

दिति ॥ ४३ ॥ श्रद्धितः श्रद्धायुक्तः आत्मा यस्य तेन ॥ ४४ ॥ नाट्यदृष्टांतं श्रीकृष्णलीलां निगमयति ॥ एवमिति ॥ अखिलस्य भवाय उद्भवाय गृही
ताः शक्तयो नानामूर्तयो येन सः ॥ सव्रीडं च ताः सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः ॥ ४४ ॥ अनन्यविषयाणि असाधारणानि अ
पवर्गमार्गे मोक्षपदे ॥ ४५ ॥ इति एकोनसप्ततितमोऽध्यायः ॥ ६९

ततस्तु सप्ततितमे कृष्णस्याह्निककर्मणि ॥ हृतनारदयोः कार्ये मंत्रस्यापि विचारणं ॥ १ ॥ जगन्मंगलचारित्रमाह्निकं जगदीशितुः
नारदेन कृतं किंचित् चिह्नमाह यथाक्रमं ॥ २ ॥ इत्यर्थधर्मकामेषु कृष्णेन अधिष्ठितात्मनेति वक्ष्यत स्य श्रीकृष्णस्याह्निकस्याधिका
रे य शाहुः ॥ उषस्युपवृत्तायामासन्नायां पतिभिः श्रीकृष्णैर्माधव्यो माधवस्य भार्याः ॥ १ ॥ वंदिन इव श्रीकृष्णं बोधयंतीव वयांसि पक्षिणः
अरोरुवन् ॥ अतिशयेनाकूजन् मंदारवनवायुभिः गायत्स्वलिषु अनिद्राणि वयांसि ॥ २ ॥ वैदर्भी तु पतिलक्षणं परिरंभणविश्लेषा

श्रीशुक उवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान् कूजतोऽशपन् ॥ गृहीतकंठ्यः पतिभिर्माधव्यो विरहातुराः ॥ १ ॥
वयांस्यरोरुवन् कृष्णं बोधयंतीव वंदिनः ॥ गायत्स्वलिष्वनिद्राणि मंदारवनवायुभिः ॥ २ ॥ मुहूर्तं तं तु वैदर्भी
नामृष्यदतिशोभनं ॥ परिरंभणविश्लेषात् प्रियबाह्वंतरं गता ॥ ३ ॥ ब्राह्मे मुहूर्ते उत्थाय वार्युपस्पृश्य माधवः ॥
दध्यौ प्रसन्नकरण आत्मानं तमसः परं ॥ ४ ॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं ॥ ब्र
ह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिं ॥ ५ ॥ अथाप्लुतोंऽभस्यमले यथाविधि क्रियाकला
पं परिधाय वाससी ॥ चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥ ६ ॥ उपस्थायार्कमुद्यंतं त
र्पयित्वात्मनः कलाः ॥ देवान् ऋषीन् पितॄन् वृद्धान् विप्रानभ्यर्च्य चात्मवान् ॥ ७ ॥ राम राम ॥ श्री कृ सा ॥

तं पर्यालोचयत् ॥ ४ ॥ एकमखंडं हेतुः अनन्यं निरुपाधिं अत एवमव्ययं स्वयंज्योतिः कुतः हेतोः नित्यनिरस्तं कल्मषं अविद्या यस्मात्तं ॥ उपलक्षण
माह ॥ अस्येति ॥ अस्य विश्वस्य लक्षितभावस्थासौ निर्वृतिश्च भावः सत्ता निर्वृतिरानंदः तथा लक्षणं सो भात् सर्वं सन्नामत्रयः सदेव सोम्येद
मग्र आसीदित्यादिश्रुतेः सत्यानंदं ब्रह्म विज्ञानमानंदमिति श्रुतेः सत्यं सदानंदमित्यर्थः ॥ ५ ॥ आप्लुतः स्नातः संध्याया उपगमम् उपासनं आ
दिर्यस्य अभवत् तत्तथा क्रियाकलापं पंचकारकार्यत्वा उदयात्पूर्वमेव हुतानलः ब्रह्म गायत्रीं जजाप ॥ ६ ॥ कला अंशान् देवान् ऋषीन् पितॄन्

कृष्णक्रिया ६७

श्रीभा
द० उ
५६

गृष्टीनां प्रथमप्रसूतानां ॥ ७ ॥ बद्वमिति हि रूपेण परिष्कृतान् शुक्लदतो हगानुमस्तारे भरतो ददौ कृतं बद्वानि सप्त चेति आत्मकानि सप्तो
न्नरशतं बद्वाख्यैकीकृत्य प्रत्येकं चतुर्दश लक्षसंख्येन गणितानि यथोक्तं भारतमेवाधिकृत्य पत्न्यमस्कंधे हगानुशुक्लदतः कृष्णानश्ववर्णा
नपरिष्कृतान् ॥ अदात्कर्मणि मष्णोरे निष्युतानि चतुर्दशेति ॥ ततश्चैवं बद्धसंख्या श्लोकेन संगृह्यते ॥ चतुर्दशानां लक्षाणां सप्ताधिकशता
शकः ॥ बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदशेति दिने दिने चेति प्रतिसंग्रहं चेति ॥ ५ ॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि

धेनूनां रुक्मशृंगीणां साधीनां मौक्तिकस्रजां ॥ पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ॥ ७ ॥ ददौ रूप्यखुराग्राणां
क्षौमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ॥ ५ ॥ गोविप्रदेवतावृद्धगुरून्भूतानि सर्वशः नम
स्कृत्यात्मसंभूतीर्मंगलानि समस्पृशत ॥ ९ ॥ आत्मानं भूषयामास नरलोकविभूषणं ॥ वासोभिर्भूषणैः स्वीये
र्दिव्यस्रगनुलेपनैः ॥ १० ॥ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरांतःपुरचारिणां ॥ ११
प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत ॥ संविभज्याग्रतो विप्रान् स्रक्तांबूलानुलेपनैः ॥ १२ ॥ सुहृदः प्रकृतीर्दारानु
पायुंक्त ततः स्वयं ॥ तावत्सूत उपानीय स्यंदनं परमाद्भुतं ॥ १३ ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोग्रतः ॥ गृहीत्वा
पाणिना पाणिं सारथेस्तमथारुहत ॥ १४ ॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १४ ॥ ईक्षितोंतःपुरस्त्रीणां
सव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः ॥ १५ ॥ राम श्री राम श्री श्री श्रीकृष्ण

नरलोकविभूषणं रूपमात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः ॥ १० ॥ कामानभिलषितानर्थान् ॥ ११ ॥ विप्रादीन् स्रगादिभिः संविभ
ज्य तेभ्यस्तानि दत्वा इत्यर्थः ॥ १२ ॥ उपायुंक्त भोगार्थमगृहीत ॥ १३ ॥ पाणीकृतेनसलो गृहीत्वा ॥ १४ ॥ सव्रीडप्रेमवीक्षितैरीक्षितः स्त्रीणां
प्रस्थितः ताभिरेव वीक्षितः कृच्छ्राद्विसृष्टो निरगादिति ॥ १५ ॥ राम श्री जय जय राम राम श्रीकृष्णायनमोनमः

राम
५६

एवंसर्वगृहेभ्यः पृथक्पृथक्कनिर्गत्यानंतरं एकएवसन्नुस्वधर्मांशप्रविशत् यन्निविष्टानांयत्रनिविष्टानां ॥१६॥ नृसिंहेः पृथुश्रेष्ठैः ॥१७॥ नृपमं
त्रिणः परिहासकाः पृथक्पृथक्स्वस्वसमुदायैः ॥१८॥ सूतदेशाद्यः प्रसिद्धाः दरः शांवः सूतादयस्तथैव ॥ सूताः पौराणिकाः प्रो
क्ताः मागधावंशशंसकाः ॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥१९॥ ब्राह्मणाः ब्रह्मवेदमाङ्गः मंत्राल्याचक्षतेत्यर्थः वादिनः

स्वधर्मात्वांसभांसर्वैर्दृष्टिभिः परिवारितः ॥ प्रविश्ययन्निविष्टानांनसंत्पराषड्ढसंयः ॥२६॥ तत्रोपविष्टः परमास
नेविभुर्वभौस्वभासाकभाभौवभासयन् ॥ सूतोदृष्मिहेर्यडुभिर्यदुत्तमोयथोडुराजोदिविताककाननो ॥२७॥ ततो ७१
पमंत्रिणोराजन्नानाहास्यरसैर्विभुं ॥ उपतस्थुर्नटाचार्यानर्तकास्तांडवैः पृथक् ॥२८॥ सूतदेवेणाम्भजवेणुताल
दास्वनैः ॥ नटनृत्ततंतुतरस्तुष्टुवुस्तत्तमागधवंदिनः ॥२९॥ तत्रस्थाब्राह्मणाः केचिदासीनाब्रह्मवादिनः ॥ सर्वेषां
मुपण्ययशासा राज्ञांचाकथयन्कथाः ॥३०॥ तत्रैकः प्रकृतेराजन्नारातोप्रवेदर्शनः ॥ विज्ञापितोभगवतेप्रतीहारैः प्र
वेशितः ॥३१॥ सनमस्कृत्यकृष्णायपरेशायकृतांजलिः ॥ राज्ञामावेदयद्दुःखंजरासंधनिरोधजं ॥३२॥ येचदिग्वि
जयेतस्यसन्नतिंनययुर्नृपाः ॥ प्रसह्यरुद्धास्तेनासन्नयुतेद्वेगिरिव्रजे ॥३३॥ कृष्णकृष्णाप्रमेयात्मन्प्रपन्नभयभंज
न ॥ वयंत्वांशरणंयामोभवभीताः पृथग्धियः ॥३४॥ श्री राम जप राम श्रीरामायकृष्णायनमः

वादनचतुराः ॥३१॥ गिरिव्रजेतत्संज्ञकेदुर्गेनिरुद्धाआसन्नतेषांचदूतः एवमावेदयन्नित्यन्वयः ॥३३॥ श्रीकृष्णकृष्णेतिषड्श्लोकीराज्ञां
विज्ञप्तिः ॥ तत्रप्रथमेनशरणागत्यांत्रिभिर्भयानुवादः द्वाभ्यांप्रार्थनमिति ॥३४॥ राम जप राम श्रीराम श्रीकृष्णायनमः

पृथग्दर्शिनो लोकस्य भवभयं विहायैव तो नमस्यंति ॥ ३ ॥ लोक इति ॥ विकर्मणि निषिद्धे काम्ये च तस्मिन्निरतः निरतरां रतः स्वेक्षुशले धर्मे भवतो र्चनेत्यया उदितेउक्ते पंचरात्रे सामान्यतश्च गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ॥ प्रमत्तो नवहितो यावदयं लोकः तावदेवास्य लोकस्य यः सद्यो जीविताशां छिनत्ति तस्मै ते तुभ्यमनिमिषाय कालात्मने नम इति ॥ ४५ ॥ सेयं लोकस्य गतिः वयं तत्रस्थाः ॥ अतोस्माकं जातमेतद्दुःखमापन्नमित्याशयेनाहुः ॥ लोक इति ॥ भो ईश त्वद्गतनेश्वरे

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यः छिनत्त्यनिमिषाय नमोस्तु तस्मै ॥ ४५ ॥ लोकेश्वरा ब्रह्मादिनः कल्पायुषः तीर्णाः सद्भस्तरणाय बलेन निग्रहणाय च वा न्यः कश्चित्त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृतमुक्तकृति तन्न विद्मः ॥ ४६ ॥ स्वप्नायितं तत्परतंत्रमीशाशश्वद्भयेन मृतकेन धुरं वहामः ॥ हित्वा तदात्मनि स्वत्त्वं तदनीहलभ्यं क्लिश्यामहे तिक्रपणास्तव माययेह ॥ ४७

त्वयि सद्भस्तरणार्थमवतीर्णोपि चेदस्माकं दुःखेन समर्थं स्यात् तर्हि किमन्यः कश्चिद्ब्रह्मादिस्त्वदाज्ञामतिलंघयेदिति किं च त्वया रक्ष्यमाणोपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विद्मः ॥ न च तद्भयमपि युक्तमिति भावः ॥ ४६ ॥ किं दुःखं तेतदाहुः स्वप्नायितमिति स्वप्नवज्ज्ञातं स्वप्नवदेव यतः परतंत्रं विषयसाध्यं ॥ किंच ॥ सर्वतिशश्वद्भयं यस्मिंस्तेन मृततुल्येन शरीरेण धुरं पुत्रदारादिपुक्तकांराज्यचिंतां केवलं वहामः अहो कष्टं नः केवयमिति सर्वमेव निष्कामाः संतः त्वां नाश्रिता इत्याहुः हित्वेति त्वत्तः अनीहैः निष्कामैर्लभ्यमात्मनि स्वतः सिद्धं स्वं तद्धित्वा क्लिश्यामहे क्लिश्यामः ॥ ४७ ॥ श्री रामा यनमः श्रीरामभद्रायनमोनमः श्रीकृष्णायनमः ॥ ॥

त्वन्मायाकृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयंते तन्न इति ।। विमुंक्ष्व विमोचय मगधो जरासंधः तत्संज्ञकालकर्मपाशात् भवस्त्वेव विक्रम्य
निर्गमयतामिति चेत्तत्राह ।। य इति ।। य एवायुतमतंगजानां वीर्यं बिभ्रत् स्वभवने भूभुजोऽस्मान् रुरोध सिंहो मेषीरिव ।।२८।। किंच युष्मदी
यावयमित्यस्मात् अधिकं बाधत इत्याह ।। यो वा इति ।। हे उदात्तचक्र उद्यतसुदर्शन यो वै द्विनवकृत्वः अष्टादशवारान् त्वया सह मृधे व

तन्नो भवान्प्रणतशोकहरांघ्रियुग्मो बंधान्वियुंक्ष्व मगधाह्वयकर्मपाशात् ।। यो भूभुजोऽयुतमतंगजवीर्यमेको बि
भ्रद्रुरोध भवने मृगराडिवावीः ।।२९।। यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यं ।। जित्वा नृलो
कनिरतं सकृदूढदर्पो युष्मत्प्रजा रुजति नोऽजित तद्विधेहि ।।३०।। इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ।। प्रपन्नाः
पादमूलं ते दीनानां शं विधीयतां ।।३१।। राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ।। बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथार
विः ।।३२।। तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ।। ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ।।३३।। सभाजयित्वा वि
धिवत्कृतासनपरिग्रहं ।। बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं ।।३४।। अपि स्विदद्य लोकानां त्रयाणामकुतोभ
यं ।। ननु भूयान्भगवतो लोकान्पर्यटतो गुणः ।।३५।। नहि तेऽविदितं किंचिल्लोकेष्वीश्वरकर्तृषु ।। अथ पृच्छामहे युष्मान्पां
डवानां चिकीर्षितं ।।३६।।

तेमानेतत्र सप्तदशकृत्वः त्वया स्वयं भग्नः पराजितः पश्चादनंतवीर्यमपि नृलोके निरतं नृशरीरविनोदं भगवंतं सकृज्जित्वा ऊढदर्पः प्राप्तग
र्वः युष्मत्प्रजानः रुजति पीडयति तत् ।। तत्र यद्युक्तं तद्विधेहीत्यर्थः ।।३०।। दूत आह इतीति ।।३१।।३२।।३३।।३४।। भूयान्महान्गुणो लाभो यस्म
स्मात् यतस्त्वं सर्वलोकदृष्टांतं ज्ञातमिति ।।३५।। ईश्वरः कर्ता येषां तेषु ।।३६।। ।। राम श्री कृष्णाय नमः श्री रामाय नमः

एवमविदुषेव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं दृष्ट्वा नारदो मायेयमिति ज्ञात्वाह ॥ दृष्टा इति त्रिभिः ॥ विश्वसृजश्च ब्रह्मणो
पि मायिनो मोहकस्य ते ॥ स्वशक्तिभिर्विद्यादिभिर्भूतेष्वंतर्यामितया चरतो वर्तमानस्य यद्यहं भूतेषु वर्ते तर्हि भूतानि मां किं न पश्यंति
तत्राह वह्नेरिव छन्नरुच इति स्वशक्तिभिरेव छन्ना रुक् प्रकाशो यस्य तस्य अतस्तदेवं प्रज्ञादि न मे ऽद्भुतं ॥ ३६ ॥ इदं जगत्कथंभूतं असदेव य
त्वमायया विद्यमानात्मतयाऽवभासते तेन जगत् स्रजतः किं तु केवलं ते तु नमनमेव शक्यमित्याह तस्मै नम इति ॥ ३७ ॥ यतः स्वेन द

श्रीनारद उवाच ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्व
ह्नेरिव छन्नरुचो न मेऽद्भुतं ॥ ३६ ॥ तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयाव
भासते तस्मै नमस्ते स्वविलक्षणात्मने ॥ ३७ ॥ जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः ॥ लीला
वतारैः स्वयशः प्रदीपकं प्राज्वालयत्त्वां तमहं प्रपद्ये ॥ ३८ ॥ अथाप्याश्रावये ब्रह्मन्नरलोकविडंबनं ॥ राज्ञः पैतृष्वस्रे
यस्य भक्तस्य च चिकीर्षितं ॥ ३९ ॥ यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोद
तां ॥ ४० ॥

येन सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः ॥ ३७ ॥ नन्वेवंभूतस्य किं मायाचेष्टितैरित्यत आह ॥ जीवस्येति अविद्यातमसाऽऽवृतत्वेन अन
र्थप्रापकाच्छरीरात्संसरतः तेनैव तमसा तस्माच्छरीराद्विमोक्षोपायमजानतः प्रज्वालयत्संदीपितवान् त्वं तत्त्वां यशः श्रवणादिभिः जी
वस्य मोक्षार्थमित्यर्थः ॥ ३८ ॥ आश्रावये आश्रावयिष्यामि नरलोकविडंबनं ब्रह्मन्त्वां ब्रह्मन्निति पाठे हे ब्रह्मन् परमात्मन् नरलोकानुकारिणं
त्वां श्रावयिष्यामीति ३९।४०

२

राम
५८

नैवबाधानुमोदनं कार्यं किंतु तत्रागंतव्यं इत्याशयेनाह ॥ तस्मिन्निति ॥४१॥ तत्रागतास्तु सर्वे त्वद्दर्शनादिना कृता भविष्यंतीत्याह ॥ श्रवणा
दिति अंतेवसायिनः श्वपचा अपि ब्रह्ममयस्य ब्रह्मघनस्य ते इत्याह ॥ अभिमर्षणं स्पर्शनं च ते विद्यते येषां ते ॥ केन्तु त्वाशयेनाह ॥ यस्ये
ति ॥ हे भुवनानां मंगल रूप दिवि पाताले भूमौ च प्रथितं यस्य यशो विश्वं पुनाति कथं प्रथितं दिग्वितानं वितानवदलंकारणं तथा च ते चरणा
म्बु च प्रथितं पुनाति कथं तत्र प्रथितं दिवि मंदाकिनीति ॥ अधश्च भोगवतीति इह च भूमौ गंगेति तस्मात्तवागमनात् सर्वमंगलं पवित्रं च

तस्मिन्देवकृतवैरे भवंतं वै सुरादयः ॥ दिदृक्षवः समेष्यंति राजानश्च यशस्विनः ॥४१॥ श्रवणात्कीर्तनाद्ध्यानात्पू
यंतेंतेवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥४२॥ यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते
भुवनमंगल दिग्वितानं ॥ मंदाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणांबु पुनाति विश्वं ॥४३॥ श्रीशुक उवाच
तत्रतेष्वात्मपक्षेष्वगृणत्सु विजिगीषया ॥ वाचः पेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥४४॥ श्रीभगवानुवाच ॥ त्वं हि
नः परमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् ॥ तथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥४५॥ इत्युपामंत्रितो भर्त्रा सर्वज्ञेना
पि मुग्धवत् ॥ निदेशं शिरसाधाय उद्धवः प्रत्यभाषत ॥४६॥ इति श्रीभागवते भागवद्याने सप्ततितमोध्यायः ॥७०॥ श्रीशु
क उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतेः ॥१॥ राम श्रीराम

भविष्यतीति भावः ॥४३॥ तत्रैवं नारदेनोक्ते तेषु तत्र वर्तमानेषु आत्मीयपक्षेषु यादवेषु जरासंधस्य जिगीषया अगृणत्सु वक्तुमसमर्थेषु वाचः पे
शैः पेशलवाग्भिरित्यर्थः ॥४४॥ चक्षुः हेतुः मंत्रार्थानां मंत्रसाध्यानां तत्त्ववित् परिपाकवेदिना ॥४५॥ इति दशमे सप्ततितमोध्यायः ॥७०॥ अथै
कसप्ततितमे उद्धवस्य मंत्रतः इंद्रप्रस्थागते कृष्णे पार्थानां परमोत्सवः ॥ राजसूयमिषं कृत्वा भीमदुर्योधनादिषु ॥ कलिस्त्वत्पादितद्वारा भूभार

मतस्य: देवर्षेर्गतोद्धवस्य गमनं

श्रीभा
द० ३०
५२

यस्यतः याांकरिष्यतः पैतृष्वसेयस्यपितृष्वसुः पुत्रस्यमाचिकीर्षसाहाय्यंतच्चकार्यंतथाशरीरणार्थिनांराज्ञांरक्षाचकार्यातत्रप्रथमंरा
ज्ञस्सयार्थंमंतमंततोराज्ञरक्षाकर्तव्येत्याह ॥ यष्टव्यमित्यष्टभिः ॥ अतोदिग्विजयहेतोस्तभयार्थः ॥ राज्ञस्सयार्थः शरणागतरक्षार्थञ्च ३
अस्तुतत्तुकतथासध्यप्रवंजरासंधंहत्वामिकृतोयादवानालस्याह ॥ ४ ॥ सर्वेइति ॥ अल्पघाततोबलिनामपिष्वपिसमबलएवभीमस्तथा ५
पितंविनाभीमादेवतस्यष्टत्वंविहितइतिभावः ॥ ५ ॥ ननुस्वबलसाम्येपिसेनाबलंतस्याधिकमितिचेदतआह ॥ द्वैरथइतिद्वंद्वयुद्धेशते

उद्धवउवाच ॥ यदुक्तमृषिणादेवसाचिव्यंयक्ष्यतस्त्वया ॥ कार्यंपैतृष्वस्रेयस्यरक्षाचशरणैषिणां ॥ १ ॥ यष्टव्यंराज
सूयेनदिक्चक्रजयिनाविभो ॥ अतोजरासुतजयउभयार्थोमतोमम ॥ २ ॥ अस्माकंचमहानर्थोह्येतेनैवभविष्य
ति ॥ यशश्चतवगोविंदराज्ञोबद्धान्विमुंचतः ॥ ३ ॥ सवैदुर्विषहोराजानागायुतसमोबले ॥ बलिनामपिचान्येषांभीमंस
मबलंविना ॥ ४ ॥ द्वैरथेसतुजेतव्योमाशताक्षौहिणीयुतः ॥ ब्रह्मण्योभ्यर्थितोविप्रैर्नप्रत्याख्यातिकर्हिचित् ॥ ५ ॥ ब्र
ह्मवेशधरोगत्वातंभिक्षेतवृकोदरः ॥ हनिष्यतिनसंदेहोद्वैरथेतवसन्निधौ ॥ ६ ॥ निमित्तंपरमेशस्यविश्वसर्गनि
रोधयोः ॥ हिरण्यगर्भःशर्वश्चकालस्यारूपिणस्तव ॥ ७ ॥ राम श्री श्री श्री रामा यनमो नमः नमः

नाक्षौहिणीभिर्युतोत्रयोजितः माजेतव्यत्यर्थः ॥ नन्वसौस्वसैन्यमेवयुद्धायनियुंजीतअतस्तेनद्वैरथमितितत्राह ॥ ब्रह्मण्यइतिवप्र
त्याख्यातिननिराकरोति ॥ ६ ॥ भिक्षेतद्वंद्वयुद्धंयाचतां ॥ तथापिसमबलत्वात्साम्यमेवस्यादतआह ॥ तवसन्निधाविति ॥ ७ ॥ नन्वकिं
चितज्ञर्वतोममसन्निधानात्किंस्यादतआह ॥ निमित्तमिति ॥ अयमर्थः ॥ यथातवारूपस्यकालात्मनोविश्वसर्गनिमित्तंकेवलंहिर
ण्यगर्भस्तथाशर्वश्चतन्निरोधेतथात्वमेवसन्निधिमात्रेणहंताभीमोनिमित्तमात्रइति ७ ॥ राम राम श्री श्री ॥

राम
५२

अतोनेनोपायेनत्वयासशीघ्रंहंतव्यइत्याशयेनाह॥गायंतीति॥जरासंधध्रुतानांराज्ञांदेव्यःपत्न्यःतेविषदंकर्मस्वगृहेषुबालकलालना
दौगायंतिकिंतत्कर्मस्वशत्रोर्जरासंधस्यवधमात्मनांपतीनांविमोक्षणंचवत्समारोदीः॥श्रीकृष्णएवंकरिष्यतीति॥अत्रदृष्टांतः॥गो
प्यश्चेत्यादि॥यथागोप्यःशंखचूडवधस्वमोक्षंचगायंतिअवतारांतरगतेचगजेंद्ररपतेर्नक्रात्तजनकात्मजायाश्चरावणात्पित्रोश्चकंस
गृहान्मोक्षंअतएवंभूतानांतासांकृपयात्वयातथैवकर्तव्यमितिभावः॥१०॥किंच॥जरासंधवधइतिततःशिशुपालवधादयोपिस्वयमेवसा

भृधीयेरा

गायंतितेविशदंकर्मगृहेषुदेव्योराज्ञांस्वशत्रुवधमात्मविमोक्षणंच॥गोप्यश्चकुंजरपतेर्जनकात्मजायाःपित्रोश्च
लब्धशरणामुनयोवयंच॥१०॥जरासंधवधःकृष्णभूर्यर्थायोपकल्पते॥प्रायःपाकविपाकेनतवचाभिमतःक्रतुः॥
११॥इत्युद्धववचोराजन्सर्वतोभद्रमच्युतं॥देवर्षिर्यदुवृद्धाश्चकृष्णश्चप्रत्यपूजयन्॥१२॥अथादिशत्प्रयाणायभ
गवान्देवकीसुतः॥भृत्यान्दारुकजैत्रादीननुज्ञाप्यगुरून्विभुः॥१३॥ रामायनमोनमः श्रीरामकृष्णायनमः

ध्यामभविष्यंतीतिभावः॥एतच्चसर्वंभविष्यत्येवेतिसंभावयन्नाह॥प्रायइतिपच्यतइतिपाकःकर्मतस्यविपाकःफलंतेनराज्ञांशुभप
विपाकेनजरासंधादीनांपाकविपाकेन॥पाठांतरेजरासंधस्यपापविपाकेनेतितेनतावक्रतुस्तवाभिप्रेतःतत्रगतेत्वयिसर्वंभविष्यती
त्यर्थः॥११॥अच्युतंसुपपन्नतयाशुभंकार्यंइष्टाइतिवदंतंआनिरुद्धादयःतथानारदउद्धवयन्नितिसूचितं॥१२॥अनुज्ञाप्यअनुज्ञांप्रार्थयित्वागुरून्व
सुदेवादीन्॥१३॥

भू।

श्रीभा° द° उ°
६°

अवरोधान् दारान् निर्गमय्य प्रयाणं कारयित्वा ॥१३॥ भटाः पदातयः सादिनः अश्वारोहाः रथ्यादिनायकैः स्थापनादिकैः करालया तीव्रया
आत्मसेवया परिवृतो निराक्रामत् निरगात् अतः सकाशात् मृदंगादिभिः वाद्यैः प्रघोषेण घोषितया ॥१४॥ नृवाजीति नरयानैः अश्वैः कां
चनशिबिकाभिश्च अच्युतं पतिमनु ययुः सुव्रताः पतिव्रताः वराणि अंबरादीनि यासां ताः ॥१५॥ नरोष्ट्रादिभिर्यानैः अश्वतरी गर्दभ्यामश्वा

निर्गमय्यावरोधान् स्वान् ससुतान् सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥१३॥ सूतोपनीतं स्वरथमा
रुहद्गरुडध्वजः ॥ ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैः
प्रघोषघोषितककुभो निराक्रमत् ॥१४॥ नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः व
रांबराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥१५॥ नरोष्ट्रगोमहिषखराश्वतर्यनः करेणुभिः प
रिजनवारयोषितः ॥ स्वलंकृताः कटकुटिकंबलां।बराद्युपस्करा ययुरधियुज्य सर्वतः ॥१६॥ बलं बृहद्ध्वजपटछत्र
चामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः ॥१७॥

ज्ञाता ॥ अश्वाः शकटं करेणवो राज्ञी ॥ परिजनयोषितो वारयोषितश्च कटकुटयः उशीरादितृणनिर्मितगृहाः केवलांबरादयश्चोपस्काराः
कुट्यादिरूपा यासां ताः ॥ अधियुज्य बलीवर्दादिषु ताः उपस्कारान् दृढं संनह्य ॥१६॥ रवेर्दीप्तिभिश्च तत्र बलं दिवा बभौ कथंभूतं तुमुल
रवं आकुलस्वनं ॥ क्षुभितैस्तिमिंगिलैः ऊर्मिभिः ॥१७॥ रामाय नमः श्रीराम श्रीरामाय गोवर्धनाय राधाकृष्णाय नमः

राम
६°

मुनिर्नारदो विहायसा यया विति शेषः ॥ मा भैष्टेति वक्तृत्वं राज्ञाभिप्रायेण ॥ १८ ॥ प्रत्येकं स्वस्वपत्तेर्हुतं तयत्न यस्मात्तस्मात्स्वसुहृदां वः ॥ १९ ॥ आनर्ता
दयो मागधस्य देशाः तीर्त्वा अतिक्रम्य विनशनं कुरुक्षेत्रे अतीयाय अतिक्रम्य ययौ ॥ २ ॥ शक्रप्रस्थमिंद्रप्रस्थं ॥ २१ ॥ २२ ॥ इंद्रियाणि प्राणा

अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शन
निर्वृतेंद्रियः ॥ राजा हृतं भुवा चेदं भगवान्प्रीणयन् गिरा ॥ मा भैष्ट हूत भद्रं वो घातयिष्यामि मागधं ॥ १८ ॥ इत्युक्ताः प्रस्थि
तो हृतो यथावद्ववदन्नृपान् ॥ तेऽपि संदर्शनं शौरेः प्रत्येकं स्वस्वसुहृद्वः ॥ १९ ॥ आनर्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः ॥ गि
रीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ २ ॥ ततो दृषद्वतीं तीर्त्वा मुकुंदोऽथ सरस्वतीं ॥ पांचालानथ मत्स्यांश्च शक्रप्रस्थमथा
गमत् ॥ २१ ॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणां ॥ अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥ २२ ॥ गीतवादित्रघोषे
ण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृताः ॥ २३ ॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पांडवः ॥
चिराद्दृष्टं प्रियतमं सस्वजेऽथ पुनः पुनः ॥ २४ ॥ दोर्भ्यां परिष्वज्य रमामलालयं मुकुंदगात्रं नृपतिर्हताशुभः ॥ लेभे परां नि
र्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥ २५ ॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजलाकुलेंद्रियः ॥ य
मौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतं ॥ २६ ॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः ॥ ब्राह्मणेभ्यो नम
स्कृत्य वृद्धेभ्यश्च यथार्हतः ॥ २७ ॥ मानिनो मानयामास कुरुसृंजयकेकयान् ॥ सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ॥ २८

इवं प्राणमिव ॥ २३ ॥ सस्वजे परिरेभे ॥ २४ ॥ रमाया अमलं निर्दोषमालयं विस्मृतो लोकविभ्रमो लोकव्यवहारो येन सः ॥ २५ ॥ २६ ॥ अर्जुनेन स
मत्वात्परिष्वक्त एव केवलं पादौ नमस्कर्तुं नार्जुनः कालेनभुजाभ्यां धृत इति भावः ॥ यमाभ्यां त्वभिवादितश्चेति ॥ २७ ॥ राम राम राम श्रीराम

८
कृ:

श्रीभा॰
द॰ ३॰
६१

३॥ चित्रध्वजादिभिर्विराजमाने ॥ ३१ ॥ प्रतिसद्मसु दीप्तैर्दीपैर्बलिभिः पुष्पादिप्रकरैश्च गृहं जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपैः रुचिरं विल
सत्यः पताकाग्रयष्टिभिस्ततम् ॥ मूर्धन्यानि मूर्धनि भवानि हेमकलशाग्रे येषां तैः ॥ रजतमयानि कनकमयानि स्थूलानि शृंगाणि कलशाधस्तनभूमि

मृदंगशंखपटहवीणापणववेणुभिः ॥ ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्ननृतुर्जगुः ॥ २९ ॥ एवं सुहृद्भिः पर्यस्तः पुण्य
श्लोकशिखामणिः ॥ संस्तूयमानो भगवान्विवेशालंकृतं पुरं ॥ ३० ॥ संसिक्तवर्त्म करिणां मदगंधतोयैश्चित्रध्वजैः कन
कतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं ॥ ३१ ॥ उद्दीप्तदीपबलिभिः
प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकं ॥ मूर्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधा
म ॥ ३२ ॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः ॥ सद्यो विसृज्य गृहकर्म पतींश्च त
ल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥ ३३ ॥ तस्मिन्सुसंकुल इभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः
नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥ ३४ ॥ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नी
स्तारा यथोडुपसहाः किमकार्यमूभिः ॥ यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति
॥ ३५ ॥ तत्र तत्रोपसंगम्य पौरा मंगलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥ ३६ ॥ राम स्वस्ति राम ॥

काग्रे येषां तैर्भवनैर्जुष्टं कुरुराजस्य धाम पुरं ददर्श ॥ ३२ ॥ नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किं तु न नारीणामित्यर्थः
॥ ३३ ॥ सुष्ठु स्वागतं तत्तत्प्रश्नादिकं उत्स्मयवीक्षितेनैव विदधुः ॥ ३४ ॥ उडुपसहाः चंद्रस्य सहा इत्यर्थः ॥ अमूभिः किं पुण्यमकारि ॥ ३५ ॥ श्रेणय
एकशिल्पोपजीविनां संघास्तेषां मुख्याः ॥ ३६ ॥ राम श्री राम श्री राम श्रीराम जप राम रामाकृष्णायनमः

राम
६१

अभ्युपेतः अधिरामनेन सत्कृतः ॥ ३७ ॥ सत्कृपाद्द्रौपदी सहिता ॥ ३८ ॥ कृत्स्नं प्रकारविशेषं ॥ प्रमोदेनोपहतोभिभूतः ॥ गुरुस्त्रीणां च कृष्ण
या द्रौपद्या भगिन्या सुभद्रया ॥ ३९ ॥ अतर्चं अर्चितवती अन्याश्चयाः कृष्णपत्न्यो भ्यागतास्ता अपि ॥ ४०।४१ पृत्यहं नवं यथा भवति त
था सुखं निवेशयामास ४२। ४३ ॥ कथंभूतो यः प्रेमाता नित्यं फल्गुनेन संयुत अपवृतस्य सहायेन सता येन खांडवेन वह्निं तर्पयि ते

अंतःपुरजनैः प्रीत्या मुकुंदः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ॥ ३७ ॥ पृथा विलोक्य भ्रात्रेयं
कृष्णं त्रिभुवनेश्वरं ॥ प्रीतात्मोत्थाय पर्यंकात्सस्नुषा परिषस्वजे ॥ ३८ ॥ गोविंदं गृहमानीय देवदेवेशमादृतः ॥
पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥ ३९ ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेभिवादनं ॥ स्वयं च कृष्णया राजन्
भगिन्या चाभिवंदितः ॥ ४० ॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीः सह सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं त
था ॥ ४१ ॥ कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीं ॥ अन्याश्चाभ्यागता यास्तु वासःस्रङ्मंडनादिभिः ॥ ४२ ॥ सुखं
निवेशयामास धर्मराजो जनार्दनं ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ॥ ४३ ॥ तर्पयित्वा खांडवेन वह्निं फल्गुन
संयुतः ॥ मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४४ ॥ उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया ॥ विहरन्र
थमारुह्य फल्गुनेन भटैर्वृतः ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे इंद्रप्रस्थगमने एकसप्ततितमोऽध्यायः
७१

त्वा तत्र च मयं मोचयित्वा तेन मयेन पुनस्य युधिष्ठिराय दिव्या सभा कृता तं श्रीजनार्दनं अनेन राज्ञः कृतोपकारानुस्मरणं द्योतितं समायायथा
मेनारथं सर्वावकाशसंपादनं च दर्शितं ४४। ४५। इति श्रीभागवते महापुराणे दशमस्कंधे इंद्रप्रस्थगमने एकसप्ततितमोऽध्यायः ॥ ७१ ॥

श्रीभ
द०३
६२

श्री भे

ततो हि सम्प्रति तमेव राज्ञा कार्ये निवेदिते ॥ ऊर्जयं मागधं कृष्णा भीमेनाघातयद्धरिः ॥ २ आस्थितं स्तनमिति शेषः ॥ २ शृण्वतामेवेति यस्त्वस्मनः
श्रीकृष्णः करोति न तदन्यः कश्चित्कर्तुं समर्थ इति निश्चित्य सर्वानेव तानननादृत्य कृष्णमुवाचेत्यर्थः ॥ आभाष्य भो कृष्ण भक्तवत्सलेत्येवं
संबोध्य ॥ २ ॥ विभूतीः अंशान् ॥ ३ एषु चक्रवर्तिनां मनोरथः कथं त्वया क्रियत इति चेत् अत आह ॥ त्वत्पादुके इति ॥ परिचरंति यत्कृष्णमव
धानमर्थे ये परिचरंति देहेन ध्यायंति मनसा अभद्रस्य नशने नाशके शृण्वंति वा वाचा ते भवस्यापवर्गं मोक्षं विंदंति ॥ यद्याशासते तर्हि

श्रीशुक उवाच ॥ एकदा तु सभामध्ये आस्थितो मुनिभिर्वृतः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठिरः ॥ १
आचार्यैः कुलवृद्धैश्च ज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेव चैतेषामाभाष्येदमुवाच ह ॥ २ ॥ युधिष्ठिर उवाच ॥ क्रतु
राजेन गोविंद राजसूयेन पावनीः ॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो ॥ ३ त्वत्पादुके अविरतं परि ये चरंति
ध्यायंत्यभद्रनशने शुचयो गृणंति ॥ विंदंति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ ४
तद्देवदेव भवतश्चरणारविंदसेवानुभावमिह पश्यतु लोक एषः ॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रद
र्शय विभो कुरुसृंजयानां ॥ ५ ॥ ॥ ॥ राम ॥ ॥ श्री ॥ श्री ॥ ॥

आशिषोपि त एव विंदंति ॥ नान्ये चक्रवर्तिनोपि ॥ ४ ॥ भगवतो भक्तपक्षपातमाविष्कारयन्नाह ॥ तद्देवदेवेति ॥ तत्तस्मात्पश्यतु सा सा
त् ॥ एवं निश्चितेपि कर्मादिप्रधानाः केपि कुरुसृंजया भवद्भक्तिं न बहु मन्यंते ते तेषां मोहनिवृत्तये ॥ ये त्वां भजंति ये द्विषा न भजंति
ते च तेषां उभयेषां निष्ठां स्थितिं प्रदर्शय ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम
६२

ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यात्तत्राह ॥ नेति ॥ स्वः पर इति भेदमतिस्तव न स्यादेव कुतः ब्रह्मणो निरुपाधेः किंच सर्वस्यात्मनः
अतः समदृशः किंच स्वसुखानुभूतेः ॥ अतो रागाद्यभावादिति भावः तथापि सेव्यमानानां ॥ सेवकत्वत्प्रसादो नान्येषां तत्रापि सेवानुरू
पमुदयः फलं ॥ न त्वत्र विपर्ययोन्यथाभावः ॥ यथा कल्पद्रुमस्य रागादिराहित्येपि सेवकेष्वेव फलजनकत्वं नान्येषु ॥ ६ ॥ सत्यभक्ताना
मेवं कैवल्यादिनान्येषामित्यनुमोदमान आह ॥ सम्यगिति ॥ शत्रुकर्षणेति ॥ संबोधयन् सर्वराजविजयशक्तिं सूचयति अनुभवि

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ॥ संसेवतां सुरतरोरिव ते प्रसादः से
वानुरूपमुदयो न विपर्ययोत्र ॥ ६ ॥ श्रीभगवानुवाच ॥ सम्यग्व्यवसितं राजन्भवता शत्रुकर्षण ॥ कल्याणी येन ते
कीर्तिर्लोकाननुभविष्यति ॥ ७ ॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि भूतानामीप्सितः क्रतु
राड्यं ॥ ८ ॥ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे ॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुं ॥ ९ ॥ एते ते भ्रातरो राज
ल्लोकपालांशसंभवाः ॥ जितोस्म्यात्मवता तेहं दुर्जयो योकृतात्मभिः ॥ १० ॥ न कश्चिन्मत्परं लोके तेजसा यशसा
श्रिया ॥ विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थिवः ॥ ११ ॥ ॥ श्रीरामाय नमः श्रीकृष्णाय नमः रामाय

ष्यति व्याप्स्यति सर्वलोकव्यापिनी भविष्यतीत्यर्थः ॥ ७ ॥ किमत्र मयान्येन वा संपादनीयं तव स्वकर्तव्यतामन्हय इत्याह ॥ विजित्येति ॥ जग
तीं सर्वां पृथ्वीं संभारान् यज्ञोपस्करान् संभृत्य संपाद्य आहरस्व आहर यज्ञं अनुतिष्ठेत्यर्थः ॥ ८ ॥ ९ ॥ ननु नृपतिविजयादिकं कथं शक्यं स्यादत आह ॥ ए
त इति ॥ किंच आत्मवता जितेन्द्रियेण तेन त्वया अहं च जितोस्मि अकृतात्मभिः अजितेन्द्रियैः ॥ १० ॥ आस्तां तावदेवंभूतस्य तव परैरभिभवशंका ॥ अपि किंच
न मयि मत्परे कोपि न त्वाभिभवितुं भवतीत्याह न कश्चिदिति तेजसा प्रभावेन विभूतिभिः सैन्यादिसामग्रीभिः ॥ ११ ॥

श्रीभा०
द० उ०
६२

अयुंक्त निर्युक्तवान् ॥ तथा विष्णोस्तेजसा उपबृंहितान् संवर्धितान् तेजोपबृंहितान् इति संधिरार्षः ॥१२॥ नकुलादीनां मत्स्यादिभिः सह
येयं यथासंख्येन संबंधः ॥१३॥ कथंभूताय यक्ष्यते यागं करिष्यते १४ आहो हरिः श्रीकृष्णः ॥१५॥ ब्रह्मलिंगधराः ब्राह्मणलिंगधारिणः य
तः यत्र बृहद्रथसुतो जरासंधः ॥१६॥ गृहेषु वर्तमानं समयाचेरन् सम्यक् अयाचंतेत्यर्थः ॥१७॥ नन्विदं कामयामहे इति विशेषो निर्दिश्यतां

न

श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः ॥ भ्रातॄन्दिग्विजयेऽयुंक्त विष्णुतेजोपबृंहितान् ॥१२॥ स
हदेवं दक्षिणस्यामादिशत्सह सृंजयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं ॥१३॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः
सह मद्रकैः ॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा ॥१४॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ श्रुत्वाजितं जरा
संधं नृपतेर्ध्यायतो हरिः ॥१५॥ आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥१६
जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनं ॥१७॥ ब्रह्मण्यं समयाचेरन्राजन्या
ब्रह्मलिंगिनः ॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥१८॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥ किं दुर्मर्ष
तितिक्षूणां किमकार्यमसाधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनां ॥१९॥ रामायनमः ॥ श्रीकृष्णायन

अन्यत्र यस्य पुत्रादीनां वियोगो दुःसहः स कथं देयः ॥ तथा राजनं मंत्र्यं किरीटादिकमदेयं यत्न भिक्षुकस्य कथं देयं तथापि तिरस्कार रत्नाभरणादि पुत्रादि
योग्यमपि कथं परस्मै देयमिति चेद्दत्त इत्याह ॥ किं दुर्मर्षमित्यादि ॥ अत्र दृष्टांततत्वेनार्थांतरमाह ॥ किमकार्यमिति ॥ यथा असाधूनामकार्यं ना
स्ति तथापि तितिक्षूणां दुर्मर्षं दुःसहं नास्ति वदान्यानां मत्स्वदाराणां अदेयं नास्ति समदर्शिनां परश्च नास्ति अतः किंविज्ञप्ति निर्देशेनेत्यर्थः ॥१९॥

राम
६२

किंच ॥ अर्थिनोर्थीरे ण सुहृल्लादिवत्प्राणेनवंचनीया इत्याशयेनाह ॥ योनित्येनेति ॥ नाचिनोति न संपादयति सवाच्यः निंद्यः ॥ २१ ॥ वि
श्वामित्रार्थीरे ण यो हरिश्चंद्रो भार्यात्मजादिसर्वं विक्रीय स्वयं चंडालतां प्राप्तोप्यनिर्विण्णः महाराजो धार्मिकः तैः स्वर्गंगतः रंति
देवः सत्कृतं आतिथ्यदानेनाष्टचत्वारिंशदहान्यलब्धान्नोदकोपि कथंचिदुपलब्धान्नोदकादि अर्थिभ्यो दत्वा ब्रह्मलोकं गतः ॥ उंछवृत्ति
मुद्गलः षण्मासे ससीदन् कुटुंबोपि आतिथ्यदानेन ब्रह्मलोकं गतः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्वा शिबिः दिवंग

योनित्येन शरीरेण सतां गेयं यशो ध्रुवं ॥ नाचिनोति स तां कल्पः सवाच्यः शोच्य एव सः ॥ २१ ॥ हरिश्चंद्रो रंतिदेव उंछ
वृत्तिः शिबिर्बलिः ॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥ २२ ॥ श्रीशुकउवाच ॥ स्वरेण कति मिलाद्भुषो केपि
ऽपो हृतेरपि ॥ राजन्यं बधुन्विज्ञाय हृष्टस्ते वा नो चेतयत् ॥ २३ ॥ राजन्यं बधवो ह्येते ब्रह्मलिंगानि बिभ्रति ॥ ददामि भि
क्षितं तेभ्य आत्मानमपि उत्सृजन् ॥ २४ ॥ बलेर्नु श्रूयते कीर्तिर्वितताद्दिस्व कल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापि विप्रव्या
जेन विष्णुना ॥ २५ ॥ श्रियं जिहीर्षतें द्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादाद्वार्यमाणोपि दैत्यराट् ॥ २६ ॥

तः ॥ बलिः सर्वस्वं ब्राह्मणवेशधारिणे हरये दत्वा बलिः तमेवात्मसाच्चकार ॥ कपोत आतिथ्ये व्याधाय कपोत्यासहात्ममांसं दत्वा विमा
नेन दिवं गतः ॥ २२ ॥ व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थानेन नाम्निर्दग्धदेहो निष्कल्मषो दिवमारुरोह ॥ एवमन्ये बहवो ध्रुवे
ण शरीरेण ध्रुवं लोकं गता इति ॥ आह तैर्यथा तकिं एणकितेर्हेष्टः स्वा नच्छोपदीस्वय वादिषु ॥ २३ ॥ इंद्रस्य श्रियं जिहीर्षता विष्णुना भ्रंशित
स्यापि बलेर्नु अहोनेतिपावने श्रूयते किमपि तत्क्षयते अतिं तं ख्याप्यते २३ । २४ । श्रियमिति शुक्रेण वार्यमाणोपि अत एव विष्णुरिति जानन्नपि

श्रीभा
द० उ०
९४

पतमानेनपततानात्रबंधुनादेहेनब्राह्मणार्थायविपुलंयशोनेहतानेहमानेनअसंपादयताकोन्वर्थः नकोपीत्यर्थः ॥ इत्येवंनिश्चित्य
प्राह हेविप्रा इति ॥ २६।२७। राजन्यतामेवप्रपंचयति ॥ असाविति ॥ २८। २९। ३०। यतोमद्भियासमुद्रंशरणंगतः ॥ ३१॥ वयसापिअतुल्यः

जीवताब्राह्मणार्थायकोन्वर्थःक्षत्रबंधुना ॥ देहेनपतमानेननेहताविपुलंयशः ॥ २६ ॥ इत्युदारमतिः प्राहकृष्णार्जुन
वृकोदरान् ॥ हेविप्राव्रियतांकामोददाम्यात्मशिरोपिवः ॥ २७ ॥ श्रीभगवानुवाच ॥ युद्धंनोदेहिराजेंद्रद्वंद्वशोयदिम
न्यसे ॥ युद्धार्थिनोवयंप्राप्ताराजन्यानान्नकांक्षिणः ॥ २८ ॥ राजन्नृसंधउवाच ॥ किंदेवावीतगंधर्वाःकिन्नरोरगराक्षसाः ॥ ई
दृशंब्राह्मणोतेजोनदृष्टंनश्रुतंमया ॥ २९ ॥ नविप्राणांमयादृष्टाधनुर्ज्याविहताभुजाः ॥ इतिश्रुत्वाहभगवान्पुरुहस्य
मगधाधिपं ॥ ३० ॥ श्रीभगवानुवाच ॥ असौवृकोदरःपार्थस्तस्यभ्रातार्जुनोह्ययं ॥ अनयोर्मातुलेयंमांकृष्णंजानीहिते
रिपुं ॥ ३१ ॥ एवमावेदितोराजाजहासोच्चैःस्ममागधः ॥ आहचामर्षितोमंदायुद्धंतर्हिददामिवः ॥ ३२ ॥ नत्वयाभीरुणा
योत्स्येयुधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वासमुद्रंशरणंगतः ॥ ३३ ॥ अयंतुवयसातुल्योनातिसत्वोनमेसमः ॥
अर्जुनोनभवेद्योद्धाभीमस्तुल्यबलोमम ॥ ३४ ॥ इत्युक्त्वाभीमसेनायप्रादायमहतींगदां ॥ द्वितीयांस्वयमादायनि
र्जगामपुराद्बहिः ॥ ३५ ॥ ततःसमेखलेवीरौसंयुक्तावितरेतरं ॥ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरणदुर्मदौ ॥ ३६ ॥ मंडला
निविचित्राणिसव्यंदक्षिणमेवच ॥ चरतोःशुशुभेयुद्धंनटयोरिवरंगिणोः ॥ ३७ ॥ ततश्चटचटाशब्दोवज्रनिष्पेषसन्निभः ॥
गदयोःक्षिप्तयोराजन्दंतयोरिवदंतिनोः ॥ ३८ ॥

नातिसत्त्वः अनतिबलः अर्जुनस्तु नच देहेनमयासमः ॥ अतोर्जुनोयोद्धानभवेत् ॥ भीमस्तुभवेत् ॥ यतोममतुल्यबलः ३४ प्रादायदत्वेत्यर्थः ३५ स
मेखलेउग्रागते ॥ ३६ ॥ मंडलानिगदायुद्धगतिभेदान् सव्यंदक्षिणंचयथाभवतितथा ॥ रंगिणोः रंगागतयोर्नटयोरिवेतिनिर्भयत्वेनोपमा ३७
चटचटेतिगदयोः परस्पराघातशब्दानुकरणंवज्रस्यनिष्पेषःपातः तत्सदृशः ॥ ३८ ॥ राम राम राम श्री श्री श्री श्री

राम
९४

युध्यतोर्दंतिनोर्दंताघातशब्द इव शुश्रुभे॥ अंसकट्यादीनुपेत्य दीप्तमन्युर्ययोस्तयोर्गजयोरर्कशाखाभ्यां सममंगुध्यतोर्दंतिनोस्ते चूर्णीभव
तस्तत्कृत ॥३९॥ अपिष्टचूर्णीचक्राते ॥४०॥ शिक्षाभ्यासः बलं सत्वं ओजः प्रभावः समानि तानि ययोस्तयोः ॥४१॥ जन्मशकलं तं पष्टति शु

तौ वै गदे भुजजवेन निपात्यमाने अन्योन्यतोंसकटिपादकरोरुजत्रुं ॥ चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतो
र्द्विरदयोरिव दीप्तमन्व्योः ॥३९॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयःस्पर्शैरपिंष्टां ॥ शब्दस्तयोः प्र
हरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥४०॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्विशेषम
भूद्युद्धमक्षीणजवयोर्नृप ॥४१॥ एवं तयोर्महाराज युध्यतोः सप्तविंशतिः ॥ दिनानि निरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः
॥४२॥ एकदा मातुलेयं वै प्राह राजन्वृकोदरः ॥ न शक्तोहं जरासंधं निर्जेतुं युधि माधव ॥४३॥ शत्रोर्जन्ममृती विद्वान्जी
वितं च जराकृतं ॥ पार्थमाप्याययन्स्वेन तेजसाचिंतयद्धरिः ॥४४॥ संचिंत्यारिवधोपायं भीमस्यामोघदर्शनः ॥ दर्शि
यामास विटपं पाटयन्निव संज्ञया ॥४५॥ तद्विज्ञाय महासत्वो भीमः प्रहरतां वरः ॥ गृहीत्वा पादयोः शत्रुं पातयामास
भूतले ॥४६॥ एकं पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ॥ गुदतः पाटयामास शाखामिव महागजः ॥४७॥ एकपादोरुवृष
णकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ॥४८॥ हाहाकारो महानासीन्निहते मगधेश्वरे ॥ पूज
यामासतुर्भीमं परिरभ्य जयाच्युतौ ॥४९॥ सहदेवं तत्तनयं भगवान्भूतभावनः ॥ अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुं
॥५०॥ मोचयामास राजन्यान्संरुद्धा मागधेन ये ॥५१॥ इति श्रीद० श० स्कं० जरासंधवधो द्विसप्ततितमोध्यायः ॥७२॥

शुनः शकलीभावः तं विद्वान् जानन् जरानाम राक्षसी तत्कृतं अचिंतयत् कथमसौ शकलीभवेदिति ॥४४॥ विटपं शाखां करे विटपं गृहीत्वाह
विभीषयन्यथाहं विटपं पाटयामि तथा त्वमेनं विपाटयेति ॥ संज्ञया संकेतेन अरिवधोपायं दर्शयामासेत्यर्थः ॥४५॥ एकैकः पदार्थो येषां तेषु शक
ले ॥४८॥ उत्कृष्टकाले सोहं तः ॥ नराणां पामिल्लाषेणोति दर्शयन्नाह ॥ सहदेवमिति ॥५०॥ इति श्रीभागवते दशमस्कंधे द्विसप्ततितमोध्यायः ॥७२॥

श्रीभा॰
द॰ उ॰
६५

ततस्त्रिसप्ततितमे मोचयित्वा नृपान्हरिः ॥ राजार्हभोगैः स्वान्देशान्प्रस्थाप्य पुरमागमत ॥१॥ अथ जरासंधवधानंतरं बद्धनृपतीन्विमो
चयन्कृपया स्वस्तोमिजमप्यदर्शयत् ॥१॥ ये निर्जिता जरासंधेन निरुद्धा गिरिद्रोण्यां ते ततो निर्गताः संतो घनश्यामं ददृशुरित्युत्तरेणान्व
यः ॥१॥ क्षुधा क्षामाः कृशाः संरोधनपरिकर्षिताः क्लेशिताः ॥२॥ भ्राजद्भ्राजमानो वरमणिः कौस्तुभो यस्याः सा ग्रीवा यस्य तं ॥ निवीतं कंठलंबि
तया व्याप्तं ॥५॥ पिबंत इवेत्यादिना हरेः पादयोः प्रणेमुरित्युत्तरेणान्वयः ॥ रंभंतः परिरंभमाणा इव ॥६॥ श्रीकृष्णदर्शनाह्लादेन ध्वस्तः संरोधन कृ॰

श्रीशुक उवाच ॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः ॥ ते निर्गता गिरिद्रोण्यां मलिना मलवाससः ॥१॥ क्षुत्क्षामाः शु
ष्कवदनाः संरोधपरिकर्षिताः ददृशुस्ते घनश्यामं पीतकौशेयवाससं ॥२॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं
चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥३॥ पद्महस्तं गदाशंखरथांगैरुपलक्षितं ॥ किरीटहारकटककटिसूत्रांगदा
चितं ॥४॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥५॥ जिघ्रंत इव नासाभ्यां रं
भंत इव बाहुभिः ॥ प्रणेमुर्हतपाप्मानो मूर्धभिः पादयोर्हरेः ॥६॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशं
सुर्हृषीकेशं गीर्भिः प्रांजलयो नृपाः ॥७॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पाहि नः कृष्ण
निर्विण्णान्घोरसंसृतेः ॥८॥ नैनं नाथानुसूयामो मागधं मधुसूदन ॥ अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥९॥

क्लमो येषां ते ॥७॥ संरोधाद्रक्षिता नस्मान्घोराया संसृतेरपि पाहि मोचय ॥८॥ ननु भवंतो जरासंधात्कृपया विमोचिता इहामुत्र च भोगासक्ता
स्तु कथं संसृतेर्मोचनीया इत्याशंक्य संप्रति न वयं तथाभूता इत्याहुः ॥ नैनमिति षड्भिः हे नाथ वयमेनं नानुसूयामः ॥ अत्र तु दोष
दृष्ट्या न पश्यामः ॥ कुत इत्यत आह ॥ अनुग्रह इति यद्यस्मात् ॥९॥ श्री राम श्रीरामाय नमः परमहंसाय नमो नमः व्यासाय ॥

राम
६५

एतदेवव्यतिरेकेणोपपादयंति ॥ राज्यैश्वर्येति ॥ राज्यैश्वर्याभ्यां मदस्तेनोन्नद्धउत्कटःखलोनित्या अचलाश्च संपदो मन्यते ॥ यद्वा अनित्याः स
त्यः अचलाः शाश्वतीर्मन्यते ॥ २० ॥ किंच ॥ अवस्तु सद्वस्त्विति तया पश्यंतीत्याह ॥ मृगतृष्णामिति वैकारिकीं सृष्ट्यादिविकारापन्नां ॥ अयुक्ताः
अविवेकिनः ॥ २१ ॥ राज्यस्य योगवियोगाभ्यानर्थवहत्वमस्माभिरेव दृष्टमित्याहुः ॥ वयमिति द्वाभ्यां ॥ श्रीमदेन नष्टा दृष्टिर्येषां ते ॥ अस्याः पृथि
व्याः इतरेतरस्पृधः ॥ परस्परं स्पर्धमानाः पुरः पुरतः त्वां मृत्युमविगणय्य पुरा येऽदुर्मदा वयं ॥ २२ ॥ हे कृष्ण त एव वयं अद्य विनष्टदर्पास्ते चर

राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नृपः ॥ त्वन्मायामोहितोनित्या मन्यते संपदोचलाः ॥ २० ॥ मृगतृष्णां यथा बाला मन्यं
त उदकाशयं ॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥ २१ ॥ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या इतरेतरस्पृधः ॥
घ्नंतः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाविगणय्य दुर्मदाः ॥ २२ ॥ त एव कृष्णाद्य गभीररंहसा दुरंतवीर्येण विचा
लिताः श्रियः ॥ कालेन तन्वा भवतोनुकंपया विनष्टदर्पाश्चरणौ स्मराम ते ॥ २३ ॥ अथो न राज्यं मृगतृष्णिरूपितं देहेन
शश्वत्पतता रुजां भुवा ॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनं ॥ २४ ॥ तं नः समादिशोपायं येन
ते चरणाब्जयोः ॥ स्मृतिर्यथा न विरमेदपि संसरतामिह ॥ २५ ॥ राम राम श्रीराम श्री कृष्णायनमः ॥

णौ स्मरामः स्मर्तुमाशास्महे कथंभूताः भवतस्तन्वा मूर्त्या कालेन श्रियः विचालिताः ॥ भ्रंशिता अतो राज्यच्युतिर्भवदनुग्रहएवेत्य
र्थः ॥ २३ ॥ अत एव अथोनंतरं मृगतृष्णिरूपितं सदृशं राज्यं शश्वत्पतता प्रतिक्षणं क्षीयमानेन तथा रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेन उपा
सितव्यं सेव्यं न स्पृहयामहे प्रेत्य लोके च क्रियाफलं स्वर्गभोगं उपासितव्यं न स्पृहयामहे कथंभूतं कर्णयोः रोचनं रुचिजनकमात्रं त
त्रगातस्य स्वधीद्यतपरामेतत्स्थावाभावादित्यर्थः ॥ २४ ॥ यद्येवं मृत्युता मृत्युं तर्हि मच्चरणौ स्मरत ततो नायासेन मुक्तिर्भविष्यति ॥ किंमदपेक्ष
यतिचेदत आहुः ॥ तन्न इति ॥ त्वच्चरणस्मृतिरपि त्वत्प्रसादफलमेवेत्यर्थः ॥ २५ ॥ श्री राम यनमः श्री गणेशायनमः ॥

श्रीभा
८.३
६६

ध्यसूणयाशंसंतुलया ॥ यथा भवद्भिराशंसितं तथा वातं निश्चितं वो मयि भक्तिर्जायते जायतामित्यर्थः ॥ २८ ॥ हे भूपा मत्सेवनमेव कर्तव्यमिति
भवद्भिर्यद्व्यवसितं संकल्पितं तद्दिष्ट्या भद्रं ॥ भवद्भिः कृत्यं च सत्यमेवेत्याह ॥ भवत इति ॥ श्री ऐश्वर्यं च ताभ्यां मदस्तेनोन्नाहं उद्बंधनं स्वैराचा
रमित्यर्थः ॥ पश्येपश्यामि ॥ २९ ॥ तदेवाह ॥ हे हय इति ॥ हे हयः कार्तवीर्यः स चक्रवर्ती नरेश्वरः ॥ पितुः कामधेनुहरणात् परशुरामेण संहतोऽह
तः ॥ नहुषो देवेंद्रतां प्राप्तो उन्मत्तः शचीसंगाय ब्राह्मणानृषीन् शिविकां वाहयन् तैरेव ततो भ्रंशितो ऽजगरत्वमवाप वेणो ऽप्युन्मत्तो ब्राह्मण

कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥ २६ ॥ श्रीशुक उवाच ॥ संस्तूयमा
नो भगवान्राजभिर्मुक्तबंधनैः ॥ तानाह करुणस्तात शरण्यः श्लक्ष्णया गिरा ॥ २७ ॥ श्रीभगवानुवाच ॥ अद्यप्रभृति
वो भूपा मय्यात्मन्यखिलेश्वरे ॥ सुदृढा जायते भक्तिर्बाढमाशंसितं तथा ॥ २८ ॥ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषि
णः ॥ श्रियैश्वर्यमदोन्नाहं पश्ये उन्मादकं नृणां ॥ २९ ॥ हैहयो नहुषो वेणो रावणो नरकोऽपरे ॥ श्रीमदाद्भ्रंशिताः स्थानाद्
देवदैत्यनरेश्वराः ॥ ३० ॥ भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत् ॥ मां यजंतो ध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ ॥ ३१ ॥ संत
न्वंतः प्रजातंतून्सुखं दुःखं भवाभवौ ॥ प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥ ३२ ॥ राम श्री रामायन ॥

न धिक्षिपंस्तैरेव दंडहतैः हतः रावणो राक्षसेश्वरः सीतामभिलषन् रामेण हतः ॥ नरको दैत्येश्वरो दितिकुंडलाहरणान्मयैव हतः ॥ अप
रे श्रीमदात् स्थानाद्भ्रंशिताः ॥ ३० ॥ यद्युत्पाद्यं देहादि तदंतवत् विज्ञाय युक्ता अप्रमत्ता रक्षतेत्यर्थः ॥ ३१ ॥ प्रजातंतून् पुत्रादीन् संतन्वंतः प्राप्तं
प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥ ३२ ॥ ॥ राम ॥ श्री राम श्री श्री लक्ष्मी सहाय नमो नमः कृष्णाय

राम
६६

मांत्रय्ययास्यथ ॥ २३ ॥ स्त्रियश्च तेषां मज्जनकर्मणि ॥ अभ्यंगस्नानादौ न्ययुंक्त ॥ २४ ॥ सुस्नातान् भोगैश्च फलान्नूर्वरेणान्नेन भोजयित्वा पुनस्तेषां
सपर्यां सहदेवेन कारयामास गृहांश्च ग्रहादयो तथा ॥ २७ ॥ प्रीणय्य नंदयित्वा ॥ २८ ॥ जगादुः ऊचुः ॥ ३० ॥ शांतं हतं प्राप्तमनोरथो बभूव ॥ ३३ ॥ ३४ ॥ ३५

उदासीनश्च देहादावात्मारामो धृतव्रतः ॥ मय्यावेश्य मनः सम्यक् मामंते ब्रह्मणि स्थास्यथ ॥ २३ ॥ शुक उवाच ॥ इत्यादिश्य नृपान्
कृष्णो भगवान् भुवनेश्वरः ॥ तेषां न्ययुंक्त पुरुषान् स्त्रियो मज्जनकर्मणि ॥ २४ ॥ सपर्यां कारयामास सहदेवेन भारत ॥ नरदेवो
चितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः ॥ २५ ॥ भोजयित्वा वरान्नेन सुस्नातान् समलंकृतान् ॥ भोगैश्च विविधैर्युक्तांस्तांबूलाद्यैर्नृपो
चितैः ॥ २६ ॥ ते पूजिता मुकुंदेन राजानो मृष्टकुंडलाः ॥ विरेजुर्मोचिताः क्लेशात् प्रावृडंते यथा ग्रहाः ॥ २७ ॥ रथान् सदश्वानारोप्य म
णिकांचनभूषितान् ॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान् प्रत्यपापयत् ॥ २८ ॥ त एवं मोचिताः कृच्छ्रात् कृष्णेन सुमहात्मना ॥ य
युस्तमेव ध्यायंतः कृतानि च जगत्पतेः ॥ २९ ॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितं ॥ यथान्वशासद्भगवान् तथा चक्रुरतंद्रिताः
॥ ३० ॥ शुक उवाच ॥ जरासंधं घातयित्वा भीमसेनेन केशवः ॥ पार्थाभ्यां संयुतः प्रायात् सहदेवेन पूजितः ॥ ३१ ॥ गत्वा ते खांडवप्रस्थं
शंखान् दध्मुर्जितारयः ॥ हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहः ॥ ३२ ॥ तच्छ्रुत्वा प्रीतमनस इंद्रप्रस्थनिवासिनः ॥ मेनिरे
मागधं शांतं राज्ञा चाप्तमनोरथं ॥ ३३ ॥ अभिवंद्याथ राजानं भीमार्जुनजनार्दनाः ॥ सर्वमाश्रावयांचक्रुरात्मना यदनुष्ठितं
॥ ३४ ॥ निशम्य धर्मराजस्तत्केशवेनानुकंपितं ॥ आनंदाश्रुकलां मुंचन् प्रेम्णा नोवाच किंचन ॥ ३५ ॥ इति श्रीभागवते महापु
राणे दशमस्कंधे राजस्य जरासंधवधो द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासंधवधं विभोः ॥ कृष्णस्य चा
नुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥ १ ॥ युधिष्ठिर उवाच ॥ ये स्युस्त्रैलोक्यगुरवः सर्वलोका महेश्वराः ॥ वहंति दुर्लभं लब्ध्वा शिरसै

इति दशमे द्विसप्ततितमः ॥ ७२ ॥ चतुर्थ्यक्सप्ततितमे राजसूयक्रिया द्विजैः ॥ अथ यज्ञाय संयोगेनैव यज्ञातादि वर्ण्यते ॥ राजसूयमखे हत्वा जरासंधं तदंतरे ॥ चैद्यं
तद्यतेऽर्यंति वीडं कालिमिवाबयत ॥ कृष्णस्य चानुभावमिति तत्र स्वच कभात ॥ तस्य साक्षात् ज्ञानुविदाधिलं चालेश्वेत्पर्थः ॥ तदाह ये स्युरिति त्रैलोकस्यापि
गुरवः सनकादयः सर्वलोकपालाश्च ते शिरसैव तवाज्ञाशासनं वहंति दुर्लभं लब्धं इति मितिभाग्येनैतल्लब्धमिति भावः ॥ वक्रुः

मनेप्सर्थः २

स भगवान्नुपरमेश्वरोस्माकं अनुभावं धत्ते तदत्यंतविडंबनं अनन्तद्दयमनुकरणं स्वतो नो हानिप्रसंगादित्यर्थः ॥ ५ ॥ अथवा तवपरिपूर्णस्याज्ञाधार
णाभ्यां न तेजसो हानिर्वृद्धिर्वा ॥ अतः कृष्णस्य कृपया सर्वसंगाकृतइत्याह ॥ न ह्येकस्माद्वितीयसीतिसेनानानासनानरहितस्य ब्रह्मणस्तवोभयं
मायापरमात्मन इति ॥ सर्वजीवतियेतस्तवनियस्तत्वं स्ततानवा स्तव अतापरानुग्रहार्थं एकैकमभिस्तवते ज्ञोनवर्धते न च ह्रसति रवेरिवोदया
स्तमापादिकर्मभिरित्यर्थः ॥ तथा च श्रुतिः ॥ न कर्मणा वर्धते नो कनीयानिति ॥ ७ ॥ नन्वेवमप्यहं परमेश्वरः मत्सीदंनीचकर्मायोग्यमिति मनसि कथं

स भवानरविंदाक्षो दीनानामीशमानिनां ॥ धत्तेनुभावं भूमन्न तदत्यंतविडंबनं ॥ ५ ॥ न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्म
नः ॥ कर्मभिर्वर्द्धते तेजो ह्रसते च यथा रवेः ॥ ६ ॥ न वै तेऽजित भक्तानां ममाहमिति माधव ॥ त्वं तवेति च नानाधीः पशूनामिव वैकृता
॥ ७ ॥ शुक उवाच ॥ इत्यनुज्ञाप्य यज्ञिये काले वव्रे युक्तान्स ऋत्विजः ॥ कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः ॥ ८ ॥ द्वैपायनो भरद्वाजः
सुमंतुर्गोतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥ ९ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो
गर्गो वैशंपायन एव च ॥ १० ॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छंदा वीरसेनोऽकृतव्रणः ॥ ११ ॥ उप
हूतास्तथा चान्ये द्रोणभीष्मकृपादयः ॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥ १२ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यत्र दि
दृक्षवः ॥ ततस्ते देवयजनं ब्राह्मणाः स्वर्णलांगलैः ॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयांचक्रिरे नृपं ॥ हैमाः किलोपकरणा राज्ञा
नश्च समाहूता राजपत्न्यश्च सर्वशः ॥ १४ ॥ राजसूयं समीयुः स्म राज्ञः पांडुसुतस्य वै ॥ मेनिरे कृष्णभक्तस्य सूपपन्नमवि
स्मिताः ॥ १५ ॥ अयाजयन्महाराजं याजका देववर्चसः ॥ राजसूयेन विधिवत्प्राचेतसमिवामराः ॥ १६ ॥ ॥ ॥ ॥

नर्भवेदत आह ॥ नवैतइति ॥ हे अजित तेन तव भक्तानामेव तावदियं नानाधीर्भेदमतिर्नास्ति ॥ यथा पशूनामज्ञानां वैकृता शरीरविषया तवतु मास्तीति
किं पुनर्वक्तव्यमित्यर्थः ॥ ७ ॥ यज्ञिये यज्ञोचिते वसंतादिकाले युक्तान् अभियुक्तान् सम्यग्विधिज्ञान् ऋत्विजो होत्रादीन् वव्रे ॥ ८ ॥ तानाह द्वैपाय
नइति त्रिभिः अकृतव्रणान्तानेतान्वृत्विग्गणः कृष्णादिभिर्देवयजनं ॥ १३ ॥ अन्येचोपहूतायज्ञादिहसदृतीपतत्रेणारित्यन्वयः ॥ १२ ॥ देवयजनं यज्ञभूमिं कृष्ट्वा कर्षणा
दिभिः संशोध्य दीक्षयांचक्रिरे दीक्षासंस्कारकरणाय यस्य राजसूयेयथाप्रासनिर्तिशेषः ॥ १३ ॥ किंच इंद्रादय इति इंद्रादयो देवगणाः ॥ १४ ॥ ये च राजादयः समाहू
ताः ॥ १५ ॥ तत्र समीयुः स्मते सर्वे कृष्णभक्तस्य पांडुसुतस्य राज्ञो राजसूयमविस्मिताः ततः सूपपन्नं मेनिरे इत्यन्वयः युक्ताकाम्यत्विजः १६ ॥ ॥ ॥

हतेहन्निसोमाभिवववदिने ॥ १९ ॥ अग्न्याहेणंअग्र जूज्ञातस्माईहेयोरंप ॥ अनैकाझातयोगिनांबकूत्वेनैकस्मात्तेनिश्चियत ॥ २० ॥ सांख्यंज्ञानंयोगउपासना २
ननुसांख्यंकेवल्यपरंयोगमविषेषणपरः कथमुभयोरेकपत्वंतत्राह ॥ एकर्वद्वितीयोसोअतः सांख्यस्येतत्परत्वंयुक्तंविशेषणभूतस्यचसर्वप्रपंचस्यत
न्मयत्वात्सविशेषणविषयस्ययोगस्यापियुक्तमद्वितीयपरत्वमित्याह ॥ एतदात्म्यमितिएषश्रीकसः आत्मयस्ततत्एतदात्मतेसभावएतदात्म्य

हतेग्रहत्यवनीपालोयात्नुकानुसमदस्यतीन् ॥ अग्रज्ञयन्महाभागानुपश्चावत्तुसमाहितः ॥ १९ ॥ सदस्यर्वार्हेणाहंवोविष्टपंतः
सभासदः ॥ नाधिगाछन्नेनैकांत्पात्सहेदेवसत्घाभवीत् ॥ २० ॥ अर्हेतिह्यच्युतः श्रोष्णभगवान्सात्वतांपतिः ॥ एषवैदेवतः सर्वः
देशकालदनादपः ॥ २१ ॥ यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः ॥ अग्निराहुतयोमंत्राः सांख्ययोगाश्चतत्पराः ॥ २२ ॥ एकएवा
द्वितीयोसौवैतदात्म्यमिदंजगत् ॥ आत्मनात्माश्रयःसभ्याःसृजत्यवतिहंत्यजः ॥ २३ ॥ विविधानीहकर्माणिजनयन्यदवेच्छया
ईहतेयदयंसर्वश्रेयोधर्मादिलक्षणं ॥ २४ ॥ तस्मात्कृष्णायमहतेदीयतांपरमार्हणं ॥ एवंचेत्सर्वभूतानामात्मनश्चार्हणंभवेत् ॥ २५ ॥

भवितयेचभावनिर्देशः ॥ एतदात्म्यमिदंसर्वमितिश्रुतेः ॥ अत्रहेतुः ॥ आत्मनेतिहेसभ्यः आत्माश्रयः अन्यनिरपेक्षः स्वयमजः इदंजगत्सृजतीति
अवतिहंतिचेति ॥ २४ ॥ किंचविविधानीतियस्मादेवेच्छयाअनुग्रहेणविविधानिकर्माणितपोयोगादीनिजनयत्तउर्वंचयस्मात् अयंसर्वपिजनोधर्मा
दिलक्षणंश्रेयईहतेसाधयतिकर्माणितत्फलानिचदधीतानीत्यर्थः ॥ २२ ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आत्मना क्रियमाणर्हणमात्मनः । कथं स्यात्तत्राह । सर्वभूतानामात्मभूताय अनन्यदर्शनेन निरस्तभेदमतये ॥२४॥ श्रीकृष्णानुभाववित्सहदेव इत्यु
क्त्वा तूष्णीं बभूव ॥२५॥ द्विजेरितं साधुसाध्विति घोषं श्रुत्वा हार्दमभिप्रायं ॥२६॥ हे सदसस्पतयः सर्वे बालस्य भाषितं मा मन्यध्वं मामानानीत मा गृही

सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने ॥ देयं शांताय पूर्णाय दत्तं स्यात्स्यमिच्छता ॥२४॥ इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानु
भाववित् ॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधुसाध्विति सत्तमाः ॥२५॥ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां ॥ समर्हयद्धृषीके
शं प्रीतः प्रणयविह्वलः ॥२६॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः ॥ सभार्यः सानुजामात्यः सकुटुंबो वहन्मुदा ॥२७॥
वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः ॥ अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं ॥२८॥ इत्थं सभाजितं वीक्ष्य सर्वे प्रांज
लयो जनाः ॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥२९॥ इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजात
मन्युः ॥ उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ॥३०॥ ईशो दुरत्ययः काल इति सत्यवती
श्रुतिः ॥ वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥३१॥ यूयं पात्रविदां श्रेष्ठा मा मध्वं बालभाषितं ॥ सदसस्पतयः सर्वे कृष्णो
यं संमतोऽर्हणे ॥३२॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठांल्लोकपालैश्च पूजितान् ॥ स
दस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥३४॥ ॥ ॥ ॥ ॥

ननु किं तत्र पतयः तत्र कृष्णोऽर्हणे संमतः तत्र अस्यैव वाक्यस्य वोऽर्थः सर्ववहुज्ञेयः गोपाल इति वेदरक्षिण्याधि बालकः इत्यर्थः ॥ उत्सितं वेदविपरीतं लंघयतीति
कुलपांसुः पांसुजाः अयोग्या रेवलोके इत्यर्थः तान् असंते घातयतीति तत यथा सः अकाकः कं चकाके सुखेऽं खेन विद्यते यस्य सः अकाकः आप्तकाम
इत्यर्थः सपर्यामाप्तकामो केवलपुरोडाशमात्रेनार्हति अपितु सर्वस्वमर्पितव्यार्थं श्रीकृष्णोपि ब्रह्मर्षिभ्यो ग्यं सपर्यामात्रं कथमर्हति किं त्वात्मसम
र्पणमप्यर्हतीत्यर्थः ॥३४॥

वर्णाश्रमकुलेभ्योपेतोब्रह्मत्वात् ॥ अनामगोत्रमितिश्रुतेः अतएवानधिकारितास्तैर्वैधमैर्बहिष्कृतः ॥ स्वैरवंती परमेश्वरत्वात् अतएवनि
र्गुणः तमआदिरहितः एवंभूतोसौ वानायोगपंतत्वं सपर्यामात्रंकथमर्हतीत्यर्थः ॥ ३५ ॥ अपिवाक्षप्रवर्तानीयोमादृशेरेषांयद्व्नामहिमाय
स्मादेषां ॥ ३६ ॥ कुलंयस्मानिनाशनममपिकिसार्ज्ञर्वहिः कृते अपितुशिरसाधृतंकिंच ॥ अस्मदादिकुलंवर्लिकिंदृष्यापोनवत अपितुतिनिय
माचारमित्यर्थः ॥ किंचयेराज्ञा ॥ अहोयद्व्नामेवतावदीदृशंमाहात्म्यंयदुत कुलदृष्टस्ययथातेः शापोनशभूदित्यादि ॥ अयंतुसाक्षादी

वर्णाश्रमकुलोपेतःसर्वधर्मवहिः कृतः ॥ स्वैरवंतीगुणोहीनःसपर्यांकथमर्हति ॥ ३५ ॥ ययातिनेमांहिकुलेशाप्तं सार्ज्ञर्व
हिः कृतं ॥ दृष्यापानवंतं शश्वत्सपर्यांकथमर्हति ॥ ३६ ॥ ब्रह्मर्षिसेवितानूदेशान्नहित्वैतेब्रह्मवर्चसं ॥ समुद्रंदुर्गमाश्रित
वादंतेदस्यवः प्रजाः ॥ ३७ ॥ एवमादीन्यभद्राणि वभाषेनष्टमंगलः ॥ नोवाचकिंचिद्भगवान्यथासिंहः शिवारुतं ॥ ३८ ॥ भग
वन्निंदितंश्रुत्वादुःसहंतेसभासदः ॥ कर्णोपिधायनिर्जग्मुः पंतःचेरिपकृषा ॥ ३९ ॥ निंदांभगवतःशृण्वंस्तत्परस्यजन
स्यच ॥ ततोनापैतियःसोपियातीदःसुकृताच्च्युतः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्वरअतः समर्थामात्रंकथमर्हतीत्यर्थः ॥ किंचयेराज्ञानोदुश्शनुचार्ययंति ॥ तदर्थंकीकटादिदेशानच्याश्रयंतिएतेशुब्रह्मर्षिसेवितानेवदेशा
नाश्रित्य ॥ आब्रह्मवर्चसंसमुद्रंदुर्गमतिहित्वा ॥ हापयित्वेत्यर्थः वाधंते ॥ तस्मायथादस्यवः ॥ प्रजातान्नअयमर्थः ॥ वेदतदर्थाभि ॥ योगोब्रह्म
वर्चसं ॥ तत्राचलिंगंतत्सहितंसमुद्रंवेदविरुद्धंलिंगधारणंपाषंडनित्यर्थः ॥ तत्रलिंगंत्यानयित्वावादंतेदउयंति ॥ कथंभूतेदुर्गधर्मवत्सतीते
स्यर्मतयादुर्विज्ञेयमित्यर्थः ॥ तस्मादस्त्वनपिप्राज्ञावेषेणवर्तमानानूदउयंति ॥ अतोयदुभ्योन्यःकोनामधार्मिकोस्तीति ॥ ३७ ॥ शिवाफेरुःतस्यारुतं
रुतंयथासिंहोनकिंचिदुक्तेनहन्ति ॥ ३८ ॥ ३९ ॥ ४० ॥

ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी । भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ॥ तावदुत्थाय भगवान् स्वान्निवार्य स्वयं रुषा । शिरः क्षुरांतचक्रेण जहार पततो रिपोः ॥४३॥

श्री भाग॰ स्कं॰ ७ ६६

तावदुत्थायेत्यस्यायमभिप्रायः ॥ एवमस्यापि दोषो मत्तुल्यबलः सर्वानेतान् हन्यात् ॥ अतोऽयमेव शीघ्रं हंतव्य इति ततस्तेषां मेवोत्थाय शिरो जहारेति
एव ॥ निंदकस्य कथं वासुदेवे प्रवेशः तत्राह जन्मत्रयेति जन्मत्रये अनुगुणितमनुवर्णितं ॥ यद्वैरं तेन संरब्धया तन्मयतां तत्स्वरूपतां यातः पुनः

ततः पांडुसुताः क्रुद्धा मत्स्यकैकयसृंजयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥४२॥ शब्दः कोलाहलो ह्यासीत्
शिशुपाले हते महान् ॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ॥४४॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ॥ पश्यतां
सर्वभूतानामुल्केव भुवि खाच्च्युता ॥४५॥ जन्मत्रयानुगुणितवैरसंरब्धया धिया ॥ ध्यायंस्तन्मयतां यातो भावो हि भवकार
णं ॥४६॥ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात् ॥ सर्वान् संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ॥४७॥ साधयित्वा क्रतुं
राज्ञः कृष्णो योगेश्वरेश्वरः ॥ उवास कतिचिन्मासान् सुहृद्भिरभियाचितः ॥४८॥ ततोऽनुज्ञाप्य राजानमनिच्छंतमपीश्वरः ॥
ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥४९॥ वर्णितं तदुपाख्यानं मया ते बहुविस्तरं ॥ वैकुंठवासिनोर्जन्म विप्रशापात्
पुनः पुनः ॥५०॥

पार्षदो बभूवेत्यर्थः ॥ अत्र हेतुः भावो हीति ॥ भावो भावना ॥ अनुध्यातं भावस्य ध्येयाकारं जन्मनः कारणं पेशस्कारादिध्यातेन कीटस्येव तथाह
स्त्वादित्यर्थः ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ॥५१॥

स्तुवामानवाःविस्माःस्म्यमयाश्च ५२ पापंधर्मद्विविधंअत्रहेतुःकलिंकल्मषंशंशतएवउल्लसामयंव्याधिंनाशकं ५३ विज्ञानंयज्ञंच ५४ इ
निदशमेचतुःसप्ततितमः ७४ ॥ पंचषुकसप्ततितमेयज्ञावभृथसंभ्रमः सुयोधनस्यचाशांतस्यामानभंगोहर्षोभ्रमात् दुर्योधनस्यैकस्यैव

राज्ञासभाजितःसर्वेसुरमानवखेचराः कृत्स्नंक्रांतेचशंसंतःस्वधामनिययुर्मुदा ॥ ५२ ॥ दुर्योधनमृतेपापंकलिंकुरु
कुलामयं योनसेहेश्रियंस्फीतांदृष्ट्वापांडुसुतस्यतां ॥ ५३ ॥ यइदंकीर्तयेद्विष्णोःकर्मचैद्यवधादिकं ॥ राजमोक्षंवि
तानंचसर्वपापैःप्रमुच्यते ॥ ५४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे उ ल धःचतुःसप्ततितमोध्यायः ॥ ७४ ॥ राज्ञोवाच
अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयं ॥ सर्वेमुमुदिरेब्रह्मन्नृदेवायेसमागताः ॥ १ ॥ दुर्योधनंवर्जयित्वाराजानर्षयःसुराः
श्रुतिश्रुतंतेभगवंस्तत्रकारणमुच्यतां ॥ २ ॥ ऋषिरुवाच ॥ पितामहस्यतेयज्ञेराजसूयेमहात्मनः ॥ बांधवाःपरिचर्यायां
तस्यासन्प्रेमबंधनाः ॥ ३ ॥ भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः ॥ सहदेवस्तुपूजायांनकुलोद्रव्यसाधने ॥ ४ ॥ गुरु
शुश्रूषणेजिष्णुःकृष्णःपादावनेजने ॥ परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ॥ ५ ॥ युयुधानोविकर्णश्चहार्दिक्योवि
दुरादयः बाह्लीकपुत्राभूर्याद्यायेचसंतर्दनादयः ॥ ६ ॥ निरूपितामहायज्ञेनानाकर्मसुतेतदा ॥ प्रवर्तंतेस्मराजेंद्रराज्ञः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
प्रियचिकीर्षवः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दुःखेकरणंप्रश्नपूर्वकमनुवदति ॥ अजातशत्रोरिति ॥ १ ॥ इतिश्रुतंत्वन्मुखादेवेत्यर्थः ॥ २ ॥ दुर्योधनस्यामर्षहेतुसाकारणत्वेनयागमहोत्सवमे
वपुनःसिंहावलोकनेननिरूपयति ॥ पितामहस्येत्यादिना एकदाततः पुरैतस्येत्यतःप्राक्तनेनग्रंथेनप्रेमबद्धानाः प्रेमयंत्रितः ॥ ३ ॥ पूजा
यांसंमाननेनानावस्तुसंपादने ॥ ४ ॥ गुरुशुश्रूषणेचंदनलेपनादौनिरूपिताःनियुक्ताःसंतोनानाकर्मसुप्रवर्तंतेस्म ॥ ७ ॥ ॥ ॥ ॥

दुर्योधनो

श्री
भाग
द०
७०

ऋत्विक्षु सदस्येषु सभासदः बहुविदश्च ते षु सम्यक् पूजितेषु सत्कृतं प्रियवाक् समर्हणा सलंकारादि दक्षिणाश्च प्रसिद्धास्ताभिः शुनद्यां
गंगायां चित्राणि ध्वजपताकाग्राणि येषु तैः इभेंद्रैः स्यंदनैः ॥ अर्वभिरश्वैः भटैश्च पदातिभिः सैन्यैर्निर्ययुः ॥ ११ ॥ यजमानो युधिष्ठिरः पुरःसरो येषां
ते ॥ १२ ॥ सदस्याश्च ऋत्विजोन्ये च द्विजश्रेष्ठाः निर्ययुः ॥ १३ ॥ किंच गंधादिभिः स्वलंकृता नरा नार्यश्चाभितो विजह्रुः ॥ १४ ॥ रसैर्नवनीतादिभिः ॥ किंच

ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हदक्षिणाभिः ॥ चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्यां ॥ ८ ॥ मृदंगशंखपणवधुंधुर्यानकगोमुखाः ॥ वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ॥ ९ ॥ नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः ॥ वीणावेणुतलोन्नादः तेषां स दिवमस्पृशत् ॥ १० ॥ चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥ ११ ॥ यदुसृंजयकांबोजकुरुकेकयकोसलाः ॥ कंपयंतो भुवं सैन्यैर्यजमानपुरःसराः ॥ १२ ॥ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥ १३ ॥ स्वलंकृता नरा नार्यो गंधस्रक्भूषणांबरैः ॥ विलिंपंत्योभिषिंचंत्यो विजह्रुर्विविधै रसैः ॥ १४ ॥ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥ १५ ॥ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ॥ ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहाससविकासितवक्त्रकांत्यः ॥ १६ ॥

सांद्रकुंकुमादिभिः पुंभिः लिप्ताः स्वाः प्रलिंपंत्यो वारयोषितश्च विजह्रुः ॥ १५ ॥ नृभिर्गुप्ता रथ्यादियानैर्नृदेव्यो राजपत्न्यो निरगमन् ॥
निरगुः एतदुपलब्धुं विमानवरैश्चरंतीर्दिव्यो यथा तद्वत् ॥ मातुलेयैः सखिभिश्च परितः ॥ सिच्यमानाः ॥ सव्रीडेन हासेन विकसंति वदनादीपि यासां
ताः ॥ १६ ॥

श्री
रा

राम
७०

देवराजनृपस्त्रियात्वेन ॥ उपसव्यीनपि ॥ हतीभिः ॥ उदकलोदकवर्मसंयुतैः ॥ सेचनपात्रैश्च सलिलधियंकामिनं ॥ १८ ॥ क्रियाभिः ताभिः क्रियाभिः कृतराट्सरीरो
राजसूययज्ञइव ॥ २० ॥ पत्नीसंयाजो यागविशेषः ॥ अवभृथ्यास्नानं बंधि आवभृथ्यं स्नानं तेऽक्षरित्वा ज्ञानसुष्टायोत्स्पर्धः ॥ १९ ॥ अहते नूतने आनर्च अर्चितवान् ॥ २२

तादेवरानुतसत्वीनु शिवचहतीभिः स्त्रीनांवराविहृतगात्रचोचमध्याः ॥ गोतस्तुकथकुककवरच्यवमानमाल्याःस्तेमंदधुर्मल
धियांरुचिरैर्विहारैः ॥ १८ ॥ ससर्पउघ्रमाहदेसदस्युंरुक्ममालिनं ॥ व्यरोचतस्वपत्नीभिःक्रियाभिःक्रतुराडिव ॥ १९ ॥ पत्नीसंयाजा
वभृथ्येसानित्वातेनरूत्विजः ॥ आर्चितपयाचक्रुर्गगायांसहकृष्णया ॥ १९ ॥ देवदुंदुभयोनेदुर्नरदुंदुभिभिःसमं ॥ मुमुचुःपुष्पवर्षा
णिदेवर्षिपितृमानवाः ॥ २१ ॥ सस्नुस्तत्रततःसर्वेवर्णाश्रमयुतानराः ॥ महापातक्यपियतःसद्योमुच्येतकिल्बिषात् ॥ २१ ॥ अथरा
जाहतेक्षौमेपरिधायस्वलंकृतः ॥ ऋत्विक्सदस्यविप्रादीनानर्चभरणांबरैः ॥ २२ ॥ बंधुज्ञातिनृपान्मित्रसुहृदोन्यांश्चसर्वशः
अभीक्ष्णंपूजयामासनारायणपरोनृपः ॥ २३ ॥ सर्वेजनाःसुररुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः ॥ नार्यश्च
कुंडलयुगालकवृंदजुष्टवक्त्रश्रियःकनकमेखलयाविरेजुः ॥ २४ ॥ अथर्त्विजोमहाशीलाःसदस्याःब्रह्मवादिनः ॥ ब्रह्मक्ष
त्रियविट्शूद्राराजानोयेसमागताः ॥ २५ ॥ देवर्षिपितृभूतानिलोकपालाःसहानुगाः ॥ पूजितास्तमनुज्ञाप्यस्वधामानिययु
र्नृप ॥ २६ ॥ हरिदासस्यराजर्षेराजसूयमहोदयं ॥ नैवातृप्यन्प्रशंसंतःपिबन्मर्त्योमृतंयथा ॥ २७ ॥

सुवर्णमिवरुकःकांतिर्येषांतेमणिकुंडलैःसहिताःसगुष्णीषाद्योयेषांते ॥ कुंडलयुगेन ॥ अलकवृंदेनचजुष्टवक्त्रश्रीर्यासांताः ॥ २४ ॥ २६ ॥ २७ ॥

६२

श्री भाग उ दी ७२

गतज्वरः निश्चिंत आसीत् ॥ ३२ ॥ अच्युते आत्मा यस्य तस्य ॥ ३३ ॥ नरेंद्रादीनां लक्ष्मीः लक्ष्मी विभूतयः विश्वसृजा मयेन उपक्लृप्ता विरचिता ताभिः ॥ ससह
ऊ हताह दुर्योधनो तप्यत ॥ ३४ ॥ महिषी सहस्रमिति ॥ बहुनोपलक्षणं क्वणत् अंघ्रिभिः शोभा यस्य मध्ये मित्यर्थः ॥ उच कुं कुमेः शोणाहारा यस्य तत्

३ ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवेशयामास कृष्णं च त्यागकातरः ॥ ३० ॥ भगवानपि तत्रांग न्यवात्सीत्तत्प्रि
यंकरः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं ॥ ३१ ॥ इत्थं राजा धर्मसुतो मनोरथमहार्णवं ॥ सुदुस्तरं समुत्तीर्य कृष्णेनाति
गतज्वरः ॥ ३२ ॥ एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३३ ॥ यस्मिन्नरेंद्रदितिजेंद्र
सुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन् द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ॥ ३
यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं ॥ मध्ये सुचारु कुचकुंकुमशोणहारं श्रीमन्मुखं प्र
चलकुंडलकुंतलाढ्यं ॥ ३५ ॥ सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिराट् ॥ वृतोनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ॥ ३६
आसीनः कांचने साक्षादासने मघवानिव ॥ पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ॥ ३७ ॥ तत्र दुर्योधनो मानी परीतो भ्रा
तृभिर्नृप ॥ किरीटमाली न्यविशदसिहस्तः क्षिपन् रुषा ॥ ३८ ॥ स्थलेभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थले पतन् ॥ जले च स्थ
लवद्भ्रांत्या मयमायाविमोहितः ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रीमंति मुखानि यस्य तत् ॥ चलैः कुंडलैः कुंतलैश्च आढ्यं संसक्तं अशोभतेति शेषः ॥ ३५ ॥ क्वापि कदाचित् ॥ अधिराडिति शेषः स्वस्य चक्षुषा हिताहित
पनेन ॥ ३६ ॥ मानी साहंकारः किरीटं च माला च विद्यते यस्य सः न्यविशत् ॥ वस्त्रादीन् अधिक्षिपन् ॥ तत्र स्थले च वस्त्रांतमग्रहीत् ॥ आकुंचितवान् ॥ अतस्त
स्मिन् ॥ स्थले एवं भ्रांत्वा जले च अपतत् ॥ कुतः स्थलवद्भ्रांत्या ॥ ३९ ॥

राम ७२

भुवोभारं जिहीर्षुरिति ॥ अथ च संपादितेन कौतुकहवीर्येन कृष्णाणां संहारं करिष्यामीति मत्वेति किंच ॥ यस्य दृष्ट्वा दृष्टिमात्रेण दुर्योधनो भ्रम
तिस्म भ्रांतिपापमयमायान्तु निमित्तमात्रं सः ॥ भूभारहरणाभीष्टं दुर्योधनस्य भ्रमं सीमादिहास्येन च तस्य पराभवं विधाय ॥ तस्मीमास्तीदि
त्यर्थः ॥ ७ ॥ इति दशमे पंचसप्ततमः ॥ ७५ ॥ ततः षट्सप्ततितमे हन्ति साल्वं हृष्टे ॥ धाम्नदाघहारेण रणप्रधान्नर्भिसः ॥ संपाद्य धर्मराजस्य

जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे ॥ निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ॥ ३७ ॥ स व्रीडितोऽवाग्वदनो
रुषा ज्वलन्निःक्रम्य तूष्णीं प्रययौ गजाह्वयम् ॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् ॥ ३८ ॥
बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ॥ ३९ ॥ एतत्तेऽभिहितं राजन्
न यत्पृष्टोऽहमिह त्वया ॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे
दुर्योधनमानभंगो नाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ श्रीशुक उवाच ॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप ॥ क्री
डानरशरीरस्य यथा सौभपतिर्हतः ॥ १ ॥ शिशुपालसखः साल्वो रुक्मिण्युद्वाह आगतः ॥ यदुभिर्निर्जितः संख्ये
जरासंधादयस्तथा ॥ २ ॥ साल्वः प्रतिज्ञामकरोत् शृण्वतां सर्वभूभुजां ॥ ३ ॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत
त ॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं ॥ ३ ॥ आराधयामास नृपः पांशुमुष्टिं सकृद्ग्रसन् ॥ संवत्सरांते भगवा
आशुतोष उमापतिः ॥ वरेण छंदयामास साल्वं शरणमागतं ॥ ५ ॥

राजसूययज्ञे ... दयं ॥ निहत्य सौभराजादीन् ... पारमदच्युतः ॥ धृत्वा संसक्तं सां पांशुमुष्टिमेकां ग्रसन् भक्षयन् ॥ ४ ॥ संवत्सरांत इ
ति आशुतोषोऽपि भगवानुमापतिः ॥ श्रीकृष्णेऽविहिद्विषि साल्ववरस्य वै फलं मन्यमानो न शीघ्रं प्रादुरभूत् ॥ तस्य प्रीतिनिर्वंधमाल
क्ष्य संवत्सरांते वरेण छंदयामास ॥ इच्छाकारितवान् ॥ वरं वृणीष्वेति उवाचेत्यर्थः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

श्री
भाग
द३
७२

त॰ ध्या

तथेति प्रतिज्ञाय गिरिशेनादिष्टः ॥ अयस्मयं लोहमयं पुरं सौभं वैरसंज्ञं निर्माय रचयित्वा प्रदात् ॥ तमसो धकारस्य धाम आश्रयं पुरं
मैदुरासदं दुःप्रापं प्रसादाग्रहा ॥ अट्टालास्तत्र उपरिगृहा ॥ तोलिकास्तत्पर्यंकोता ॥ ताः विहमान ॥ क्रीडास्थानानि च सर्व भंग ॥
किंच विमानान्ताग्यात्तत्स्मात्कृत्वा ततापादयः ॥ पेतुः आसाम्भशर्कराः धारासंपातवज्ज्वल्लोपला ॥ १० ॥ शंखस्त्वनाम्यपद्यत तत्तु मुल

देवासुर मनुष्याणां गंधर्वोरगरक्षसां ॥ अभेद्यं कामगं वव्रे सयानं वृष्णिभीषणं ॥ ५ ॥ तथेति गिरिशादिष्टो मयः
परपुरंजयः ॥ पुरं निर्माय साल्वाय प्रादात्सौभमयस्मयं ॥ ६ ॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदं ॥ ययौ द्वार
वतीं साल्वो वैरं वृष्णिकृतं स्मरन् ॥ ७ ॥ निरुध्य सेनया साल्वो महत्या भरतर्षभ ॥ पुरीं बभंजोपवनान्युद्यानानि च स
वेशः ॥ ८ ॥ सगो पुराणि द्वाराणि प्रसादाट्टालतोलिकाः ॥ विहारान्स विमानाग्र्यात् निपेतुः शस्त्रवृष्टयः ॥ ९ ॥ शि
लाद्रुमाश्चाशनयः सर्पा आसारशर्कराः ॥ प्रचंडश्चक्रवातो भूद्रजसाच्छादिता दिशः ॥ १० ॥ इत्यर्द्यमाना सौभेन कृ
ष्णस्य नगरी भृशं ॥ नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही ॥ ११ ॥ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना निजाः प्रजाः
मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः ॥ १२ ॥ सात्यकिश्चारुदेष्णश्च सांबोक्रूरः सहानुजः ॥ हार्दिक्यो भानु
गदश्च विंदश्च शुकसारणौ ॥ १३ ॥ अपरे च महेष्वासा रथयूथपयूथपाः ॥ निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः ॥ १४
ततः प्रववृते युद्धं साल्वानां यदुभिः सह ॥ यथासुराणां विबुधैस्तुमुलं रोमहर्षणं ॥ १५ ॥ ताश्च सौभपतेर्माया
दिव्यास्त्रै रुक्मिणीसुतः ॥ क्षणेन नाशयामास नैशं तम इवोष्णगुः ॥ १६ ॥ ॥ ॥ ॥ ॥

मा तुमुलं लोमहर्षणं रौद्रं ॥ १७ ॥ नैशं गिरिशि भवं तमः उष्णगुः ॥ सूर्य इव ॥ १८ ॥ राम राम यनमः कृष्णायनमः ॥ ॥

राम
७२

किंच विव्याधेति स्वर्णमयानि पुंखानि येषां ते । अयोलोहं तन्मयानि शुल्वान्यग्राणि येषां तैः । ध्वजिनीपालं सेनान्यं सन्नानि
निम्नानि पर्वाणि ग्रंथयो येषां तैः १७ सैनिकान् भटान् नॄन् सारथीन् । १८ । स्वपरसेनयोः वर्तमानाः सर्वे स्वजयाशा स्युः । कदाचिदेकरू
पं कदाचिदेकरूपं क्वचिद् दृश्यते क्वचिन्न दृश्यते । एवं दुर्विभाव्यं वितर्क्यं न स्थूल । २० । किंचित् क्वचिदिति एवं ततडःखस्थितं च स्थूल । २१ । अग्नि

विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः । साल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः ॥१७॥ शतेनाताडयत्साल्वमे
कैकेनास्य सैनिकान् । दशभिर्दशभिर्नॄन्वाहनानि त्रिभिस्त्रिभिः ॥१८॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः ॥
दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः ॥१९॥ बहुरूपैकरूपं तद् दृश्यते न च दृश्यते ॥ मायामयं मयकृतं दुर्विभाव्यं
परैरभूत् ॥२०॥ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितं ॥२१॥ यत्र
यत्रोपलक्ष्येत ससौभः सहसैनिकः ॥ साल्वस्ततस्ततोऽमुंचन् शरान्सात्वतयूथपाः ॥२२॥ शरैरग्न्यर्कसंस्पर्शैराशी
विषदुरासदैः ॥ पीड्यमानपुरानीकः साल्वोऽमुह्यत्परेरितैः ॥२३॥ साल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ न त
त्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥२४॥ साल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः ॥ आसाद्य गदया मौ
र्व्या निहत्य व्यनदद्बली ॥२५॥ प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिंदमं ॥ अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः ॥२६॥

बहुरूपकं ... सर्वतः संस्पर्शो येषां तैः आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वाद् दुरासदैः । द्युः सहेपीडितमानं प्रद्युम्नं कालिवयस्यः सः
... रणांस्तांस्तान् ... न तत्यजुः । २४ । मौर्व्या ... समग्रं व्याहत्य प्रहृत्य । २५ । अपोवाह अन्यतो
निनाय ॥२६॥

श्री भाग द ३ ७३

मन्नमत्तो विनात्लकीवं चिंतं यस्यतेनत्वयास्तुतेन ॥ २७ ॥ पितरौ रामकृष्णावभिसंगम्यतत्या पूर्वक्षात्त्वाताभ्यां पृष्टः स्वयोगं पं किंनु वस्यामीति ॥ २८
भ्रातृजामयो भ्रातृमायाः ॥ निश्चितं मदीयं त्लोकं कथयिष्यंति ॥ तत्कथं तु मत्तं करोति कथं कथमिति ॥ २९ ॥ विभो हेसमर्थ पूतत ॥ अपसर्प

प्रेक्ष्यं मृगं दयां षगीर्णा ॥ २६ ॥ सर्वसंतो स्तुहृन्तेनेक्कार्ष्णि सास्यिमब्रवीत् ॥ अहो अस्मादितं स्तूतयद्रणात्मैपसर्पणं ॥ २७
नयहृनां कुलेजातः स्तूयतो रणविच्युतः ॥ विनामतल्लीवचिंतेनस्तेन प्राप्तकल्मषात् ॥ किंनु वक्ष्येभिसंगम्य पि
तरौ रामकेशवौ ॥ भुङ्गान्नसम्प्युपक्रांतं स्पृष्टस्तात्मनः हसं ॥ २८ ॥ व्युत्क्रमे कथ्यपिष्यंति हसंस्पो भ्रातृजामयः ॥
लोक्यं कुर्थ कथं वीरतवान्यैः कथितं स्तुधे ॥ २९ ॥ सा ॥ थिरुवाच ॥ धर्मविज्ञानता यत्ष्मनृकृतमेतन्मयाविभो ॥ स्तूतं क्
कुगातं रस्तो तरषिंतं सर्वयीरयी ॥ ३० ॥ पतहिंदित्वानुभवानुमयापोवाहितोरणात् ॥ उपस्पृष्टः परेणातिसृष्कितोगद
याहत ॥ ३१ ॥ इति श्री भागवते महापुराणे दशमस्कंधे षट्सप्ततितमोध्यायः ॥ ७६ ॥ श्रीशुक उवाच ॥ स उपस्पृश्यसलिलंदं
म्तः धू सितो हतकार्ष्णकः ॥ नयमांघातयः पार्श्ववीरस्यपन्याहसारथिं ॥ १ ॥ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः ॥ प्रति
हत्यप्रत्यविध्यंधन्नाराचैरष्टभिः स्मयन् ॥ २ ॥

णं धर्मासाह स्तुतइति ॥ ३१ ॥ आपोवाहितः अपनीतः उपस्पृष्टः अपसर्गोपीडां प्राप्त इतिकृत्वा ॥ यतः परेण शत्रुणा गदयाहतास
नूपूर्छितो निःसृततां गतो भवानिति ॥ ३१ ॥ इति श्री भागवते महापुराणे दशमस्कंधटीकायां षट्सप्ततितमोध्यायः ॥ ७६ ॥ सप्त
सकसप्ततितमे नानामायाविचक्षणः ॥ कृष्णेनगत्य साल्वस्तु हतः सोभं च चूर्णितं ॥ १ ॥ दंसितः सन्नद्धः विधमंतं नपयंतं प्रतिहत्य निकृष्य
राम ७३

ष्टानां विनियोमाह चतुर्भिरिति ॥ ३ ॥ सौभेयाः सौभस्थाः ॥ ४ ॥ नवानां रात्रीणां समाहारो नवरात्रं ॥ त्रयाणां नवरात्राणां समाहारस्त्रि
नवरात्रं सप्तविंशतिरहोरात्राणीत्यर्थः ॥ तुमुलमाकुलं घोरं ॥ ४ ॥ परमतमुपन्यस्यति ॥ इंद्रप्रस्थगमनं अर्हचेति ॥ स्वगतमेव पार्थिवं

वतुर्भिश्चतुरो वाहान्हत्वा तमेकेन वाहनं ॥ द्वाभ्यां केतुं ध्वकेतुं च शरेणान्येन वै शिरः ॥ गदसात्यकिसांबाद्या जघ्नुः
सौभपतेर्बलं ॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ॥ ३ ॥ एवं बहूनां साल्वानां निघ्नतामिततेरेतं ॥ भुजंछिन्नवरा
वंतद्भुतं सुतुमुलं मुत्वणां ॥ ४ ॥ शुक उवाच ॥ इंद्रप्रस्थं गतः कृष्णस्तं आहूतो धर्मसूनुना ॥ राजसूयेथ निर्वृत्ते शिशुपा
ले च संस्थिते ॥ ५ ॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां ॥ निमित्तान्यति घोराणि पश्यन्द्वारवतीं ययौ ॥ ६
आह चाहमितो यातः आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥ ७ ॥ वीक्ष्य तत्कदनं स्वानां नि
रूप्य पुररक्षणं ॥ सौभं च साल्वराजं च दारुकं प्राह केशवः ॥ ८ ॥ रथं प्रापय मे सूत साल्वस्यांतिकमाशु वै ॥ संभ्रम
स्तेन कर्तव्यो मायावी सौभराडयं ॥ ९ ॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे परे चारु
णानुजं ॥ १० ॥ साल्वस्तु कृष्णमालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥ ११ ॥ तामाप
तंतीं नभसि महोल्कामिव रंहसा ॥ भासयंतीं दिशः शौरिः सायकैः शतधाच्छिनत् ॥ १२ ॥ ॥ ॥

तावित्यंभितमायां ॥ आर्यमिश्राभिसंगतो बलभद्रसहितः ॥ ७ ॥ दुर्निमित्तदर्शनादाकुलचित्त एवं चिंतयन् ॥ ८ ॥ द्वारिकामागत्य स्वानां कद
नं वीक्ष्य ॥ सौभं च साल्वराजं च वीक्ष्य रामं च पुररक्षणे प्रतिनिधाय पुनर्युद्धपदारुकं प्राहेत्यन्वयः ॥ ९ ॥ तेन त्वया आस्थायसमिपादिति ॥ अरुणानुजं
ध्वजे वर्तमानं गरुडं ॥ १० ॥ हतप्रायस्य बलस्य ईश्वरः ॥ ११ ॥

श्री भाग० द० उ० ७४

तं च साल्वं शरसंदोहैः शरजालैः खं सूर्य इव रश्मिभिरिति सूर्यस्य नीलत्वादिभिराकाशो यथा सो भासित्र अचिंत्यवेगत्वाकल्पादिभिः शरणां र
श्मिसादृश्यं यत्नेनैव रश्मिवत् ॥ शरजालप्रसारणात् सूर्यतुल्यः ॥ श्रीधरस्तु इति ॥ १३ ॥ दोर्वाङ्गं ॥ ७ ॥ सासुः शिशुपालस्य इसंताः स्मा

तं च षोडशभिर्विद्ध्वा बाणैः सौभं चांबरे भ्रमत् ॥ अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः ॥ १३ ॥ साल्वः शौरेस्तु दोः सव्यं
सशार्ङ्गं शार्ङ्गधन्वनः ॥ बिभेद न्यपतद्धस्तात् शार्ङ्गमासीत्तदद्भुतं ॥ १४ ॥ हाहाकारो महानासीद्भूतानां तत्र पश्यतां वि
नद्य सौभराडुच्चैरिदमाह जनार्दनं ॥ १५ ॥ यस्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षतां ॥ प्रमत्तः स सभामध्ये त्वया व्यापा
दितः सखा ॥ १६ ॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥ १७ ॥ श्रीभगवानुवाच
वृथा त्वं कत्थसे मंद न पश्यस्यंतिकेंऽतकं ॥ पौरुषं दर्शयंतीह शूरा न बहुभाषिणः ॥ १८ ॥ इत्युक्त्वा भगवान् साल्वं गदया
भीमवेगया ॥ तताड जत्रौ संरब्धः स चकंपे वमन्नसृक् ॥ १९ ॥ गदायां सन्निवृत्तायां साल्वस्त्वंतरधीयत ॥ ततो मुहूर्त आगत्य
पुरुषः शिरसाच्युतं ॥ २० ॥ देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुदन् = कृष्ण कृष्ण महाबाहो पितस्ते पितृवत्सल ॥ ब
द्ध्वापनीतः साल्वेन सौनिकेन यथा पशुः ॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः ॥ २१ ॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥ कथं राममसंभ्रांतं जित्वाजेयं सुरासुरैः ॥ २२ ॥ साल्वेनाल्पीयसा तात पिता मे बलवान्विधिः ॥ इ
ति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय कृष्णं चेदमुवाच ह ॥ २३ ॥ ॥ ॥ ॥ ॥

कं वमन्नसृक् ॥ अलं बहित त्वया पादितः निहतः ॥ १६ ॥ अपराजितोऽहमिति ॥ मानवंतं ॥ अपुनरावृत्तिं मृत्युं ते तिष्ठेः स्थास्यसि चेत् घृणी दयावान् ॥ २२
२३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तं ५ = रुदन्

र.वे

ति

राम ७४

जनितां जनयितां ईशा येन शक्तिश्चेत ॥२४॥ स्वबोधः स्वतः सिद्धः ज्ञानवानसि स्वजन नेहतः ॥ प्रकृतेर्मच्च य स्वभावेन प्लुतः ॥ निमग्न आसते
अतिष्ठत ॥ ततस्तस्सर्वमा स्तुरीमायामनुध्यत ॥ मायेयमिति ज्ञातवान् ॥ स्वप्नस्वप्नप्रपंचं यथा ॥२५॥ एवं परमतत्त्वप्य ज्ञानेनाकरोतिकेचन

पप्रतेजनितालानोयदर्थेसिद्धजीवसि ॥ वधिष्येवेन्नततलेनमेशा येत्याह वाक्षिशु ॥२४॥ एवंनिर्भर्त्स्य मायावी स्वजनेनान
कडुभेः ॥ उत्कृत्यशिरआदाय स्वस्थं सोमं समाविशत् ॥२५॥ ततोमुहूर्ते प्रकृत्यांनुप्लुतः स्वबोध आसले स्वजनानुकंप्या
तः ॥ महानुभावस्तदनुध्यदास्तुरीमायां समालक्ष्य प्रसूतां मयोदितां ॥२६॥ ततत्र हूतं तन्नपितुः कलेवरं प्रबुद्ध आज्ञो सम
पश्यत्सुतः ॥ स्वप्नं यथा चाबरचारिणां रिपुं सौभस्यमालोक्य निहंतमुद्यतः ॥२७॥ एवं वदंति राजर्षे ऋषयः केचनान्वि
न्विताः ॥ यत्स्ववाचो विरुध्येत नूनं तेन स्मरंत्युत ॥२८॥ क शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क चाखंडितविज्ञाने
नैश्वर्यस्तुरेंद्रितः ॥२९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीकृष्णः संकर्ष
नान्विताः ॥ सर्वापरानुसंधानरहितः ॥ तदाहं पत्रस्ववाचइति ॥ तत्रानुस्मरंती स्यर्थः ॥ न तावद्राजत्स्त्र यार्थं ग्रामेन सहगतः ॥ श्रीकृष्णः संकर्ष
नमत्तुज्ञाप्येति सर्वमुक्तत्वात ॥२८॥ असंभावितं चेत्याह क शोकमोहाविति भयं वाऽनिर्मित्तदर्शन कृतं नूनं हन्तु ॥ पुरीमेतीति यदुक्तं तत्रह
त्वाकार्ष्ण्यपतदिति ॥ उक्तं तत्रयं वाचेति ॥ उक्तं ते अतेन संभवेयोपांते ॥ आर्वसितानि विज्ञानज्ञानैश्वर्याणि यस्य सः ॥ तत्र विज्ञानं स्वरूपवि
षयं ज्ञानं बाह्यविषयं २९

किंच ॥ यस्य पादसेवायां ऊर्जिता दृढा लाया ॥ आत्मविद्यातया अनादिरविद्या सा वा आत्मविपर्ययग्रहः तत्र अहंकारः ॥ स्वार्थे इति व्याप्यादिलक्षणः ॥ तं
हित्वा त्वितां शाश्वतं निसंततः ॥ ऐश्वर्यं पदं च तस्य सतां गतेः ॥ ऊतो न मोह इति ॥ अतो नेतद्वचनं सम्यगित्यर्थः ॥ ३२ ॥ किं तर्हि सत्यं तदाह तं शस्त्रपूगैरि

यत्पादसेवोर्जितआत्मविद्या हिन्वंत्यनाद्यात्मविपर्ययग्रहं ॥ लभंत आत्मीयमनंतमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ॥ ३२ ॥
तंशस्त्रपूगैःप्रहरंतमोजसाशाल्वंशरैःशौरिरमोघविक्रमः ॥ विध्वाच्छिनद्वर्मधनुःशिरोमणिंसौभंचशत्रोर्गदयारुरोज
ह ॥ ३३ ॥ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्यु-
तमभ्यगाद्द्रुतं ॥ ३४ ॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं ॥ वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्ब-
भौ सार्क इवोदयाचलः ॥ ३५ ॥ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः ॥ वज्रेण वृत्रस्य यथा पुरंदरो बभूव
हाहेति वचस्तदा नृणां ॥ ३६ ॥ तस्मिन्निपतिते पापे सौभे च गदया हते ॥ नेदुर्दुंदुभयो राजन् दिवि देवगणेरिताः ॥ ३७ ॥ सखीना
मपचितिं कुर्वन् दंतवक्त्रो रुषाभ्यगात् ॥ ३८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ श्रीशुक उवाच ॥
शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्मतिः ॥ परलोकगतानां च कुर्वन्पारोक्ष्यसौहृदं ॥ १ ॥ एकः पदातिः संक्रुद्धो गदापा-

तिर्वर्म कवचं शिरोमणिभंज ॥ ३३ ॥ लयार्कसन्निभं प्रलयकालीनसूर्यसदृशं ॥ ३५ ॥ देवगणैरीरिताः ॥ ३७ ॥ किंच सखीनामिति ॥ ३८ ॥ इति दशमे सप्तसप्ततितमोऽध्या-
यः ॥ ७७ ॥ ततोऽष्टसप्ततितमे दंतवक्त्रविदूरथौ ॥ हत्वा हि दूरे रामः सूतं तत्रावधीत् ॥ परोक्षे सौहृदं परोक्षे करणीयं सुहृत्कार्यं ॥ १ ॥ सखीनामपचि-
तिं कुर्वन्निति स्वजनकृतदेवाह शिशुपालस्येति ॥ २ ॥

७५

स्वामी २ से

श्रम्यधात शक्तिसेनोथ ॥ ३ ॥ मुकुंदं प्राह दुर्मद इत्यादेर्थिद्धेवमपरं तात्पर्यं देवपरमार्थस्तु दुर्मदः ॥ मन्मदः प्राह मुकुंदं तृतीये जन्मनि मुक्तिदानार्थं
ममात ॥ अद्येति जन्मत्रयेणान्विषमाणोपि ब्रह्मशापावसाने भवान्मम त्वं मे दृष्टिपथं गतः ॥ एवं द्विष्यादिष्या भद्रं अति हर्षगीष्पा ॥ ४ ॥ किं
च हे कृष्ण त्वमस्माकं मातुलत्वेयो बंधुः एवमपि मित्रध्रुक मित्राणि घातितवान्मां च जिघांससि ॥ तस्मादस्माकं त्वत्तो धृष्टुः सनकाद्यनुग्रह
प्राप्तोत्पन्नेन दुर्वैरिः ॥ अतस्त्वामोतावन्मात्रमहं याचे ॥ किं तदाह ॥ हे अमंद सर्वसहनसमर्थत्वात्र धर्मेण विहितगदयात्वां हनिष्येत्प्रहरिष्यामि ॥ ता

यो

तं तथा पंतमालोक्य गदमाद्दाय सत्वरः ॥ अक्रूरत्वथाल्कंमसः सिंधुवेलेव बत्यधात् ॥ ४ ॥ गदास्तु यमका हर्षो मुकुंदं प्रा
ह दुर्मदः ॥ दिष्ट्यादिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥ ५ ॥ त्वं मातुलेयेनः कृष्ण मित्रध्रुक मां जिघांससि ॥ अतस्त्वां गदया
मंद हनिष्येवज्रकल्पया ॥ ६ ॥ तर्हि ज्ञात्राणापमुपेष्यत्तामित्राणां मित्रवत्सलः ॥ बंधुहत्यामरिं हत्वा व्याधिं देहचरं यथा ॥ ७ ॥ एवं रु
द्रैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं ॥ गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

मेकैवारं सहस्वेति ॥ ननु वक्रात्तुल्यां त्वं हृदां कोवासहेत ॥ नैवमित्याह ॥ अवक्रकल्पया उत्पलमालावदतिकोमलयेत्यर्थः ॥ नन्वेवं हननेक
त्वं वस्तु कथार्थस्तत्राह ॥ तर्हीति अज्ञानक्षियते ज्ञोयस्मात ॥ हे सर्वज्ञेत्यर्थः तत्स्वामिनमेत द्वैहि हे संबंधेन बंधुहत्यां पंच ब्रह्मशापेन तु प्राप्तं त्वेव
तीतं त्वा हत्वा मित्राणामनृणत्वमुपैति ॥ विशेषेणाध्यीयते मनसि चिंत्यते इति व्याधिस्तं यथा मितपाचरतीति तथा ॥ तमीश्वरं हत्वाद्य
धर्मेणाधर्महतेगत्यर्थस्य ज्ञानार्थत्वात् ॥ ज्ञात्वेति वा ॥ तेन यथापित्रादीनामानृण्यमुपयामि तद्वदिति ॥ ६ ॥ रूक्षैरित्यादि प्रतीत्यभिप्रा
येण तोत्रैरंकुशादिभिः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

१६६

एवं श्रीकृष्णो बलानपि लीलया जयत्येवेति ॥ कृष्णस्तु कदाचित् जरासंधादिभिर्निर्जित इति ॥ पशुदृष्टीनामीयते ॥ नित्यजये हेतवः योगेश्वरः भगवान् जगदीश्वर इति ॥ १६ ॥ विहरार्थं [illegible] ॥ कृष्णस्य पार्थमित्रत्वात् [illegible] ॥ तत्र संग्राम [illegible] तीति प्रतिस्रोतं प्रतिलोमं ॥ १८ ॥

गदयाभिहतोप्याजौ न चचाल यदूद्वहः ॥ कृष्णोपि तमहन्गुर्व्या कौमोदक्या स्तनांतरे ॥ ८ ॥ गदानिर्भिन्नहृदय उद्वमन्रुधिरं मुखात् ॥ प्रसार्य केशबाह्वंघ्रीन्धरण्यां न्यपतद्व्यसुः ॥ ९ ॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं ॥ पश्यतां सर्वभूतानां यथा चैद्यवधे नृप ॥ १० ॥ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्माभ्यामुच्छ्वसंस्तज्जिघांसया ॥ ११ ॥ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना ॥ शिरो जहार राजेंद्र सकिरीटं सकुंडलं ॥ १२ ॥ एवं सौभं च शाल्वं च दंतवक्रं सहानुजं ॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः ॥ १३ ॥ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः ॥ १४ ॥ उपगीयमानविजयः कुसुमैरभिवर्षितः ॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं ॥ १५ ॥ एवं योगेश्वरः कृष्णो भगवान्जगदीश्वरः ॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः ॥ १६ ॥ श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः ॥ तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥ १७ ॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् ॥ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥ १८ ॥ पृथूदकं बिंदुसरस्त्रितकूपं सुदर्शनं ॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं ॥ १९ ॥ यमुनामनु यान्येव गंगामनु च भारत ॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते ॥ २० ॥

स्रोतेति प्रतिस्रोतं प्रतिलोमं ॥ १८ ॥ सुदर्शनतीर्थं ॥ १९ ॥ यमुनामनु यानि तीर्थानि गंगामनु च यानि तानि सर्वाणि गत्वा नैमिषारण्यं जगाम ॥ २० ॥

अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥२१॥ महर्षेर्व्यासस्य ॥२२॥ सूतं प्रतिलोमजं न कृतं प्रह्वणं नमनमञ्जलिश्च येन तं अध्यासीनं च तान् ॥ तेभ्योप्युच्चैरासी-
नं इत्यर्थः ॥२३॥ अन्तान्वा ॥ अध्यास्त इति चेत् ॥ नैवमित्याह ॥ अस्मानिति ॥२४॥ ननु बहुज्ञः कथमेवं कुर्यात्तत्राह ॥ अदान्तस्येति ॥ गुणाय यथा नो

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥ सोर्चितः सपरिवारः कृता-
सनपरिग्रहः ॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥२२॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणाञ्जलिं ॥ अध्यासीनं च तान्
विप्रांश्चुकोपोद्वीक्ष्य माधवः ॥२३॥ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः ॥ धर्मपालांस्तथैवास्मान्वधमर्ह-
ति दुर्मतिः ॥२४॥ ऋषेर्भगवतो भूत्वा शिष्योधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥२५॥ अदान्तस्यावि-
नीतस्य वृथा पंडितमानिनः ॥ न गुणाय भवंति स्म नटस्येवाजितात्मनः ॥२६॥ एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः
वध्या मे धर्मध्वजिनस्ते हि पातकिनोधिकाः ॥२७॥ एतावदुक्त्वा भगवान्निवृत्तोसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेना-
हनत्प्रभुः ॥२८॥ हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥२९॥ अस्य ब्रह्मासनं
दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥३०॥ अज्ञानतेवाचरितस्त्वया त्वद्वधो यथा

विनाशनुष्ठानाय ॥२६॥ विज्ञानधर्मस्तां अन्यद्वा किंचित्करोति ॥ किं न चेति चेत् अत आह ॥ एतदर्थ इति धर्मध्वजिनः उत्तमलिंगधारिणः ॥२७॥ भावित्वा-
दित्य ॥ नहि भवितव्यं केनापि परिहर्त्तुं शक्यत इत्यर्थः अहनत् ॥२८॥ तेत्वया अधार्मिकप्रतिलोमजवधः कोयमधर्म इति चेत्तत्राहुः अस्येति ब्रह्मासनं प्र-
वचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिन् तदायुश्च दत्तमिति ॥३०॥

श्री भाग॰ द॰ उ॰ ७७

ब्रह्मवधेपिकिं ममेश्वरस्येति चेति ॥ सत्यमेवं ॥ तथापि प्रायश्चित्तं कर्तव्यमित्याशयेनाह ॥ योगेश्वरस्येति साधर्न आम्नायो ॥ ब्राह्मणेनहंत
व्यइत्यादिलक्षणः ॥ ३९ ॥ तथाप्येतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं ॥ हे लोकपावन अनन्यचोदितः स्वयमेव भगवान् यदि करिष्यति
तर्हि लोकसंग्रहो भविष्यति ॥ नान्यथेति ॥ ४० ॥ वधस्य निर्वेशं प्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतां उपदिश्यतां ॥ ४१ ॥ किंच वनेहे
मुनयः एतस्य दीर्घमायुः ॥ सत्वं बलमिंद्रियं तन्यादर्व ॥ अस्मत्त्वयज्ञ वह्निराशासितमध्ये चिंतं तत्कृतं सर्वं ॥ ४७ ॥ असत्रादीनां सत्यतास्य

योगेश्वरस्य भवतो नान्मयो पिनियामकः ॥ यद्येत कृष्णहत्यायाः पावनं लोकपावन ॥ ३५ ॥ चरिष्यति भवाल्लोकसंग्रहो
नान्यचोदितः ॥ श्रीभगवानुवाच करिष्ये वर्द निर्वेशं लोकानुग्रहकाम्यया नियमः प्रथमे कल्पे यावान्सत्वविधीयतां ॥ ३
३३ ॥ दीर्घमायुर्भवेतस्य सत्वमिंद्रियमेव च ॥ आशासितं च यत्कृतसाधये योगमायया ॥ ३५ ॥ श्रीभगवानुवाच ॥ ऋषयः
अस्त्रस्य बलवीर्यं स्य च्छे नोस्माकमेव च ॥ यथा भवेद्वचः सत्यं तथा रामविधीयतां ॥ ३५ ॥ श्रीभगवानुवाच आत्मावैपुत्र
उत्पन्न इतिवेदानुशासनं ॥ तस्माद्स्य भवेद्वक्ता आयुरिंद्रियसत्ववान् ॥ ३६ ॥ किं चेकामो मुनिश्रेष्ठा ब्रूताहंकरवाण्यथ ॥
अज्ञातान्वत्वपचितिं यथा मे चिंत्यतां बुधाः ॥ ३७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

था भवेत् ॥ अस्माकं वचः ॥ सत्यं यथा भवेत्तथा विधीयतामित्यर्थः ॥ ३४ ॥ तत्संपादयन्नाह ॥ आत्मा च इति ॥ अंगादंगात्संभवसि हृदया
दभिजायते ॥ आत्मा वै पुत्रनामासि जीव शरदः शतमित्यादि ॥ वेदानुशासनं वेदवचनं तस्माद्स्य रोमहर्षणस्य पुत्र उग्रश्रवाः ॥ भगव
तानुग्रहेण प्रवक्ता भवेत् ॥ सर्वायुरादिमान् भवेत् ॥ अतः साक्षादजीवनात् ॥ अस्य मृतोस्य सत्यता मंत्र रूपेण वायुरादिसिद्धेर्युष्म
द्वचनस्यापि सत्यतास्मादिति भावः ॥ ३६ ॥ प्रथमं तावदस्पेक्षितं कथयत तदहं करिष्यामीत्याह ॥ किंच कामं इति किंचिद्विषयो वः कामो वर्तते
तत द्वूतेति ॥ अथानंतरं ब्रह्मदंडं गृहीत्वा अपचितिं निःकृतिं मन्नानन्तो मे हे बुधाः यथा यच्चिंत्यताम् अपि विवितिरिति ॥ ३७ ॥ ॥ ॥

द॰ उ॰ ७७

पृथक् संतापदं पापं तत्तर्कव्यंकः पृथयंति ॥ इल्वलस्येति द्वाभ्यां ॥ ३७ ॥ प्रायश्चित्तमाह ततश्चेति परीत्य प्रदक्षिणीकृत्य ॥ सुसमाहितः ध्यानादि
गुणविशेषादेकात्मभावमुक्तामिति विरोधः सुसमाहितः कामक्रोधादिरहितः ॥ चरित्वा द्वादश मासान् ॥ ४० ॥ इति श्रीदशमेऽष्टसप्ततित

इल्वलस्य सुतो घोरो बल्वलो नाम दानवः ॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥ ३७ ॥ तं पापं जहि दाशार्ह
ऋषय ऊचुः ॥
तन्नः शुश्रूषणं परं ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं ॥ ३८ ॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः ॥ चरित्वा द्वा
दश मासांस्तीर्थस्नायी विशुध्यसे ॥ ४० ॥ इ॰ श्रीभाग॰ ते महापुराणे दशमस्कंधे बलदेवयात्रायां सूतवधेऽष्टसप्ततित
मोऽध्यायः ॥ ७८ ॥ श्रीशुक उवाच ॥ ततः पर्वण्युपावृत्ते प्रचंडः पांसुवर्षणः ॥ भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः ॥ १
ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितं ॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥ २ ॥ तं विलोक्य बृहत्कायं भि
न्नांजनचयोपमं ॥ तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ॥ ३ ॥ सस्मार मुशलं रामः परसैन्यविदारणं ॥ हलं च दैत्य
दमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ तमाकृष्य हलाग्रेण बल्वलं गगनेचरं ॥ मुशलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥ ५ ॥
सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन् ॥ मुंचन्नार्तस्वरं शैलो यथा वज्रहतोऽरुणः ॥ ६ ॥ संस्तुत्य मुनयो रामं
प्रयुज्यावितथाशिषः ॥ अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा ॥ ७ ॥ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजां ॥ रामा
य वाससी दिव्ये दिव्यान्याभरणानि च ॥ ८ ॥ ॥ ॥

मोऽध्यायः ॥ ७८ ॥ ऊनाशीतितमे रामो बल्वलं हि द्विजद्रुहं ॥ निहत्य तीर्थस्नानाद्यैः सूतहत्यामपानुदत् ॥ पुरा हतेन प्राणेभिन्नो विधिवदीरितोऽञ्जनचयः
उपमा यस्य तं अति अतिशक्तमित्यर्थः तप्तताम्रवत् शिखाश्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुटीयुक्तं च वक्त्रं यस्य तं ॥ ३ ॥ अरुणो रुधिरेण
दैत्यः यथा शैलो धातुभिः श्रियो धामानि अम्लानानि पंकजानि यस्यां तां ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

श्री
भाग
१०
७८

किंतत्सरः यत इति आस्रवत ॥ उदगात ९ ॥ अनुस्रोतेन अनुलोमतः पुलहाश्रमं हरिक्षेत्रं ॥ १० ॥ गोमतीं गंडकीं विपाशायां च स्नात्वा शोणे च

अथैतैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः ॥ स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥ अनुस्रोतेन सरयूं प्रयागमुप
गम्य सः ॥ स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं ॥ १० ॥ गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः ॥ गयां गत्वा पितॄ
निष्ट्वा गंगासागरसंगमे ॥ ११ ॥ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च ॥ सप्तगोदावरीं वेणीं पंपां भीमरथीं ततः ॥ १२ ॥ स्कं
दं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं ॥ द्राविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः ॥ १३ ॥ कामकोष्णिं पुरीं कांचीं कावेरीं
च सरिद्वरां ॥ श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः ॥ १४ ॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा ॥ सामुद्रं सेतुमगम
न्महापातकनाशनं ॥ १५ ॥ तत्रायुतमदाद्धेनूः ब्राह्मणेभ्यो हलायुधः ॥ कृतमालां ताम्रपर्णीं मलयं च कुलाचलं ॥ १६ ॥
तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च ॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतोर्णवं ॥ १७ ॥ दक्षिणं तत्र कन्याख्यां दुर्गां
देवीं ददर्श सः ॥ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं ॥ १८ ॥ विष्णुः संनिहितो यत्र स्नात्वास्पर्शद्गवायुतं ॥ ततोभिव्रज्य भ
गवान्केरलांस्तु त्रिगर्तकान् ॥ १९ ॥ गोकर्णाख्यं शिवक्षेत्रं सांनिध्यं यत्र धूर्जटेः ॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः ॥ २० ॥
तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं ॥ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी ॥ मनुतीर्थमुपस्पृश्य प्रभासं पुन

रामकृ० ३

आप्लुतः दृष्ट्वा संसज्य ॥ श्रीशैलं श्रीपर्वतं ॥ १३ ॥ कांचीं च पुरीं दक्षिणमर्णवं फाल्गुणं अनंतशयनं पंचाप्सरसं सरः ॥ १७ ॥ स्पर्शितं अस्पर्शयत केरलादीन् देशान् ॥ १९ ॥ द्वीपमयनं यस्याः तां ॥ २० ॥

राम
७८

विनशंतं कुरुक्षेत्रे ॥२२॥ विवक्षुः वक्तुमिच्छुः किं वक्ष्यतीति भयात्तूष्णीमासन्निति ॥२३॥ अन्यः पराजयो वा रणः संग्रामः ॥२६॥ अर्थवद्वाक्यं ॥२
दिष्टं चीनं कर्मास

श्रुत्वा हितैः कृष्यमानं कुरुपांडवसंयुगे ॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः ॥२१॥ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे ॥ वार
यिष्यन्विनशनं जगाम यदुनंदनः ॥२२॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥२३॥
गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥ मंडलानि विचित्राणि चरंताविदमब्रवीत् ॥२४॥ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोद
र ॥ एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं ॥२५॥ तस्मादेकतरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोन्यो वा विरमत्वफलो
रणः ॥२६॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरंतावन्योन्यं दुरुक्तं दुष्कृतानि च ॥२७॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं
ययौ ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥२८॥ तं पुनर्नैमिषं प्राप्तमृषयो याजयन्मुदा ॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं
॥२९॥ तेभ्यो विशुद्धं विज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ॥३०॥ स्वपत्न्यावभृथस्नातो ज्ञातिबंध
सुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ॥३१॥ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः ॥ अनंतस्याप्रमेयस्य
मायामर्त्यस्य संति हि ॥३२॥ येनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः ॥ सायं प्रातरनंतस्य विष्णोः स दयितो भवेत् ॥३३॥ इति श्री भा
गवते महापुराणे दशमस्कंधे एकोनशीतितमोध्यायः ॥७९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दिष्टं चीनं कर्मास मुपागतः संगतः ॥२८॥ क्रत्वंगं यज्ञमूर्तिं ॥२९॥ आत्मनि अधिष्ठाने विश्वं सर्वात्मत्वेनैव विदुः पश्यंतीति तद्विशुद्धं ज्ञानं वितरत् ॥३०॥ एको
नशीतितमोध्यायः ॥७९॥

श्री
भाग
द३
७९

अथाशीतितमेध्यायेः श्रीदामानं गृहागतं ॥ संपूज्य सख्यदर्शी पृथुग्रासकथांमुदा ॥ १ ॥ स्वराशिम्यांक्वोहरिः स्वरा चकार शंसतां ॥ अतः परं वि
नैवंतं द्विजोपकारमाचरात्तगामचरं निश्रुत्वा पुनर्मुकुंदवीर्याणि शुश्रूषति हे भगवन् श्रोतुमिच्छामीन्वयः ॥ उत्तमश्लोकस्य सत्योभ्मनोऽह
रः ॥ विषयैवेतस्य पूतनिकाः कथा विशेषज्ञः ॥ सार वत्स विषादं प्राप्तः ॥ २ ॥ यथा श्रवणं स्तुवत ॥ दृष्टांत तथान्यापार्थोनाहे ॥ सावागितितावेव

राजोवाच ॥ भगवन्यानि चान्यानि मुकुंदस्य महात्मनः ॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामि हे प्रभो ॥ १ ॥ को नु श्रुत्वास
कृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥ २ ॥ सा वाक् यया तस्य गुणान्गृणीते करौ च
तत्कर्मकरौ मनश्च ॥ स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥ ३ ॥ शिरस्तु तस्योभयलिंगमानमेत्तदे
व यत्पश्यति तद्धि चक्षुः ॥ अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं ॥ ४ ॥ सूत उवाच ॥ विष्णुरातेन संपृ
ष्टो भगवान्बादरायणिः ॥ वासुदेवे भगवति निमग्नहृदयो भवेत् ॥ ५ ॥ शुक उवाच ॥ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्म
वित्तमः ॥ विरक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः ॥ ६ ॥ यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी ॥ तस्य भार्या कुचैलस्य क्षु
त्क्षामा च तथाविधा ॥ ७ ॥

करोयोतत्कर्मकर्ता रोजदेव मनः यन्स्थिरजंगमेषु तं स्मरेत् यत्तस्य पुण्याः कथाः शृणोति स एव कर्णः ॥ ३ ॥ उभयात्लिंगां स्थिरजंगमं
वृतस्मै वत्लिंगामिति ॥ मत्वा आनमेत ॥ तदेव शिरः तदेव तस्य लिंगमिति मत्वा यत्पश्यति तदेव चक्षुः ॥ गोत्येचांगानि यानि पादोदकं भ
जतीति ॥ तथाविधा कुचैला किंचस्तुवदामाय किंचित्संपतं तस्मै परिविष्यस्वयं क्षुधाजीर्णा ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम
७९

म्लायताशुष्यता सीदमाना भर्त्रा भोगसंपादशक्त्यावसीदती वेवेपमाना भयेन॥ कंपमाना भोजवृष्ण्यंधकेश्वर इति तत्स्वीकारमात्रेण सर्वं ते दास्यतीति
भावः॥१५॥ नात्यभीष्टान्न परिपाकविरसत्वात्॥१६॥ अयमस्ति किमसीति प्रश्नः॥१७॥ महत्यं मम गुल्मानि रक्षार्थं सैन्यस्थानानि कक्षाः प्रतोलीः॥ अती

पतिव्रता पतिं प्राह म्लायता वदनेन सा॥ दरिद्रं सीदमाना सा वेपमानाभिगम्य च॥८॥ ननु ब्रह्मन् हि भगवतः सखा साक्षाच्छ्रियः
यः पतिः॥ ब्रह्मण्यश्च शरण्यश्च भगवान् सात्वतर्षभः॥९॥ तमुपेहि महाभाग साधूनां च परायणं॥ दास्यति द्रविणं भूरि सीद
ते ते कुटुंबिने॥१०॥ आस्ते धुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः॥ स्मरतः पादकमलमात्मानमपि यच्छति॥११॥ किं त्वर्थकामान्
भजतो नात्यभीष्टान् जगद्गुरुः॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मुहुः॥१२॥ अयं हि परमो लाभ उत्तमश्लोकदर्शनं॥ इति
संचिंत्य मनसा गमनाय मतिं दधे॥१३॥ अप्यस्त्युपायनं किंचित् गृहे कल्याणि दीयतां॥ याचित्वा चतुरो मुष्टीन् विप्रान् पृथुकतं
डुलान्॥१४॥ चैलखंडेन तान् बद्ध्वा भर्त्रे प्रादादुपायनं॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल॥१५॥ कृष्णसंदर्शनं मह्यं कथं
स्यादिति चिंतयन्॥ त्रीणि गुल्मान्यतीयाय त्रिभिः कक्षाश्च सद्विजः॥१६॥ विप्रो गम्यांधकवृष्णीनां गृहेष्वच्युतधर्मिणां॥ गृहं द्व्यष्ट
सहस्राणां महिषीणां हरेर्द्विजः॥१७॥ विवेशैकतमं श्रीमत् ब्रह्मानंदं गतो यथा॥ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः॥
१८॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा॥ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः॥१९॥ प्रीतो विमुंचदब्बिंदून्नेत्राभ्यां
पुष्करेक्षणः॥

यायत्यतिक्रम्य जगाम सद्विजः द्विजैः सहितः॥ ततश्चागम्यादुर्गमा येंधकादयस्तेषां गृहेषु॥ तथा हरेर्द्व्यष्टसहस्राणां च ये गृहास्ते
षु मध्ये॥ श्रीमत् एकतमं गृहं॥ विवेश तदा च महिद्विजो ब्रह्मानंदं गतो यथा तथाबभूवेति शेषः पर्यग्रहीत् पर्यरंभत् अकिंहृत् आनंदाद्भूणि १९

समर्हणं नत्रुपायनं उपहृत्य समर्पयो दावनेजनी रपः॥ २०॥ धमनीभिः सिराभिः सततं व्याप्तं॥ २३॥ अवधूतं मलिनं॥ २४॥ विस्मयमाह॥ किमनेनेति द्वा
भ्यां संस्तुतः संमानितः॥ २६॥ सतो वसतो गृह्य गृहीत्वा॥ भार्याऊढा मधिरोणीतानवेति॥ गृहस्थालिंगदर्शनात्॥ भोगदर्शनाच्च संशयादिव प्रश्नः

अथोपवेश्य पर्यंके स्वयं चक्रे समर्हणं॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः॥ २०॥ अग्रहीच्छिरसा राजन् भगवान् लो
कपावनः॥ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः॥ २१॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा॥ अर्चित्वावेद्य तांबूलं गां
च स्वागतमब्रवीत्॥ २२॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं॥ देवी पर्यचरत्त्वेक्या चामरव्यजनेन वै॥ २३॥ अंतःपुरजनो दृष्ट्वा
कृष्णेनामलकीर्तिना॥ विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितं॥ २४॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा॥ श्रिया ही
नेन लोकेऽस्मिन् गर्हितेनाधमेन च॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः॥ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोऽग्रजो यथा॥ २५॥
कथयांचक्रतुर्गाथाः पूर्वं गुरुकुले सतोः॥ आत्मनो ललिता राजन् करौ गृह्य परस्परं॥ २७॥ श्रीभगवानुवाच॥ अपि ब्रह्मन् गुरु
कुलाद्भवता लब्धदक्षिणात्॥ समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा॥ २८॥ प्रायो गृहेषु ते चित्तमकामविहितं तथा॥
नैवातिप्रीयसे विद्वन् धनेषु विदितं हि मे॥ २९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अप्रतिषेधार्तुं ह्याह मन्त्र मतं मन्वाह॥ प्राय इति॥ तर्हि ते चित्तं नूनमकामविहतं कामैर्विहितं न भवेति मे वीदितं॥ तथा हि धनेषु वस्त्रादिषु नैवा
तिप्रीयसे हे विद्वन्॥ इति विद्वत्पक्षे तत्त्वं ब्रह्मक्रमितिभावः॥ २९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ सम॥

कामात्मत्वाभावे किं गृहधर्मेणेत्याशंक्याह ॥ केचिदिति ॥ दैवी ईश्वरमायारचिताः प्रकृतीर्विषयवासनास्तन्वंतः ॥ कामैरनाक्रांतचेतसामपि
कर्मकरणे दृष्टांतः ॥ यथाहमिति ॥ लोकसंग्रहं लोकस्य संग्रहो ग्रहणं यथा भवति ॥ तथाहमीश्वरोऽपि कर्माणि यथाकरोमि तद्वत् ॥ २० ॥ नोआ
वयोर्ये तौ गुरोः विज्ञेयं परमात्मतत्त्वं तमसः संसारस्य ॥ २१ ॥ तत्रात्मज्ञानप्रदस्य गुरोरत्यंतं मत्स्वरूपत्वं वक्तुं पुरुषस्य त्रीन्गुरून्नाह सचाद्इति ॥ इह
संसारे यत्र संभवो जन्म मातृ स पिता तावदाद्यः ॥ प्रथमो गुरुः ॥ ततः कर्मविद्याप्रदं गुरुमाह ॥ द्विजातेरिति ॥ ततः पुंसः सत्कर्मणा यत्र संभवः उ

केचित्कुर्वंति कर्माणि कामैरहतचेतसः ॥ त्यजंतः प्रकृतीर्दैवीर्यथाहं लोकसंग्रहं ॥ २० ॥ कश्चिद्गुरुकुले वासं ब्रह्मस्वर
स्मरस्मिन्नो यतः ॥ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥ २१ ॥ सर्वसत्कर्मणां साक्षात् द्विजातेरिह संभवः ॥ आ
द्योगयत्राश्रमिणां यथाहं ज्ञानदो गुरुः ॥ २२ ॥ नान्यर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ॥ ये मया गुरुणा वाचा तरं
त्यंजो भवार्णवं ॥ २३ ॥ नाहमिज्याप्रजातिभ्यां तपसोपशमेन च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ २४ ॥ ॥

पनीयवेदाध्यापक इत्यर्थः ॥ स द्वितीयो गुरुः यथाहमीश्वरस्तथा प्रथमोऽपि स इत्यर्थः ॥ ब्रह्मविद्याप्रदं गुरुमाह ॥ आश्रमिणां
सर्वेषामपि ज्ञानबोधः स तु साक्षादहमेवेति ॥ २२ ॥ अतो ज्ञानप्रदगुरुरूपमाश्रित्य ॥ ये संसारं तरंति ते उत्तमा इत्याह ॥ नन्विति हे ब्रह्मन्
नृतेन तु वर्णाश्रमवतां मध्ये अर्थकोविदाः ॥ इह मनुष्यजन्मनि तत्रापि वर्णाश्रमवत्त्वसति ये मया गुरुरूपेण वक्त्रा वाचा उपदे
शमात्रेणांजः ॥ स्वार्थे नैव भवार्णवं तरंति ज्ञानप्रदाद्गुरोरधिकः ॥ सेव्यो नास्तीत्युक्तं ॥ २३ ॥ अत एतद्भजनादधिको धर्मश्च नास्तीत्याह
नाहमिति ॥ इज्या गृहस्थस्य धर्मः प्रजापतिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलभ्यते ताभ्यां तथा तपसा वानस्थस्य धर्मेणोपशमेन प
तिधर्मेण वा अहं परमेश्वरः तथा न निष्ठोऽयं यथा सर्वभूतात्मापि गुरुशुश्रूषयेति ॥ २४ ॥

श्री
भाग॰
द॰ उ॰
८९

किंच ॥ अस्माकं गुरुशुश्रूषणं ॥ किमपि देवादेवस्संपन्नं ॥ तत्किं त्वया स्मर्यते इति पृच्छति ॥ अपि न इति ॥ गुरौ निवसतामस्माकं यत्किम
पि वृत्तं तत् उदितं कदाचित् ॥ ३५ ॥ अपर्तौ अप्राप्ते ऋतौ अकाल इत्यर्थः ॥ वातश्च वर्षं च अनयोः समाहारः स्तनयित्नवो गर्जितानि चाभव
न् ॥ ३६ ॥ निम्नं कूलं च तत्सु उन्नतं च स्थानं ॥ ३७ ॥ अंबुनां संप्लवः आमिश्रणं यस्मिन्नेकोदके तस्मिन्वने इत्यर्थः ॥ परिबभ्रिम भ्रमणे इत्यस्मा

अपि नः स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ ॥ गुरुदारैश्चोदितानामिंधनानयने क्वचित् ॥ ३५ ॥ प्रविष्टानां महारण्यमपर्तौ सुमह
द्द्विज ॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ॥ ३६ ॥ सूर्यश्चास्तं गतस्तावत्तमसा चावृता दिशः ॥ निम्नं कूलं जलमयं न प्राज्ञा
यत किंचन ॥ ३७ ॥ वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे ॥ दिशोऽविदंतोऽथ परस्परं वने गृहीतह
स्ताः परिबभ्रिमातुराः ॥ ३८ ॥ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः ॥ अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान्
॥ ३९ ॥ अहो हे पुत्रका यूयं अस्मदर्थेऽतिदुःखिताः ॥ आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ॥ एतदेव हि सच्छिष्यैः
कर्तव्यं गुरुनिःकृतं ॥ ४० ॥ यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ॥ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः ॥
४१ ॥ छंदांस्ययातयामानि भवंतीह परत्र च ॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु ॥ ४२ ॥ ॥ ॥ ॥ ॥

दुःखितोः परितो बभ्रिम इडागमः छंदसः भावाभावात् ॥ एवं इत्यर्थः ॥ ३९ ॥ उवाच कृपया श्लोकत्रयीयया व्यंक्तार्थ इत्याह ॥ अहो इति
आत्मा देहः ॥ ४० ॥ गुरोर्निष्कृतं प्रत्युपकारः सर्वे अर्था यस्मात्स आत्मा देहः तस्यार्पणं विनियोगः ॥ ४१ ॥ अयातयामानि यातो यामो
यस्यान्नस्य तद्गतसारं भवति तद्वदन्यदपि गतसारं गौण्या वृत्त्या यातयामं तदुच्यते ॥ अगतसाराणि छंदांसि मत्तोऽधीयमानानि भवंती
त्यर्थः ॥ इत्थंविधानि एवंप्रकाराणि अनेकानि इष्टानि किं त्वया स्मर्यंत इति शेषः ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम

राम
८९

अस्मपत्रं

फलितस्तुपसंहरति गुरोरिति ॥ ७३ ॥ अस्माभिः किमनिर्दिष्टं तत्र संपन्नं येषाम स्माकं भवता सह वासो भूत ॥ ७४ ॥ भवस्तु सर्वमेतद्धि इंबनमा :८०

त्रमित्याह ॥ यस्यातिकं दोमयं वेदाख्यं ब्रह्म सतघाश्रो यस्तामपवनं उजमस्थानं ॥ देहो मूर्तिर्यस्मात्स ॥ ७५ ॥ इतिश्री दशमे अशीतितमोध्यायः

गुरोरनुग्रहेणोव कुमानुभूर्णाः प्रशांतये = ॥ ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवतासत्यका

मेनयेषां वासो गुरावभूत ॥ ७७ ॥ यस्यच्छंदोमयं ब्रह्म देह आपनं विभो ॥ श्रेयसां तस्य गुरुषु वासोत्यंतविडंवनं ॥ ४५

॥ इतिश्री भागवते महापुराणे दशमस्कंधे भगवद्ब्राह्मणसंवादे अशीतितमोध्यायः ॥ ८० ॥ शुक उवाच ॥ सइत्थं द्विजमु

ख्येन सह संकथयन्हरिः ॥ सर्वभूतमनोभिज्ञः स्मयमान उवाच तं ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रि

यं ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहा

त् ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ॥ ३ ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ पुत्रं पुष्पं फलं तोयं

योमे भक्त्या प्रयच्छति ॥ ४ ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः = इत्युक्तोपि द्विजस्तस्मै व्रीडितः पतये श्रियः

पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूतात्मदृक्साक्षात्तस्यागमनकारणं ॥ विज्ञायाचिंतयन्नायं श्री

कामो माभजत्पुरा ॥ ६ ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया ॥ प्राप्तो मामस्य दास्यामि संपदोमर्त्यदु

र्लभाः ॥ ७ ॥

एकाशीतितमेस्मिन्स्तु तन्नाधाप्पृथुकतंडुलान् ॥ प्रियं निर्मितवानिंद्रं दुर्लभां तत्तदाश्रमे ॥ संकथयन्महावीर्ये ईशीत्यर्थः ॥ सर्वभूतानां

मनोभिज्ञः ॥ मदर्थं पृथुकाननियदातं लज्जात इति ज्ञानन्नित्यर्थः ॥ १ ॥ प्रहसन्स्वेच्छ्या ईर्क्षन् ॥ २ ॥ लज्जया न कथयतस्तामपानुवन्ना

ह ॥ अण्वपीति द्वाभ्यां सर्वभूतानामात्मदृक अंतःकरणसाक्षी ॥ ६ ॥ अमर्त्यानां देवानामपि दुर्लभाः ॥ ७ ॥ ॥ ॥ ॥ ॥

श्रीभाग ३८ ८२

अत्तिलीनीर्णात्वाह सनं स्पश्चन तन्मध्ये चीरणावबद्धान् ॥८॥ अंग हे सखे मां विश्वं विश्वात्मानं ॥९॥ इति वदंतं ते कां मुष्टिं जग्धात्मपरेति ॥ अयं भा
वः ॥१॥ तावताऽहं सेह हामुत्र च मत्कटाक्षविलासप्रसूतानां सर्वसंपदां साद्धये ॥ अलमतः पृथुकद्वितीयमुष्टिप्रदानेन मामा मेत्त दधीनां कुर्व
तित्वत्तोषकारणं नवतोषस्य कारणं यथा भवेत् ॥ तथा सर्वसंपत्समृद्धये यथा भक्तस्य समृद्धे दृष्टा लवतुषोत्यर्थः ॥ स्वर्गतं स्वर्गगामि

इत्थं विचिंत्य वसनात् चीरवद्धान् द्विजन्मनः ॥ स्वयं जहार किमिदं इति पृथुकतंदुलान् ॥८॥ नन्वेतदुपनीतं मे परम
प्रीणनं सखे ॥ तर्पयंत्यंग मां विश्वमेते पृथुकतंदुलाः ॥९॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे
हस्तं तत्परा परमेष्ठिनः ॥१०॥ एतावतालं विश्वात्मन् सर्वसंपत्समृद्धये ॥ अस्मिन् लोकेऽथवामुष्मिन् पुंसस्त्वत्तोषका
रणं ॥११॥ ब्राह्मणस्तां तु रजनीमुषित्वाच्युतमंदिरे ॥ भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतिं यथा ॥१२॥ श्वोभूते विश्व
भावेन स्वसुखेनाभिनंदितः ॥ जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः ॥१३॥ स चालब्ध्वा धनं कृष्णान्न तु याचितवा
न्स्वयं ॥ स्वगृहान्व्रीडितोगच्छन् महद्दर्शननिर्वृतः ॥१४॥ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रतमो ल
क्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥१५॥ क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्मबंधुरिति स्माहं बाहुभ्यां परि
रंभितः ॥१६॥

नं श्वोभूते उदिते रवौ विश्वं भावयतीति विश्वभावनस्तेनेति ॥ भुवते भावि न मिंद्र उत्क्लर्भं विश्वं विभवं स्तच्च यति स्वसुखेन स्वानंदं स्पर्शेनेति
दानेदीनतां दर्शयति ॥ नंदितो विनयोक्तिभिः ॥१३॥ व्रीडितः स्वचित्तकार्पण्येन लज्जितः महतः ॥ श्रीकृष्णस्य दर्शनेन निर्वृतः ॥१४॥ निर्वृ
तिमेवाह ॥ अहो इति चतुर्भिः यत् यतः लक्ष्मीमुरसि बिभ्रता आश्लिष्टोऽहं पापीयान्नीचः ॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सं २

राम ८२

रुजितस्थरनले पनादिभिः ॥ २० ॥ एवं संरुक्त्यापि द्रुतं स्पादानेकारणं कल्पयति स्वर्गापवर्गयोरितिद्वाभ्यां ॥ स्वर्गादीनां यद्यपि तस्य चरणाद्धनमे
वकारणं तथाकारणिकत्वात् स्मृर्थ्यपिधनं मह्यं नाद्दुदात ॥ उत्तरेणान्वयः ॥ २१ ॥ निज्जग्रहस्पातिकेचाप्तः तस्य विशेषणं स्वर्धेति ॥ २१ ॥
विचित्रोपवनादिभिरिष्टतंकथंभूतैः कृतजिर्दिक्तैज्जल्लेराज्जल्लैः ॥ तथाप्रोत्फुल्लानि कुसुदादीनि येषु तानितथा तैः ॥ २२ ॥ किंचनृपमि

ध

निवासितः प्रियानुष्टे पर्यंके भ्रातरो यथा ॥ मत्सिध्या वीजितः श्रोतो बालव्यजनहस्तया ॥ २३ ॥ शुश्रूषया परमया पाद
संवाहनादिभिः ॥ रुजितो देवदेवे न विप्रदेवेन देववत् ॥ २४ ॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां ॥ सर्वासामपि सि
द्धिनां मूलं तच्चरणार्चनं ॥ २५ ॥ अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणिको नूनं कथं तदिदमित्यभूत् ॥ २६
॥ पतिमांगत्य माकर्णपपत्युदूर्ण
एवं मीमांसमानं तं नरानार्यो मरप्रभाः ॥ प्रत्यगृह्णन्महाभागं गीतवादेन भूयसा ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
तिसंभ्रमा ॥ निष्क्रम्य सद्दहात्तूर्णं सा पत्नी श्रीरिवालयात् ॥ २८ ॥ ॥

तिहरिणीनामिवाली ॥ तदेश्वर्यं दृष्ट्वा वितर्कितवान् ॥ तदाह किमिदमिति ॥ प्रथमं तोत्र तः अंजंदृष्ट्वा किमिदमिति ॥ प
तिहरिणीनामिवाली रिणयास्ताभिः ॥ तदेश्वर्यं दृष्ट्वा वितर्कितवान् ॥ तदाह किमिदमिति ॥ प्रथमं तोत्र तः अंजं दृष्ट्वा किमिदमिति ॥ प
स्वाहिमानानि दृष्ट्वा कस्य वेति स्थानं च स्वीयमिति ॥ ज्ञात्वा कथं तदिदं स्यान्नमिति एवं रूपमभूत् ॥ २२ ॥ अमरप्रभाः अमरस्त्रैल्यकांतयः
प्रत्यगृह्णन् उपायनादिभिरादृतवंतः ॥ २७ ॥ उद्भूतो यस्याः सा अतिसंभ्रमा अतिशयेन संभ्रमः आदरो यस्याः सा आलयात् ॥ कमलवना
तद्रूपधारिणी श्रीरिव स्वर्गास्यं च तत्र भावत आनीतत्वात् ॥ स्वर्गिणामभवत् यो रूपं वस्तु वेति भावः ॥ २८ ॥ ॥ ॥ ॥ ॥ एम ॥

धनं मे रुजितनाद दृष्ट्वा इति तद्वितयनं तः प्रासैरितस्तम २८ हंसोकं । स्वर्धानलले न्नुसंकाशैर्दिमानैः सर्वतो
दृतं ॥ २१ ॥ दिव्यिचित्रोपवनोद्यानैः कूजत द्विजकुलाकुलैः । प्रोत्फुल्लकुमुदाम्भोजकह्लारोत्पल वारि
भिः ॥ रुद्धं स्वलंकृतं पुंभिः स्त्रीभि... कथं तदिदं मिदमभूत ॥ २४ ॥ २

श्री॰
भाग॰
१०॰
८२

बुध्या आश्रयमेवं वंद्यं इति ॥ निश्चयेन मनसा संकल्पेन ॥२६॥ अत्र मंदिरे पयःफेननिभाः शय्यास्तरणानीत्यादिसंपदः ॥ तत्र सर्वसंपदां समृद्धी विलोक्य तर्कयामासेति ॥ चतुर्थेनान्वयः ॥ तत्र च दांताः गजदंतनिर्मिताः पर्यंकाः ॥२९॥ यत्र च आसनानि च मृदूपस्तरणानि तूलानि दिव्यमया

पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे ॥२६॥ पत्नीं वीक्ष्य विस्फुरंतीं देवीं वैमानिकीमिव ॥ दासीनां निष्ककंठीनां मध्ये भांतीं स विस्मितः ॥२७॥ प्रीतः स्वयं तया युक्तः प्रविष्टो निजमंदिरं ॥ मणिस्तंभशतोपेतं महेंद्रभवनं यथा ॥२८॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ पर्यंका हेमदंडानि चामरव्यजनानि च ॥२९॥ आसनानि च हैमानि मृदूपस्तरणानि च ॥ मुक्तादामविलंबीनि वितानानि द्युमंति च ॥३०॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नदीपान् भ्राजमानान् ललना रत्नसंयुताः ॥३१॥ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदां ॥ तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीं ॥३२॥ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥ महाविभूतेरवलोकतोन्यो नैवोपपद्येत यदूत्तमस्य ॥३३॥

नित्तं च मुक्तादामविलंबवंति ॥ द्युमंति च वितानानि ॥३०॥ निर्व्यग्रः संस्थिरः सन् ॥ अहैतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास ॥३२॥ उत्तमानां समृद्धिरागतेति निश्चिनोति ॥ नूनमिति ॥ एतन्ममेति एषा वा सा वहं च तस्य ॥ एतन्मम ॥ महती विभूतिर्यस्य तस्यावलोकादन्यतो ॥३३॥ राम
८२

सर्वेदत्तो कदाचिदेतस्मादैश्वर्यं दत्तवान् ॥ तर्हीदं त्वया दत्तमिति ॥ किं नावोचदत आह नन्विति ॥ ननु मे सखा समक्षमब्रुवाण एव याचिष्णवे या
वत्काम्य भूरि दिशति ददाति ॥ अत्र हेतुः भूरिभुजः स्वयं तत्तद्देयं पर्जन्यवदीक्षमाण इति ॥ अयमर्थः स्वयं तावद्भूरिभक्तः बहुभोजः ॥
आप्तकामत्वात्तल्लक्ष्मीपतित्वात्तु च ॥ अतो याच्ञापरो वाचं कोऽतिवदन्यः ॥ पर्जन्यः कदाचिद्बहुक्षोऽपि वर्षणमल्पमेव मन्यमानो लज्जत एव स
मक्षमवर्षन् ॥ रात्रौ निद्राने कार्षिके तन्हेत्रमाप्लावयति ॥ एवं श्रीकृष्णो स्वभोगापेक्षया तद्देयमिन्द्रादिपदमपि तुच्छं मत्वा न तस्य चेभ
ज्ञनं बहु मन्यमानः समक्षममब्रुवाण एव ददातीति ॥ ३४ ॥ तदेवाह किंचिदिति उरु बह्वपि स्वदत्तं यत्किंचित्करोति अल्पं मन्यते ॥ सु

नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभुजः ॥ पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे ॥
३४ ॥ किंचित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ॥ मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो म
हात्मा ॥ ३५ ॥ तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात् ॥ महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषे
प्रसंगः ॥ ३६ ॥ भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्थयत्यजः ॥ अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं
धनिनां मदोद्भवं ॥ ३७ ॥

सुहृत्कृतं फल्ग्वपि भूरिकारी बहु मन्यत इत्यर्थः ॥ अत एव मया उपनीतं समीपं नीतं ॥ प्रीतियुतः स्वयमेव प्रतिगृहीतवान् ॥ ३५ ॥ श्रीकृष्णस्य भ
क्तवान् ॥ स्वल्पं दृष्ट्वा तद्भक्तिं प्रार्थयते तस्येति ॥ सौहृदं प्रेम सख्यं हितकारित्वं च मैत्री उपकारकत्वं च दास्यं सेवकत्वं तत्समाहारैकवचनं ॥ त
स्य तत्संबंधितो मे मम स्यात् न तु विभूतिः ॥ किंच महानुभावेन तेनैव विषज्जतो विशेषेण संगं प्राप्नुवतः तत्संतोषु तत्पुरुषेषु संगः स्यादिति ॥ ३६ ॥
ननु भक्तेः फलं संपदं प्राप्य पुनर्भक्तिः किमिति प्रार्थ्यते अत आह भक्तायेति संपदः कोशादीन् राज्यमैश्वर्यं विभूतिः ॥ कलत्रपुत्रादीन् न स
मर्थयति न ददाति ॥ अपि तु दृष्ट्वा भक्तिमेव अदीर्घबोधाय ॥ अविवेकिने मम मा भूत् भक्त्यभावादेवं ज्ञान अतस्तद्भक्तिरेव स्यादिति भावः ॥ ३७ ॥

त्यक्त्वन् शनैः त्यागमभ्यस्यन् ॥ जायया सह बुभुजे ॥ ३७ ॥ श्रीहरेस्त्वेवं ब्रह्मण्यतानातिचित्रमित्याह तस्येति ॥ ३८ ॥ अन्ये तु जितमपि स्वश्रेष्ठैः पराजितं तद्दृष्ट्वा तस्य ध्यानं ॥ तस्य वेगादन्तेनो क्षुधितमात्मवंधनमहं करोम्यस्य सः ॥ गतिमित्यादि विशिष्टलिंगंधामविशेषणं सतां ब्रह्मविदां प्राप्यमित्यर्थः ॥ ३९ ॥ एतत्पृथुकोपाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषयं श्रावयेति ॥ ४० ॥ इति श्रीभागवते दशमस्कंधे एकाशीतितमोध्यायः ॥ ८१ ॥

इत्थं व्यवसितो बुद्ध्या भक्तोतीव जनार्दने ॥ विषयान् जायया त्यक्त्वन् बुभुजे नातिलंपटः ॥ ३७ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपते प्रभोः ॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परं ॥ ३८ ॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितं ॥ तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभेचिरतः सतां गतिं ॥ ३९ ॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभावो भगवति कर्मबंधाद्विमुच्यते ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पृथुकोपाख्याने भगवन्मित्रसंबंधिएकाशीतितमोध्यायः ॥ ८१ ॥ श्रीशुक उवाच ॥ अथैकदा द्वारवत्यां वसतो रामकृष्णयोः ॥ सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥ तं ज्ञात्वा मनुजा राजन्पुरस्तादेव सर्वतः ॥ स्यमंतपंचकं क्षेत्रं ययुः श्रेयो विधित्सया ॥ २ ॥ निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः ॥ नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्व्यशीतितमे आगत्य कुरुक्षेत्रं रविग्रहे ॥ दृष्टी नृहृष्टा यदवः गोप्यः कृष्णकथां मिथः ॥ श्रीदामसुहृदेकस्याः प्रकल्प्यैं द्रुपदं शुभि ॥ नंदादिसुहृदानंदे कुरुक्षेत्रं गमामसः ॥ कल्पक्षये यथा सर्वग्रासः इत्यर्थः ॥ १ ॥ पुरैतीति विशेषः कथ्यमानमादावेव ज्ञात्वा स्यमंतपंचकं कुरुक्षेत्रं ॥ २ ॥ ब्रह्मण्यत्वे क्षत्रियवधस्यानत्वेन परशुरामस्यापि पापनिरासकत्वमाह निःक्षत्रियामिति द्वाभ्यां ॥ ३ ॥

अन्यत्रविहारयथा॥ आगनुआजग्मुः भारतीः भारत्यः॥ ५॥ सुभद्रश्रुकसारणोः महानि कछोहारकारद्वायामास्तेतथाकृतवर्माचसृष्टपप
तिः सैनाजीः देवदिस्याभेर्विमानसंकाशैस्तरलास्तरंगास्तहतल्लवोगतिर्येषांतैः॥ विद्याधरफभिर्विद्याधराणामिवघातिः येषांतेः

ईशेचभगवानुरामोयत्रास्पष्टोपिकर्मणा॥ लोकस्यग्राहयन्नीशोयथान्योहाणनतये॥ ४॥ महत्यांतीर्थयात्रायां
तत्रागनुभारतीः प्रजाः॥ कृस्तयश्चमथाक्रूरवसुदेवाहुकादयः॥ ययुर्भारतनलांत्रस्वमर्दस्तपथिस्वः॥ ५॥ गदप्रद्यु
म्नसांवाद्याःसुभद्रश्रुकसारणोः॥ ५॥ आस्तेनिरुद्धोरक्षायां कृतवर्मा चसृष्टपः॥ तेरथैर्देवधिस्यैर्भेहेयैश्चतरलप्लवेः
गजैर्नदद्भिरभ्रामैर्नृभिर्विद्याधरफभिः॥ व्यरोचंतमहातेजसः पथिकांचनमालिनः॥ ७॥ दिव्यस्त्रकवसनाहोःक
लत्रैः खेचराइव॥ तत्रस्नात्वामहाभागाउपोष्य सुसमाहिताः॥ ब्राह्मणेभ्योददुर्धेनूर्वासःस्त्रग्रुक्ममालिनीः॥ ८
महद्देशविधिवत्पुनःस्नात्वाहस्यः॥ ९॥ ददुःस्वन्नंद्विजातिभ्यः कृष्णेनोभक्तिरस्त्विति॥ स्वयंचतदनुज्ञाताहस्यः
कृष्णदेवताः॥ १०॥ भुक्त्वोपविविशुःकामंस्निग्धच्छायांघ्रिपांघ्रिषु॥ तत्रागतांस्तेददृशुः सुहृत्संबंधिनोनृपान्॥ ११
मत्स्योशीनरकौशल्यविदर्भकुरुस्टंजयान्॥ कांभोजकेकयान्मद्रान्कुंतीनारट्टकेरलान्॥ १२॥ अन्यांश्चैवात्मप
क्षीयान्परांश्चशतशोनृपान्॥ नंदादीन्सुहृदोगोपान्गोपीश्चोत्कंठिताश्चिरं॥ १३॥ अन्योन्यसंदर्शनहर्षरंहसा प्रोल्ल
सद्धृत्कमलाननश्रियः॥ आश्लिष्यगाढंनयनैः स्रवज्जलाहृष्यत्त्वचोरुद्धगिरोययुर्मुदं॥ १४॥ ॥ ॥ राम॥

महातेजाःमहतेजसः॥ ७॥ दिव्याश्रवतनमःस्वर्णवस्त्रसंनाहायेषांते॥ ८॥ पुनरन्येघरात्स्नात्वयहातस्मिन्नेवाहनिर्गुक्तिस्नानंकृत्वा॥ ९॥ स्निग्धशीत
लच्छायायेषांघ्रिपानांतेषांघ्रिषु मूलेषुपोत्कळेः हृदयकमलरोहैः श्रीशोभायेषांतैः॥ १४॥ ॥ ॥ ॥ ॥ ॥ राम॥

श्री
भाग०
द० उ०
८५

५

अतिसौहृदेन यत् स्मितं तेन अमलाः अपांगा दृशो दृष्टयो यासां ताः ॥ मिथः संवीक्ष्य दोर्भिरभिरेभिरे आलिंगनं कृतवत्यः ॥१९॥ सं
कथया मिथः सप्रेमगोष्ठ्या ॥२०॥ तामेव वसुदेवं वसुदेवदृष्टयोः संकथा ... आर्य भ्राताभिवर्ताभि ॥ अकृताशिषं अप्राप्तमनोरथं ॥२२॥

स्त्रियश्च संवीक्ष्य मिथोतिसौहृदस्मितामलापांगदृशोभिरेभिरे ॥ स्तनैः स्तनान् कुंकुमपंकरूषितान् निह
त्य दोर्भिः प्रणयाश्रुलोचनाः ॥१९॥ ततोभिवाद्य ते वृद्धान् यविष्ठैरभिवादिताः ॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णक
था मिथः ॥२०॥ पृथा भ्रातॄन् स्वसॄर्वीक्ष्य तत्पुत्रान् पितरावपि ॥ भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः ॥२१॥ कुंत्युवाच
आर्य भ्रातरहं मन्ये आत्मानमकृताशिषं ॥ यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥२२॥ सुहृदो ज्ञातयः पुत्रा
भ्रातरः पितरावपि ॥ नानुस्मरंति स्वजनं यस्य दैवमदक्षिणं ॥२३॥ वसुदेव उवाच ॥ अंब मास्मानसूयेथा दैवक्रीडन
कान्नरान् ॥ ईशस्य हि वशे लोकः कुरुते कार्यतेथ वा ॥२४॥ कंसप्रतापिताः सर्वे वयं याता दिशो दश ॥ एतर्ह्येव पुनः
स्थानं दैवेनासादिताः स्वसः ॥२५॥ शुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेर्चिता नृपाः ॥ आसन्नच्युतसंदर्शपरमा
नंदनिर्वृताः ॥२६॥ भीष्मो द्रोणोंबिकापुत्रो गांधारी ससुता तथा ॥ सदाराः पांडवाः कुंती संजयो विदुरः कृपः ॥२७॥
कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान् ॥ पुरुजिद्द्रुपदः शल्यो धृष्टकेतुः स काशिराट् ॥२८॥ दमघोषो विशा
लाक्षो मैथिलो मद्रकेकयाः ॥ युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥२९॥ राजानो ये च राजेंद्र युधिष्ठिरमनुव्र
ताः ॥ श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः ॥३०॥ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः ॥ प्रशशं

यस्य दैवमदक्षिणं प्रतिकूलं तं स्वजनमपि संतं सुहृदादयो नानुस्मरंति अतो ममैव दैवं प्रतिकूलं युष्माकं कोपराध इत्यर्थः ॥२३॥ ईशवशानसेवाह
कंसप्रतापिता इति ॥ हे स्वसः एतर्ह्येव संप्रत्येव ॥२५॥ युधिष्ठिरं ये चानुव्रतास्ते राजानस्तयेगितत्वात् ॥२६॥ ॥ ॥ ॥ ॥ ॥ ॥

राम
८५

८२

जन्मभाजःचतुर्णांमध्येसफलजन्मानः २८ ॥ किंचनकेवलंतत्स्पर्दर्शनमेव ॥ अपितुयुष्मांतर्दैनिभंबद्धयुष्माकंसद्भूतः संपन्नमित्याह ॥ यद्विश्रुति
रितिद्वाभ्यां यदितिदृष्टान्तरूपयस्यैवप्रथैः ॥ विश्रुतिः कीर्तिः श्रुतिभिर्नुता ॥ इदंविश्वमलमत्यर्थंपुनाति ॥ यस्यपादावनेजनपयोगंगाच
यस्यवचोवाक्यरूपंशास्त्रंचवेदाख्यंविश्वंपुनाति किंच ॥ कालेनभर्जितभगांमाहात्म्यंयस्याः सातथा ॥ विधापियस्यांघ्रिपद्मस्पर्श
नोत्थाआविर्भूताशक्तिर्यस्याः सानोस्माकंमखिलान्पदार्थानभितोवर्षति ॥ २९ ॥ दर्शनंस्पर्शनंचअनुपथः अनुगतिश्चप्रजल्पोगोष्ठीचश

अहोभोजपतेयूयंजन्मभाजोनृणामिह ॥ यत्पश्यथासकृत्कृष्णंदुर्दर्शमपियोगिनां ॥ २८ ॥ यद्विश्रुतिः श्रुतिनुतेद
मलंपुनातिपादावनेजनपयश्चवचश्चशास्त्रं ॥ भूः कालभर्जितभगापियदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षतिनोखि
लार्थान् ॥ २९ ॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः ॥ येषांगृहेनिरयवर्त्मनिवर्ततांवःस्व
यमासविष्णुः ॥ ३० ॥ श्रीशुकउवाच ॥ नंदस्तत्रयदून्प्राप्तान्ज्ञात्वाकृष्णपुरोगमान् ॥ तत्रागमद्वृतोगोपैःरनःस्थार्थैः
दिदृक्षया ॥ ३१ ॥ तंदृष्ट्वावृष्णयोहृष्टास्तन्वःप्राणमिवोत्थिताः ॥ परिषस्वजिरेगाढंचिरदर्शनकातराः ॥ ३२ ॥ ॥ ॥

शय्याशयनंचआसनंच ॥ अशनंभोजनंचयौनंवैवाहिकसंबंधः सपिंडबंधः ॥ देहकसंबंधोनेनसहदर्शनानुपत्न्यास्थितःसयोनः ॥ सपिंड
बंधोयेषांवोस्तिकंचयेषांवोगृहेविष्णुः स्वयमासआविर्भूतः ॥ निरयवर्त्मनिप्रवृत्तिमार्गेवर्तमानानांस्वर्गापवर्गाभ्यांविरमयतिविरक्ता
न्करोतीतितथाभूत ॥ तेस्यजन्मभाजइतियद्वातद्वृत्तिसामान्यनिर्देशः ॥ स इत्यर्थः सविष्णुः स्वयमेवयोनिरय वर्त्मनिसंसारकार
णगृहेवर्तमानानामपिबध्यते ॥ संबध्यतइतिसंबंधः दर्शनादिभिः संबद्धःसन्स्वर्गापवर्गविरमः ॥ आसपरममहान्प्रदेशोवृष्णिवत्प
र्थैः २ अनःस्थार्थैर्गितितत्रैवासचिकीर्षयाशकटेषुस्थापितैरथैः सहसमागतइत्यर्थः ३१

श्री
भाग
द० ३
८६

वसुदेवस्तं परिष्वज्य प्रेमविह्वलो बभूवेति शेषः ॥ ३३ ॥ तौ सुतौ परिरभ्यानंदेन रोदनेन च दावविस्रस्तशोकान्न विजहतुर्नेत्यजतां पश्चात् शुचः ॥ अस्त्रवि
विज्ञहतुर्शुचुरित्यर्थः ॥ ३५ ॥ अहो व्रजेश्वरी यशोदां ॥ ३६ ॥ अनिवृत्तां निवृत्तिकारणे सत्यपि ॥ अनुवर्तमानां ॥ ऐंद्रमैश्वर्यं प्राप्यापि यस्याः ॥ प्रति
क्रिया कर्तुं न शक्यत इत्यर्थः ॥ ३७ ॥ तत्कृतां मैत्रीं यस्मात् हेतोः एतावितिन दृष्टौ पितरौ याभ्यां तौ ॥ वसुतत्वतु अजन्मत्वादेवादृष्टपितरौ

वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः ॥ स्मरन् कंसकृतान्क्लेशान् पुत्रन्यासं च गोकुले ॥ ३३ ॥ कृष्णरामौ परिष्वज्य
पितरावभिवंद्य च ॥ न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ॥ ३४ ॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च ॥ यशो
दा च महाभागा सुतौ विजहतुः शुचः ॥ ३५ ॥ रोहिणी देवकी चापि परिष्वज्य व्रजेश्वरी ॥ स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकं
ठ्यौ समूचतुः ॥ ३६ ॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि ॥ अवाप्यापींद्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ३७ ॥
एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न
सतां परः स्वः ॥ ३८ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति ॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापं ॥ ३९ ॥

हे भवति युवयोः ॥ पित्रोर्न्यस्तावेतौ संप्रीणनादीनि प्राप्य ... कुत्रचिदपि भयरहितौ सुखावासं च चक्रतुः कथंभूतयोः ॥ अक्ष्णो
नेत्रयोः रक्षकं पक्ष्म यद्वत् ॥ तथा रक्षकयोः युवयोः ... सतां परः स्व इति न भेदः ॥ ३८ ॥ अभीष्टमेव लिंगं यस्य श्रीकृष्ण
स्य ... पि प्रेक्षणे दृशि सुनेत्रे सुव्यवधायकं पक्ष्मकृतं विधातारं शपंति ॥ दृग्भिर्नेत्रद्वारैर्हृदीकृतं हृदये प्रवेशितं ॥ परिरभ्य तद्भावं
तदात्मनः प्रापुः अपि नित्ययुजां आत्मयोगिनामपि ॥ ३९ ॥

राम
८६

न्यस्तावकुत्रचभयौनसतांपरःस्वः

चिरायितान् त्वित्वं चिरायितान् ॥ अत्र हेतुः शत्रुपक्षक्षपणे चेतो येषां तान् ॥४१॥ अपि स्वित् अस्मान् अवध्यायथ अवज्ञानीयं च कृतघ्नतया ए
त इत्यादिशंकया द्वेषं कृतवान् शत्रुभावे स्थितस्मै वेतन परित्यज्य गतावादिति चेत् ॥ अत आह नूनमिति एतत्सदृष्टांतमाह ॥ वायुरि
ति आलापते संयुक्तं करोतीत्यर्थः ॥ अपि च अतिभद्रं यत् नव भवतीनां मत्स्नेहयोगेन मत्त्वे नातिशयो जात इत्याह मयीति मयि भक्ति
मात्रमेव तावद् अमृतत्वाय कल्पते यत्तु भवतीनां मत्स्नेह आसीत् ॥ तद्धि स्यादतिभद्रं यतः मदापनः मत्प्रापक इति ॥४४॥ कीदृशस्त्वं
यं वयं स्नेहेन प्रपन्नाः इत्यपेक्षायामात्मस्वरूपमाह ॥ अहं हीति हे अंगनाः भौतिकानां शरावघटादीनां यथा आकाशादि पंचमहाभू

भगवांस्तास्तथाभूता विविक्त उपसंगतः ॥ आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥४०॥ अपि स्मरथ नः सख्यः स्वा
नामर्थचिकीर्षया ॥ गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ॥४१॥ अप्यवध्यायथास्मान्स्विदकृतज्ञाविशंकया ॥ नूनं
भूतानि भगवान्युनक्ति वियुनक्ति च ॥४२॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च ॥ संयोज्याक्षिपते भूयस्तथा भूता
नि भूतकृत् ॥४३॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥४४॥ अहं हि
सर्वभूतानामादिरंतोऽन्तरं बहिः ॥ भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः ॥४५॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना

तानां आद्यंतादिरूपाणि एवं सर्वभूतानां तत्राण्डजादीनामहमतो व्यापकं मां भवंत्यः ॥ प्राप्ता एवेति ननु चतुर्विधभूतग्रामाणां तल्लोकात्मैवा
द्यंतादिरूपः ॥ तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्तंत इति उत्तस्त्वत्वात्र अस्माकमित्यत आह एवं हीति ॥ अयमर्थः ॥ यथा शरावादीना
महाभूतान्याद्यंतरूपाणि एवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात् ॥ स्वकारणेषु भूतेष्वेव वर्तंते न तु भोक्तर्यात्मनि
आत्मा तु तेषु स्वात्मना भोक्तृरूपेणास्ततः ॥ व्याप्तेन कारणत्वेन अथ तदुभयं भूतानि भौतिकरूपं भोग्यं च भोक्तारं चात्मानं मय्यक्षरे प
रिपूर्णे आभातं पश्यतेति ॥४६॥ ॥ रामायनमः ॥ श्रीरामाय ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री तीर्थयात्रायां वृष्णि कुरु संगमो नाम

श्री भाग० द० ३० ८७

अध्यात्मशिक्षया स्वरूपोपदेशेन शिक्षिताः बोधिताः ॥ तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिंगं यासां ताः ॥ तमेवाध्यगमन् प्राप्ताः ॥ ४८
एवं प्राप्तोपि संसक्तः पुनरपि देहव्यासंगेन मा भूदिति तच्चरणस्मरणं प्रार्थयामासुरित्याह ॥ आहुश्चेति ॥ हे नलिननाभ ते पदारविंदं गेहं च
जुषां गृहसेविनीनामपि नो मनसि सदा उदियात् आविर्भवेत् ॥ ४९ ॥ इति श्रीदशमस्कंधे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ त्र्यशीतितमे एवं च स्त्री
णां कृष्णकथोत्सवे ॥ द्रौपद्याः कृष्णभार्याभिरुक्ताः स्वस्वकरग्रहः ॥ अथ मयं कुशलं तत्पादेक्षयाहृतमंहो येषां ते महतां मनस्ताः ॥ संका

श्रीशुक उवाच ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः तदनुस्मरणध्वस्तजीवकोशास्तमध्यगमन् ॥ ४८ ॥ आहु
श्च ते नलिननाभ पदारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं गेहं जुषामपि म
नस्युदियात्सदा नः ॥ ४९ ॥ इ ॥ श्री ॥ भा ॥ ते ॥ म ॥ हा ॥ पु ॥ दश ॥ म ॥ स्कं ॥ द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ श्रीशुक उवाच ॥ अथानुगृह्य भग
वान् गोपीनां स गुरुर्गतिः युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययं ॥ १ ॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः ॥ प्र
त्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥ कुतोऽशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् । पिबं
ति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदं ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शात्त्वन्मुखारविंदान्निःसृतं क्वचित्कदाचिद्देहभृतां देहधारिणां देहकृत्वासावस्मृतिश्चाविद्या तां छिनत्तीति तथा तं देहकृदस्मृतिच्छिदं विषया
ज्ञानछिदं वा हे प्रभो त्वच्चरणांबुजासवं कर्णपुटैर्ये अलं पिबंति तेषां त्वन्न ॥ दुर्जनशास्तुः ॥ कालरूपात् कुतोऽशिवं भवतीत्यन्वयः कथंभूतं म
हात्मनां व्यासादीनां मुखनिःसृतं क्वचित्कदाचिदपि व्यासादिवाक्यैस्त्वन्माहात्म्यज्ञानं तेन ... भवतीत्यर्थः ॥ ईश्वरस्यात्मत्वमेव के
षांचिदाह ॥ देहभृत इति देहभृतो जीवाः ॥ त्वत्कृते त्वद्विना ... जीवंतिके ह्येवाल्पकं ॥ ज्ञानप्राणापानादयो देवाः आकाशानंदेन स्यादिति
श्रुतिः ॥ अथवा त्वन्मुखनिःसृतं त्वच्चरणांबुजासवं ये पिबंति तेषां महात्मनां कुतोऽशिवमित्यन्वयः ॥ त्वत्तात भगवन्नमस्कारकरणाय

३

राम ८७

हित्वेतिपदद्वयं हि स्वत्वामेव नतास्मेत्यर्थः ॥ कथंभूतं त्वमात्मधाम्ना स्वरूपप्रकाशेन विडंबिता निरस्ताः आत्मकृताः बुद्धिनिमित्ताः तिस्रोवस्था
यस्मिंस्तं अतएव आनंदसंप्लवं सर्वानंदकस्थस्वरूपं अखंडमपरिछिन्नं यतः नकुंठिता बोधशक्तिर्यस्य तं ॥ नन्वेवं रूपस्याश्रीकृष्णस्य कुतो
स्मदादिवदेवप्रतीतिरत आह कालोपसृष्टेति कालेनउपसृष्टा विलुप्ता श्रुतेनिगमाश्रुते तेषामवने रक्षार्थं आत्ता उपात्ता योगमाया या
आकृतिर्नराकारा मूर्तिर्येन तं परमहंसानां गतिं त्वामातत्त्वेवंरूपत्वादस्माकं चत्वमायया एतत्सर्वं वैपरीत्यात्त्वामेवनतास्मेति ॥ यद्वा

इत्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं ॥ कालोपसृष्टनिगमावन आत्तयोगमा
याकृतिं परमहंसगतिं नताःस्मः ॥४॥ ऋषिरुवाच ॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः हे
समेत्य गोविंदकथामिथोगृणंस्त्रिलोकगीताः शृणुवर्णयामिते ॥५॥ द्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जांबव
तिकौसल्ये ॥ हे सत्यभामे कालिंदि शैब्ये रोहिणि लक्ष्मणे ॥६॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयं ॥ उपयेमे यथा ५
लोकमनुकुर्वन्स्वमायया ॥७॥ रुक्मिण्युवाच ॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः ॥ ॥ ॥ ॥
निन्ये मृगेंद्र इव भागमजाविथूथात्तच्छ्रीनिकेतचरणोस्तु ममार्चनाय ॥८॥ ॥

त्वामितिप्रकरणात् ज्ञानवंतं त्वां नताःस्म किं कृत्वा हित्वा किं आत्मधाम आत्मशरीरं धाम गृहं तच्च तच्च देहे दैहिकसंगं परित्यज्येत्यर्थः
समानमन्यत ॥४॥ त्रिषुलोकेषु गीताः ॥५॥ कौसल्ये सत्ये शैब्ये मित्रविंदे रोहिणीनामकाचित्तमहिषी लक्ष्मणा ॥ हे अन्याः श्रीकृष्ण
स्यपत्न्यः ॥७॥ मा मां अर्पयितुं संपादयितुं राजसु जरासंधादिषु उद्यतकार्मुकेषु सत्सु अजेया ये भटास्तेषां शेखरिता मुकुटवत्कृता
अंघ्रिरेणवो येन तेषां मूर्ध्नि दधदित्यर्थः तस्य श्रीनिकेतस्य चरणो मम अर्चनायास्तु ॥८॥

त्रै

श्री
भाग०
द० उ०
८८

सनाभेर्भ्रातिर्वधेनसिंहहतेननतंहृष्टस्यतेनमेततेनलिप्तमभिशापंदुर्यशः॥अथमाधुपरिहंतंश्रीरामःराज्ञांतिलावारतंस्यमंतके
तुपात्तहार॥आनीतवान्॥अथानंतरंस्मतिभ्रेत्तेनदात्सनेनस्वापराधेनभीतःसतेपितापभवेश्रीरामायमामदिशत्ददौदत्तामञ्जो
गतिस्थःप्रतिग्रहीतामममीत्यर्थः॥९॥देहहतंदिमेपितामंश्रीरामस्मैनिजनाथस्वामिनेदेवमीश्वरंसीतापतिंप्राज्ञायश्रवणायत्रिनवहा
निक्रम्यःकुंदोत्सोभेनसप्तविंशतिदिनानिक्रमुनाभ्यसुधमतपरीक्षितःसंज्ञातापरीक्षायस्यसपरीक्षितःसंतातामरीक्षायस्यसप

५

सत्य॥सवाच॥योमेरत्नाभिवहतस्तद्दातेनलिप्ताभिशापममपमार्ष्टुंमुपाक्तहार॥जित्वर्ह्नीराजन्मथत्तमदा
त्तेनभीतःपितादिशतमात्मभवे॥पिदेत्तां॥९॥जांबवत्सुवाच॥प्राज्ञायदेहहृदंनिजनाथदेवंसीतापतिंत्रिनवहा
मुत्कनाभ्ययुध्यत॥ज्ञात्वापरीक्षितःअपहृरदर्हणांमांपादौपगृह्यमणिमानाहमकुपदासी॥१०॥कालिंघ्युवाच॥
तपश्चरंतीमाज्ञायस्वपादस्पर्शनाशया॥सख्योपेतायहीत्यापाणिंयोहंतद्गृहमार्जनी॥११॥भद्रोवाच॥योमां
स्वयंवरउपेत्यविजित्यभूपान्निन्येश्वहस्थमणिवात्मबलिंद्विपारिः॥भ्रातृंश्चमेपकुरुतःस्वपुरंश्रियोकस्तस्या
स्तुमेनुभवमंघ्र्यवनेजनत्वं॥१२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पेया ४

रामे

रीक्षितःसंतातापरीक्षायस्यसपरीक्षितः॥तंसाक्षात्सीतापतिरेवासावितिज्ञात्वापादौपगृह्यमणिनासहमामर्हणंमुपाहरत॥अर्हणं
तथासमर्पितवान्॥अहोतहिंतस्मतिश्रेष्ठासिनेत्याह॥अतुष्याहंदासीति॥१०॥साख्योजेनेनंतस्यांहमार्जनीगृहसमार्जनकर्त्रीभूता
स्वयगंतस्वबलिंद्विपारिःसिंहरुवेतिमेभ्रातृंश्चापकुरुतः॥अपकारंकुर्वतोविजित्यमःश्रियोकःलक्ष्मीनिवासःतस्यांघ्र्यवनेजनत्वंचर
णप्रक्षालनकर्तृत्वंअनुभवंप्रतिजन्मभवेत्तु॥१२॥

राम
८८

सप्त उक्ताः हे पुत्र भ्रातृबलं च वीर्यं च तव भ्रातुस्तन्तीक्ष्णशृंगाणि अनिशयितानि येषां तान् मे पित्रा कृतान् संपादितान् बलीयसे मां धा
तुं क्षितिपालानां बलस्य वीर्यस्य परीक्षणाय तान् कृतिषु प्रसिद्धान् ॥ वीराणां दुर्मदः ह्यातिथेनात्तान् सत्त्वान् शीघ्रमेव निगृह्य दमयित्वा क्रीड
यित्वा यासीनिव बंधयन्नतो कान्स्वप्नान्यपत्यानि । वीर्यमेव शुल्कं देयं यस्यास्तां दासीभिः सह चतुरंगिणीं राजाश्वादिसेनायुक्ता पुरं निन्ये

हंसोवाच ॥ सप्तोक्षणो तिबलवीर्यस्पृतीक्ष्णशृंगान् पित्राकृतान् क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहन
स्तरसा निगृह्य क्रीडन्निव बद्ध्वा धन्येयया शिशवो वत्सतरकान् ॥ ७४ ॥ यद्वस्य वीर्यशुल्कां मां दासीभिश्चतुरंगिणी ॥ पथि
निर्जित्य राजन्यान् निन्ये तदा प्रभृति त्वन्मे ॥ ७५ ॥ शिव हंसोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् ॥ हंसे च
स्मायत्र चित्ताम मद्दोहिण्यपा सखीजनैः ॥ ७६ ॥ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि ॥ कर्मभिर्भ्राम्यमाणाया
यायेन तच्छ्रेय आत्मनः ॥ ७७ ॥ लक्ष्मणोवाच ॥ ममाप्यविराड्रूप च्युत तज्जन्म कर्म च श्रुत्वा तच्च कृष्णे नारदगीतमासह चि
त्रं स्वयंत्वदे किल प च्यक्षत्र याहतः हे स्पर्शो विहाय लोकपान् ॥ ७८ ॥ ॥ ॥ ॥ ॥ ॥ रामं ॥

हंसे हे द्रौपदि तस्मिन्नेव चित्तं यस्यास्तां मा मद्दोहिण्यपासेनयाः सह सखीजनैस्तु सह येन पादसंस्पर्शेन आत्मानो मम एतत्कैवल्या
त्वं श्रेयो भवेत्स्मः ॥ यद्वा येन कारणेनात्मनो जीवस्य तत् श्रेयः स एव पुरुषार्थ इति ॥ ७७ ॥ राज्ञि हे द्रौपदि यथा मित्रविंदायाः तथा म
मापि पवित्रं स्तुत्वा देवविषयमासीत् ॥ हे संश्च पत्र विचार्य मम हस्तयाश्रियाहतः किल अतोपि मम चित्तं श्रीकृष्णे देवे ऽभूदिति ॥ ७८ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री
भाग०
द० ३
८२

तत्र श्रीकृष्णप्राप्त्या वचीकरत् कारयामास ॥ १८ ॥ यथा राज्ञि तव स्वयंवरे पार्थेप्सया अर्जुनमिच्छया कृतं तथा मत्स्यं कारितवान् पार्थं तेनार्थ्यते इच्छुणाया आहृतः ततः तर्हीदमपि अर्जुनेन एव किं न विध्यत इत्यत आह अयं त्विति स मत्स्यो बहिरेवाच्छन्नो नांतः ॥ अतःत्वभसं लक्ष्यवेधे दृश्या संलक्ष्यते अयं तु न मध्ये किं तु तं भस्मले निहितकलशजले केवलं दृश्यते अतो दृष्टैरधस्तादुपरि लक्ष्यमिति श्री

ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः ॥ बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः ॥ अयं तु बहिराच्छन्नो दृश्यते स जले परं ॥ १९ ॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरं ॥ सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥ पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः ॥ आददुः सशरं चापं वेद्धुं पर्षदि मद्धियः ॥ २१ ॥ आदाय व्यसृजन्केचित्सज्यं कर्तुमनीश्वराः ॥ आकोष्ठं ज्यां समुत्कृष्य पेतुरेके ऽमुनाहताः ॥ २२ ॥ सज्यं कृत्वापरे वीरा मागधांबष्ठचेदिपाः ॥ भीमो दुर्योधनः कर्णो नाविंदंस्तदवस्थितिं २३ मत्स्याभासं जले वीक्ष्य ज्ञात्वा च तदवस्थितिं ॥ पार्थो यत्तो ऽसृजद्बाणं नाच्छिनत्पस्पृशे परं ॥ २४ ॥ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु ॥ भगवान्धनुरादाय सज्यं कृत्वाथ लीलया ॥ २५ ॥ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले ॥ छित्त्वेषुणापातयत्तं सूर्ये चाभिजिति स्थिते ॥ २६ ॥ दिवि दुंदुभयो नेदुर्जयशब्दयुता भुवि ॥ देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः २७

तस्य व्यतिरेकेण कस्यापि भेद्य इति भावः ॥ २२ ॥ मत्स्यं वेद्धुं पर्षदि संसदि मद्धियः मय्येव धीर्येषां ते इति अन्यचित्ता न वेद्धुं शक्ता इति भावः तदेवाह आदायेति त्रिभिः अनाचापेन नाविंदंस्तदवस्थितमिति मागधादीनां क्रियाशक्तिरेव अस्पष्टं ज्ञातेत्यर्थः ॥ २४ ॥ यत्तो यत्नवान् अस्पृष्ट्वा मोचनसमर्थो नो मत्स्यं नाच्छिनत् परं केवलं यस्पर्शं ज्ञातवान् अप्यच्छेनो बलेनास्पर्श इत्यर्थः ॥ अभिजिति सर्वार्थसाधके मुहूर्ते २६

भगवत्स्वामिहर्षनिर्भरेणात्मानमेवानुवर्णयन्नाह हस्ताभ्यां नटं गामिति तत्तदा कल्लोकलस्खलितो रुद्धरौपयो स्तनाभ्यां रंगं प्रविशं कनकेनोज्ज्व
लां रत्नमालां निवीय प्राहत्य परिधाय चरणे नीवीबंधेन कौशिकाग्रे नं तम कौशेय वस्त्रमध्नी जो हि गोयस्मिनु तद्वर्चनं यस्याः सखी । साकवर्या
धृत्वाः स्वजो यस्मासा उद्धवः ऊंतलः यस्मिन् ऊंउत्तयो स्निग्धोयपयोः नेगाउ स्थलेयस्मिन् तच्च तच्च शिशिरः सता प्रहरो हासोये प्लुतेः कटाक्ष
मोक्षेरपांगवीक्षणविलासैः ॥ अतरक्तं हृदयं यस्याः साहं नेयाक्षसेनिर्दिष्टो पदिष्टीकृते ईशमयाहृते सतिस्पर्धतेः स्पर्धमानः । नन्वेवपर

तद्दंगमाहं विशमहं कल्लरुद्धराभ्यां पद्भ्यां प्रगृह्य कनकोज्ज्वलरत्नमाल्लां । नूत्नेति नीवीपरिधाय चकौशिकाग्रोसखी
उहासवदनादास्त्री धृतस्तक ॥ २५ ॥ उन्नीयकं ऊंतल्लं ऊंउल्लति प्लुतांउस्थलशिशिरहासकटाक्षमोक्षैः ॥ राज्ञो
निर्भीस्पर्धितः श्रानेके अरोरे सेनुरक्तहृदयाग्निर्दिधेस्वमाल्लो ॥ २६ ॥ तावत्स्वदंगपदहाः श्रुत्वभीर्यानुकादेयः ॥ निर्नेउ
नेहं नर्तके येन हृतोर्गायकान्नउ ॥ २ ॥ एवं हृत्नेभगवान्ति मयेरे रूपरूपपाः ॥ न सो हि रेसाक्षसेनिस्पर्धिनो हृकथार्दिताः
२४ ॥ मं तावद्रथमारोप्य हयांश्च चतुष्कं ॥ शार्ङ्गं मुष्टुप्यस नरुसाथा वाजो चतुर्भुजः ॥ २४ ॥ दारुकश्चोदयामासको
वनोपस्कंदरथं ॥ मिषतांसस्तुजां राज्ञिश्रृगाणां हगराडिव ॥ २८ ॥ तेन्वसङ्कनराजन्यानिषेद्धुपथिके चन ॥ संयताउद्ध
नेधासाग्रामसिंहा यथा हरिं ॥ २४
मैश्वर्यं दृष्ट्वतां ऊतः स्पर्धव सव स्तत्राहहहकथार्दितइति ॥ हृकथ्येनकामेनिर्दिताविवशाः कामविजृंभितास्पर्धतिभावः ॥ २९ ॥ हयरत्नानां
चतुष्कं यस्मिन्नरथं हस्ताभ्यां मालिंगपद्माभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजस्तयोः श्रृगालानां मिषतां श्रृगराडिव तद्गृहीत्वा गामेतिशेषो ज्ञात
व्यः ॥ दारुकस्यैव वृष्टिराजोपमात्रेन्वसज्जनस्पष्टतः सक्ताबद्धः निषेद्धुं पतिं बंधं कर्तुं केचन प्रत्ततो गत्वा पथि संयंता बहुभिः स्पर्धः ॥ उ
द्वृतेधाः सर्वः ऊर्ध्वीकृतवाप्पः ग्रामसिंहाः श्वानः हरिं सिंहं यथेति ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम

श्री भा॰ द॰ ३ ९०

रविंकादयतीतिरविरुदाः ध्वजेषु पटा यस्यां विचित्राणि तोरणानि यस्यां सैव सा चतां च कुशस्थलीं पुरीं यदुपतिः समाविशत ॥ स्वकेतनं मंड
लं अलंकृतं वा महार्हवासः वधूभिः सुहृदः पूजयामास दास्यादिभिः सह आयुधानि हर्षाणाय आदिदवौ ॥ इमामष्टोक्यं सर्वसंगनिहृत्या

६

तेशार्ङ्गभृतुबाणौघैः कृत्तबाहूंबिकंधराः ॥ निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः ॥ ३५ ॥ ततः श्रीयदुपतिरभ्यलं
कृतां रविरुद्धध्वजपटचित्रतोरणां ॥ कुशस्थलीं दिवि भुवि चाभिसंस्तुतां समाविशत्तरणिरिव स्वकेतनं ॥ ३६ ॥ पिता मे
पूजयामास सुहृत्संबंधिबांधवान् ॥ महार्हवासोलंकारैः शय्यासनपरिच्छदैः ॥ ३७ ॥ दासीभिः सर्वरत्नपरिच्छदैर्भरतवा
जिभिः ॥ आयुधानि महार्हाणि ददौ पूर्णमभिक्रितः ॥ ३८ ॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ॥ सर्वसंगनिवृत्त्या
तपसा च वभूविम ॥ ३९ ॥ महिष्य ऊचुः ॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजये जितराजकन्याः ॥ निर्मुच्य
संसृतिविमोक्षमनुस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्रिसंप त्याग त्स थ

तपसा च धर्मेण श्रद्धया ता जाताः ॥ तस्य गृहदासिका वभूविम ॥ इ ॥ क्षितिजयो भूमिविजये जितानां राज्ञां कन्या नः ॥ अस्मान् तेन रुद्धा ज्ञात्वा त
तो निर्मुच्य संसृतेर्विमोक्षो यस्मात् ॥ तस्य पादांबुजं अनुस्मरंतीर्नः परिणिनाय उदवहत् ॥ आप्तकामः ॥ ४१ ॥ राम श्री श्री ॥ राम ॥

श्री

नवयमिति साम्राज्यादिनं कामयामहे॥ किंतु एतस्य श्रीमत्पदरजो मूर्ध्ना वोढुं कामयामह इति॥ ननु तस्य गृहिणी यूयं सर्वं संपन्नमेव किं
मेवं काम्यते अत आहुः॥ हे साध्वि साम्राज्यं सार्वभौमपदं स्वाराज्यमैंद्रपदं भोज्यं तदुभयभोगभात्त्वविविधं राजत इति विराट्॥ तस्य भावो
वैराज्यमणिमादिसिद्धिभाक्त्वमित्यर्थः॥ पारमेष्ठ्यं ब्रह्मपदं आनंत्यं मोक्षं हरेः पदं तत्सालोक्यादि नतु कामयामह इति॥ यद्वा चक्र
वर्त्यात्मणोक्तक्रमेण प्रागादिदिक॥ चतुष्टयादिपत्यानि साम्राज्यभोज्यस्वराज्यवैराज्यानि व्याख्येयानि॥ तर्हि किं तत्पादरज एव काम्यते

२प

नवयं साधु साम्राज्यं स्वराज्यं भोज्यमप्युत॥ वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः परं॥४१॥ कामयामह एतस्य श्रीमत्पाद
रजः श्रियः॥ कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः॥४२॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः॥ गावश्चारय
तो गोपाः पादस्पर्शं महात्मनः॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्र्यशीतितमोऽध्यायः॥८३॥ ॥ श्रीशुक उवाच॥
त श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्युत स्वगोप्यः॥ कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा वि
स्मिस्युरलमश्रुकलाकुलाक्ष्यः॥१॥ इति संभाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु॥ आययुर्मुनयस्तत्र कृष्णरामदि
द्म दृक्षया॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः॥ विश्वामित्रः शतानंदो भारद्वाजोऽथ गौतमः॥३॥ ॥ ॥

अत आहुः॥ श्रियः कुचकुंकुमगंधाढ्यमिति॥ ब्रह्मादिसेव्ययाश्रियापि सेव्यतत्वादिति भावः॥ ननु तर्हि श्रीरति दुर्लभत्वात्॥ किंतु
वांछ्या अत आहुः॥ व्रजस्त्रिय इति यत यथा गावः गाः महात्मनो गच्छिरयतः पादस्पर्शं च गोपा यथा वांछंतीति तद्वत्॥ तत्पराणां सुलभ ह
मिति भावः॥४३॥ इति श्री भागवते महापुराणे दशमस्कंधे टीकायां त्र्यशीतितमोऽध्यायः॥८३॥ ॥ चतुर्भिरधिकाशीतितमे मुनिसमाग
मे॥ वसुदेवमखोत्सवः सह बंधुप्रस्थापनादिकं॥ सुबलपुत्री गांधारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स्वगोप्यः कृष्णभक्ता गोप्यः वि

श्री
भा॰ग॰
द॰ उ॰
८१

अनर्चुः अर्चितवंतः ॥७॥ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः ॥ यतानि पतावाभ्यस्य तस्य सदसः ॥८॥ जन्मभृतः सफलजन्मानः तत्फलं
जन्मफलं किं तत्राह योगीश्वरदर्शनं ॥९॥ किंच तेषु युष्माकं तर्दितमेतत्तावत् देवतानामपि दुःप्रापं अस्माकं तु स्पर्शनादिकमपि कथं
जातमितिविस्मयेनाह ॥ किमिति स्वल्पतपसां तीर्थस्पर्शनादिकमिदं किमस्मे भावितस्नानादिमात्रेत पोबुद्धिर्येषां तथार्चं

रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः ॥ पुलस्त्यकश्यपोत्रिश्च मार्कंडेयो बृहस्पतिः ॥४॥ द्वितस्त्रितश्चैकतश्च
ब्रह्मपुत्रास्तथांगिराः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोपरे ॥५॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना
नृपादयः ॥ पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥६॥ तानानर्चुर्यथा सर्वे सहरामोच्युतोर्चयत् ॥ स्वागतास
नपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥७॥ उवाच सुखमासीनान् भगवान् धर्मगुप्तनुः ॥ सदसस्तस्य महतो यतवाचोनुशृ
ण्वतः ॥८॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं ॥ देवानामपि दुःप्रापं यद्योगीश्वरदर्शनं ॥
९॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं ॥१०॥ न ह्यम्मयानि तीर्थानि
न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्व
सनोथ वाङ्मनः ॥ उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥१२॥ ॥ ॥ ॥ ॥ ॥ ॥

७१

यां देव इति च तदृष्टिर्येषां योगेश्वरस्पर्शनादिकमिदं किमस्माकं भावितमित्यर्थः ॥१०॥ एतत्प्रपंचयति न ह्यम्मयानीति त्रिभिः ॥११॥ वाङ्मनसयोरु
पास्यत्वादिविषयत्वं यो वाचं ब्रह्मेत्युपास्ते इति श्रुतेः अघं तन्मूलमज्ञानं न हरंति अत्र हेतवः भेदकृतः भेदकर्तारः यद्वा भेदबुद्धिर्जायते यतः ते तु वि
पश्चितो निरस्तभेदाः ते तु मुहूर्तमात्रसेवयैव घ्नंतीति ॥१२॥

राम
८१

तीर्थमिति बुद्धिः

२

अतः साधून्निन्द्यायामन्वात्मादिबुद्ध्यासज्जमानो निमज्जत्याह यस्येति ॥ आत्मबुद्धिरहमिति बुद्धिः त्रयो धातवो वातपित्तकफाः प्रकृ
तयो यस्य तस्मिन् कुणपे शरीरे स्वधीः स्वीय इति बुद्धिः ॥ भौमे भूविकारे इज्यदेवताबुद्धिः यस्य तीर्थबुद्धिः अभिज्ञेषु तत्त्ववित्सु यस्यैता
बुद्धयो न संति स एव गोषु अपि खरः दारुणः अत्यविवेकी ॥ यद्वा गवां तृणादिभारवाहः खरो गर्दभ इति उरस्य अनन्तु रूपश्रमनंती ॥ अत एव
स्थितानां धीर्दुर्धियो घाते ॥१४॥ ईशितव्यतां अन्वीश्वरतां कर्माधिकारितां जनसंग्रहमात्रमेतदित्याहुः स्मयंतः हसंतः ॥१५॥ अनन्वयं विहृ एवं
तत्राहुः क्वाम्यायन्मायेति ॥ तत्त्ववित्सूत्तमा अपि वयं कासो मायाय या मोहिता इति तामाहुः ॥ यदिति यत् यस्मात् ॥ ईहया नरचेष्टितैः

कुणपयं

भिज्ञेषु

ज्ञे

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचित् जनेष्वभि
ज्ञेषु स एव गोखरः ॥१३॥ श्रीशुक उवाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः
॥१४॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥१५॥ मुनय ऊचुः ॥ यन्मायया तत्त्व
विदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं ॥१६॥ अ
नीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं १२

शठः सन् ॥ ईशितव्यायति अनीश्वरवदाचरति गूढो वा नूनं त्वहमीश्वरस्येति ॥ किमित्येवमाचरेयं तत्राहुः ॥ अहो इति भगवतस्तव विचेष्टितं वि
चित्रमतर्क्यं भगवतस्तत्त्वमेवाहुः ॥ अनीह इति अनीहः अक्रियः ॥ अत एवात्मना स्वरूपमात्रेण बहुधेत्यत्र दृष्टान्तः ॥ यथा भौमैरिति
भौमैर्घटादिविकारैर्बहुनामरूपवती तथा घटशरावादिकारेण नामधेयं इति केवलं सत्यमिति श्रुतेः ॥ न तु कथमहं ब्रह्मादिस्तम्बादिकर्तीव स्वदेवत्व
त्वादिति तत्राहुः अहो इति विभूम्नः परिपूर्णस्य तदेवं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति ॥१७॥ ॥ ॥ ॥

श्री भाग० द० उ० ६२

जनसंग्रहमात्रं ॥ अथ पीतिस्त्रिभिः ॥ सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलयाचारेण वेदपथं च बिभर्षि ॥ १७ ॥ अत एव ब्राह्मणे
ष्वबहुमानमपृच्छिकोपाधीतिसहेतुकमाह ॥ ब्रह्मवेदाख्यं शुक्लं शुद्धं ते हृदयमनंतमद्रूपज्ञानइत्यत आह ॥ यत्रेति यत्र ब्रह्मणि व्यक्तं का
र्यमव्यक्तं कारणं ततः परं सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धं तत ॥ तस्माद्देहहृदयत्वात् वेदप्रवर्तकं ब्राह्मणकुलं शास्त्रयोनेः वेदरू
पात्मनः स्वस्य तव सद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि संमानयसि ॥ तत्तस्मादेव कारणात्त्वं ब्राह्मणानामग्रणीः श्रेष्ठः ॥ तत्त्व

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च ॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरु
षः परो भवान् ॥ १८ ॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं ॥ १९ ॥ तस्मा
द्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः ॥ सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान् ॥ २० ॥ अद्य नो जन्म साफल्यं
विद्यायास्तपसो दृशः ॥ त्वया संगम्य सद्गत्यापदंतः श्रेयसां परः ॥ २१ ॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे ॥ स्वयोग
मायया छन्नमहिम्ने परमात्मने ॥ २२ ॥ न यं विदंत्यमी भूपा एकारामश्च वृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानं काल
मीश्वरं ॥ २३ ॥ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् ॥ नाममात्रेंद्रियाभातं न वेद रहितं परं ॥ २४ ॥ ॥ ॥ ॥

वर्तकः सत्कर्माचरसीत्यर्थः ॥ १९ ॥ तस्मादीश्वरस्य ते देवं जनसंग्रहमात्रं वयं तु तव संगात्याकृतार्था इत्याह ॥ सतां गतिना त्वया संगं प्राप्य
यत्तस्मात्त्वं श्रेयसां परोवधिः ॥ २१ ॥ एकस्मिन्नेव स्थाने आरामो येषां ॥ ते पि कालं सर्वस्यादिकारणमीश्वरं नियंतारं ॥ एतत्सदृष्टांतमा
ह ॥ यथेति शयानः स्वप्नान्पश्यन् गुणतत्त्वदृक् स्वप्नविषये अतत्त्वदृष्टिः नाममात्रमिंद्रियेण मनसा आभातं सिंहव्याघ्रादिरूपमा
त्मानं वै देवदत्तादिरूपमात्मानं न वेद यथा ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीरामाय नमः ॥

राम ६२

एवं त्वा त्वं नाममात्रेषु स्वप्नादितुल्येषु विषयेषु इंद्रियैर्या ईहा चेष्टा प्रवृत्तिः सैव माया या विभ्रमच्चित्तो न वेद स्मृतेर्विकस्ये(?) उपप्लवात् नाशात् ॥
२४ ॥ अघौघस्य मर्षणं नाशं करोति ॥ यद्गंगाख्यं तीर्थं तस्यास्पदमाश्रयं तेंघ्रिं सुविपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य ते घ्रिं ददृशिम दृ
ष्टवंतो वयं वक्ष्यमिः ॥ उत्पत्ते(?) कृतो स्यान्नभक्त्या वहत्सा तानुग्रहं कुर्वित्यर्थः ॥ न त्वनुग्रहं(?) किं भक्त्यार्थया दृष्टवंत एव तन्न तथा भिति नेत्याहुः ॥ तस्मिका उ

एवं त्वा नाममात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२४॥ तस्याद्यते ददृशिमां
घ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथो
नुगृहाण भक्तान् ॥२५॥ शुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे म
नः ॥२६॥ उद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२७॥ वसुदेव उवाच ॥
नमो वः सर्वदेवेभ्यो ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥२८॥ नारद उवाच ॥ नाति
चित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ॥२९॥ संनिकर्षोत्र मर्त्यानामनाद
रकारणं ॥ गांगं हित्वा यथान्याम्भस्तत्रत्यो याति शुद्धये ॥३०॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

उत्सिक्तया भक्त्या उपहत आशयस्त्वस्य(?) यो जीवकोशो येषां त एव भवद्गतिं भवत्प्राप्तिमापुः ॥ नान्य इति ॥ २५ ॥ उपसंगृह्य चरणौ पाणिभ्यां
धृत्वा बभाषे इदमिति सुयंत्रितः ॥ २७ ॥ सर्वदेवात्मकेभ्य ऋषिभ्यः ॥ यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंति इति श्रुतेः ॥ येन कर्मणा
यथा कर्मणां निर्हारो निरासो यथा भवति तदुच्यतां ॥ २८ ॥ श्रीकृष्णं हित्वा अस्मान् पृच्छतीति विस्मितान् ॥ प्रत्याह नातिचित्र
तदुपायमाह्यालंबनमुपासनमुदरं ब्रह्मेति शार्कराक्षाः ॥ उपासते हृदयं ब्रह्मेत्यारुणयः ॥ ब्रह्म हैवता ऊर्ध्वत्वे योधिसर्पति तत्त्वच्छिरोश्रयतताक्
तोभवत ॥ तच्छिरसः शिरस्त्व इत्याद्याः श्रुतयो वदंतीत्याह ॥ उदरमुपासते इति ॥ ऋषिवर्त्मसु आर्षीणां संप्रदायमार्गेषु ये कूर्पदृशस्ते उद्दालव
नेमाणि सूक्ष्मस्थं ब्रह्मोपासते ध्यायंति ॥ कर्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति ॥ कूर्पं शर्करा रजो विद्यते दृष्टौ अक्षिषु येषां ते तथा
ज्ञः ॥ पिहितदृष्टयः स्थूलदृष्टि इति यावत् ॥ उदरस्य हृदयापेक्षया स्थूलत्वात् यद्वा कूर्पे सूक्ष्मे सूक्ष्मदृष्ट इत्यर्थः ॥ तथा हृदयस्थं हृ

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं ॥ तत उदगादनंत तव धाम शिरः परमं पु
नरिह यत्समेत्य न पतंति कृतांतमुखे ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्समेवालंबस्य ॥ तस्यैवेशाय प्रथममुदरस्थमुपासत इति भावः ॥ आरुणयस्त्वेसासात् ॥ हृदयस्थं दहरं सूक्ष्मं देवमुपासते ॥ हृदयविशे
षणं परिसरपद्धतिमिति परितः सरंति प्रसर्पंतीति परिसरा नाड्यस्तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः ॥ विशेषणस्य फलं मा हृत
कृ इति ततो हृदयात् ॥ भो अनंत तव धाम उपलब्धिस्थानं सुषुम्णाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरो मूर्धानं प्रति उदगात् ॥ उदसर्पत् ॥ उदरस्थं चे
हृदयस्थं च ब्रह्म परमं शिरः उदगात् ॥ मूलाधारादारभ्य हृदयमध्यात् ॥ ब्रह्मरंध्रं प्रत्युत्क्रांतमित्यर्थः ॥ कथंभूतं धाम यत्समेत्य प्राप्य ॥ पुन
रिह कृतांतमुखे संसारे न पतंति ॥ तथा च श्रुतिः ॥ शतं चैका च हृदयस्य नाड्यः ॥ तासां मूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमा
यन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति ॥ उदरादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः ॥ हंति मृत्युभयं देवो हृद्गतं तमुपा

स्कंधे १० राम ९७

ग्नत्वीक्षस्याप्यितर्हि हि जीववदुदरहृदयादिसंबंधेन तदनुप्रविष्टस्य तारतम्यं स्यादिति ॥ केन विशेषेणोपाधित्वमितीमामाशंकां परिहरंतः ॥ १
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता ॥ केवलो निर्गुणश्चेत्याद्याः श्रुतयः ल-
वतीत्याह ॥ स्वकृतविचित्रयोनिषु विशति ॥ स्वयं कृतासु ॥ उच्चनीचमध्यमासु मानुष्ययोनिषु ॥ अभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुत-
या उपादानतया प्रागेव विद्यमानत्वेन तत्प्रवेशासंभवात् विशन्निव वर्तमानः ॥ तरतमतोन्वयेनाधिभावेन चकास्सि अवभाससे ॥ स्वकृ-
तायोनीरुत्करोतीति स्वकृतानुकृतिः ॥ अनलवदग्निर्यथा स्वतस्तारतम्यहीनोपि काष्ठानुसारेण तथा प्रकाशते तद्वत् ॥ अथाता

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः ॥ अथ वितथास्वमूष्ववित-
थं तव धाम समं विरजधियोन्वयंत्यभिविपन्यव एकरसं ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ सम

वितथासु मिथ्याभूतासु अमूषु योनिषु अवितथं सत्यं यतः ॥ समं अविशेषं ॥ अतः सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयः ॥ अ-
न्वयंति जानंति तु इति पृथक्पदं अत्र हेतुः ॥ अभिविपन्यव इति ॥ अभितो विगतः पण्यवहारः ॥ पणो व्यवहारे इत्यस्य रूपं पन्युरिति
ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः अविशेषत्वादेवैकरसं सन्मात्रं ॥ अतस्त्वं वोपाधिकृततारतम्याभावादव्ययत्वेते सर्वस्यापा-
स्तत्वमिति भावः ॥ श्लोकतो वेतं स्वकृतेति श्लोकः ॥ स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं ॥ सर्वानुस्यूतसन्मात्रं भगवंतं भजामहे ॥ १९ ॥

श्री
भाग
३८
१०८

अपिच कुतोन्वियं मायांशकास्यात् ॥ भगवतो देहाद्युपाधिकृत दोषप्रसंग इति ॥ यतो विद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भाव
लक्षणायाबोधयंतत्पदं दोषं निषेधयंति स्वयच्छायं तु कृपीय च्छासावादिर्मे स एकः ॥ तत्त्वमसीत्यादयः न त्वन्यकर्तृत्वस्यात्मनः ॥ अतिरि
यृनीअत्वेन न क्रियते नेन ॥ तेन तस्य स्वरूपत्वं बोध्यते ॥ नेतद्धर्तुपते यतल्लक्षत्र ॥ यस्य देवे परा भक्ति यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्य
र्थाः प्रकाशंते महात्मन इत्यादि श्रुतयः ॥ एतावता रस्य भगवतश्चरणभजनमुपायं वदंतीत्याह ॥ स्वकृत इति ॥ स्वकृतेषु पार्जित
रूपेषु देहेषु अमीषु नरादिषु भोक्तृत्वेन वर्तमानं पुरुषं ॥ अखिलशक्तिधृतः सर्वशक्त्याश्रयस्य तवांशकृतं वदंति अंशइ

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंशकृतं ॥ इति नृगतिं विविच्य कवयो निगमावपनं भ
वत उपासतेंघ्रिमभवं भुवि विश्वसिताः ॥ २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वांशः कृत इव कृतः त्वद्रूपं वदंतीत्यर्थः ॥ ननु कार्यकारणसंहतस्य जीवस्य कुत एवंभूतत्वं तत्राह ॥ अबहिरंतरसंवरणमिति बहिः कार्यमंतः
कारणं वस्तु तस्तदावरणशून्यं तयोरसत्त्वादित्यर्थः ॥ इत्येवं नृगतिं तु जीवस्य गतितत्त्वं विविच्य विशोधयंतः कवयः ॥ अन्यथेदं न प्राप्य
त इति ज्ञानतः ॥ निगमावपनं निगमोक्तकर्मणामावपनं ॥ आसमंतादुप्यते स्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः ॥ य
त्रार्पितानि कर्माणि मुक्ति फलंति ॥ तं भवतोंघ्रिं सभवं भवनिवर्तकं विश्वसिताः कृतविश्वासा इत्यर्थः ॥ उपासते श्रवणवंदनादिभिः
सेवंते भुवीति मर्त्यलोके इदमेवोचितमिति दर्शयति ॥ त्वं देश स्य समेशानत्वन्मायाकृतबंधनं ॥ त्वदंघ्रिसेवामादिश्य परानंदनि
वर्तय समादय ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

राम
१०८

श्री

भक्तिरेव परमं साधनमिति वचनमङ्गीकुर्वन्तो भक्तिं स्तुवन्ति ॥ दुरवगमेति ॥ भो ईश्वर दुर्वोध्यं यदात्मतत्त्वं ॥ तस्य निगमाय ज्ञापनाय
यत्रात्ततनोस्तवाविष्कृतमूर्तेः तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥ चरितमेव महानमृताब्धिस्तस्मिन् परिवर्तो विगाहः ॥ तेन प
रिश्रमणाः परिवर्धनार्थाः ॥ श्रमणां श्रमः ॥ गतश्रमाः इत्यर्थः ॥ अपवर्गमपि केचिन्न परिलषन्ति नेच्छन्ति उतान्यत ॥ केचिदिति एवंभूता भक्ति
रसिका विरला इति दर्शयति ॥ न केवलमन्यन्नेच्छन्ति ॥ किंतु ते तव चरणसरोजहंसकुलसंगविसृष्टगृहाः दिग्भावमप्युपेक्षन्ते इत्याह ॥ तव चर गतश्रमणाः

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्र
मणाः ॥ न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्ट
गृहाः ॥ २१ ॥

णसरोजहंसकुलसंगविसृष्टगृहा इति तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं संघस्तेन संगः ॥ तेन विसृष्टा गृहा
येस्ते तथा ॥ अनेन श्रवणकीर्तने दर्शिते स्फुरति मुक्तेरप्याधिक्यं भक्तेर्दर्शयति ॥ तथाह्ययं सर्वदेवानुमंतिरुक्तश्च वा ब्रह्म हरे
वादिनश्चेति व्याख्यातं च सर्वे भागवता निर्मुक्ता अपि ॥ विग्रहं लीलया कृत्वा भजंतीति त्वत्कथामृतपाथोधौ विहरंतो महामु
दः कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमं ॥ २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम

श्री भा० द० ८९

अरामम स्मपश्यंतिन तं पश्यति कश्चन ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उ
क्थशासश्चरंतीत्याद्याः श्रुतयः अतः क्रोशंत्यो जगदात्मनीश्वरे रतिमुपदिशंतीत्याह ॥ त्वदनुपथमिति ॥ त्वदनुपथं त्वदनुव
र्तित्वत्सेवोपयिकमिदं कुलायं कौलीयत इति शरीरं आत्मसुहृत्प्रियवत् ॥ आत्मा च सुहृच्च प्रियश्च तद्वत् ॥ चरति स्वाधीनतत
या वर्ततेन्यर्थः ॥ तथापि त्वयि उन्मुखे हिते प्रिये आत्मनि च ॥ अप्यर्थे चकारः एवंभूते सत्यपि त्वयि ॥ बत अहो कष्टं न रमंति न स
त्यादिना भजंति ॥ असदुपासनया देहाद्युपलालनेन आत्महनः प्रमादिनः कुतो यदनुशयाः ॥ यस्या असदुपासनाया अनुश
या वासना येषां ते कुशरीरभृतः संतः ॥ उरुभये संसारे भ्रमंति परिवर्तंते अत आत्महन इति भावः ॥ त्वय्यात्मनि इतराद्येमन्मनो रमता

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च ॥ न बत रमंत्यहो असदुपा
सनयात्महनो यदनुशया भ्रमंत्युरुभये कुशरीरभृतः ॥ २२ ॥ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपा
सते तदरयोपि ययुः स्मरणात् ॥ स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसु धाः २३

मिह ॥ कदाचिमे दृष्टांतमम मानुरूपं संभविष्यति ॥ २२ ॥ इदानीमात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्याद्याः श्रुतयो
ध्यासनातत्वेनोपदिशंतीत्याह ॥ निभृतमरुन्मनोक्षदृढयोगयुज इति ॥ मरुत्प्राणः मनश्च अक्षाणींद्रियाणि च निभृतानि संय
मितानि भृतानि संयमितानि यानि च येन तेन च दृढयोगं युंजंतीति दृढयोगयुजः ॥ ते तथाभूता संतो मुनयोपि हृदि यत्तत्वमुपासते ॥
तदेवारयोपि तव स्मरणात् ययुः प्रापुः स्त्रियोपि कामतः ॥ उरगेंद्रभोगभुजदंडविषक्तधियः ॥ अहं देहसहशायो भुजदंड्योर्विष
क्ता धीर्यासां ताः परिच्छिन्नदृष्टयः समदृशः समं परिच्छिन्नत्वापश्यंत्यो वयं श्रुतयोपि अभिमानिन्यो देवता अपि ते समा एव कृपाविषयत
या अंघ्रिसरोजसुधा अंघ्रिसरोजं सुधारयंत्यः अयं भावः एवंभूतस्तव चरणस्मरणानुभावः ये योगिनस्त्वं हृद्यालंबनमुपा
सते या शुश्रूवयन्तो समं पश्यामः याश्च स्त्रियः कामतः परिच्छिन्नं ध्यायंति ये च द्वेषेण सर्वा अपितास्त्वामेव प्राप्नुयंतीति कारणस्मर

श्री

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ को अद्धा वेद क इह प्रवोचत् ॥ कुत आजाता कुत इयं विसृष्टिः ॥ अर्वाग्देवा अस्य विसर्जनेनाथ

थ को वेद यत आबभूव ॥ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ॥ तद्धावतोन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाती

त्याद्याः ॥ श्रुतयः भगवन्तं दुर्ज्ञेयं वदन्त्यो भक्तिमेवोपरीकुर्वन्तीत्याह क इह नु वेदेति ॥ बताहो भगवान् इह जगति अग्रेसरं पूर्वसिद्धं

वि.

त्वां अवरजन्मलयः ॥ अर्वाचीनोत्पत्तिनाशवान् को नु साक्षान्नु वेद जानाति ईश्वरस्य सर्वेषामपि उत्तरत्वादन्यस्य चार्वाचीनत्वे ॥ प्रमाणावदनृषा

नकारणाभावमाह ॥ यत उदगादिति यतस्त्वत्तः ॥ ऋषिर्ब्रह्मा उदगाद् उत्पन्नः यं ब्रह्माणमनु उभये ॥ आध्यात्मिकाधिदैविका देवगणा

२६३

क इह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये
तर्हि न सन्न चासदुभयं न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ॥ २४

उत्पन्नाः ॥ ततोप्यर्वाचीनाः सर्वे यदा तु भवान्सर्वमेवात्मन्युपसंहृत्य शयीत तर्हि तदा ॥ अनुशायिनां जीवानां ज्ञानसाधनं नास्ति

यतस्तदा न सत् ॥ स्थूलमाकाशादि न वा असत् ॥ सूक्ष्मं महदादि न च उभयं सदसद्भ्यामारब्धं शरीरं न च कालजवः ॥ तन्निमित्तं क्षतं काल

वैषम्यं एवं सति तत्र तदा न किमपि ॥ इन्द्रियप्राणाद्यपि न च ज्ञापकं शास्त्रमपि ॥ अयमभिप्रायः ॥ अर्वाक्सृष्टिगतानां देहाद्युपाधि

शतान्तराणां कालवशेन च मलिनसत्वानां न तावत् ॥ भगवज्ज्ञानसामर्थ्यं ॥ तथा च श्रुतिः ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमन्त

तरं बभूवेत्याद्याः ॥ यदा तु प्रलयसमये न बहिरन्तरमस्ति तदापि साधनाभावान्न भगवज्ज्ञानं ॥ अतस्त्वदेकशरणतया श्रवणकीर्तनादि

भिर्भक्तिरेव सद्धिकरेति ॥ कात्यं त्वयाऽऽदिसंकष्टः कच्छसमन्सह त्वत् ॥ दैन्यं वंघोरयासिंधो भक्तिं मे देहि हे दिशा ॥ २४ ॥ ॥ राम ॥

पो

य

ते

श्री

श्री
भाग०
द० ३०
१९

इतोपि न ह्यनेन शक्यमुपदिशतामपि भ्रमवाक्यस्यादित्याह ॥ जनिमसत इति ॥ असतो जगतो जनिमुत्पत्तिं ये वैशेषिका वदंति ॥ अस
त एव ब्रह्मत्वस्योत्पत्तिं ये च पातंजलादयः ॥ सत एकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदंति ॥ ये नैयायिका इतरे अपि ये च सांख्याद
यः ॥ आत्मनि भिदां भेदं ये च मीमांसकाः विपणं कर्मफलव्यवहारमृतं सत्यं समामनंति ते सर्वे आरूपितैर्भ्रमैरेवोपदिशंति ॥ न तत्त्वं हस्या
मदेव सोम्येदमग्र आसीत् ॥ ब्रह्मैव सन्ब्रह्माप्येति ॥ अनीशया शोचति मुह्यमानः ॥ अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितंमन्य
मानाः जंघन्यमाना अपि यति मूढा ॥ अंधेनैव नीयमाना यथांधाः ॥ एकमेवाद्वितीयं ब्रह्म ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवदित्या

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरंत्युपदिशंति त आ
रुपितैः ॥ त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदव
बोधरसे ॥ २५ ॥

दिश्रुतिविरोधात् ॥ किंच वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं संगच्छेतेन तु तदस्तीत्याह ॥ त्रिगुणमयः आत्मानिति भिदा त्वद
वबोधकृता त्वयीति ॥ त्रिगुणमयः ॥ पुमानित्यनेन हेतुना या भिदा उपलक्षणमेतत् जिह्वादि सा यस्मात्त्वयि विषये ॥ अबोधकृता ॥ त्वद्वि
षया ज्ञानकृता ॥ तर्हि किमज्ञानं मिथ्येति वस्तुतः ॥ पुसि तिनैवेत्याह ॥ ततः अबोधात् ॥ परत्र परे असंगे ॥ अवबोधरसे ज्ञानघने सैंधव
घनवत् ॥ अबोधो न भवेत् न संभवतीत्यर्थः ॥ मिथ्यातर्कसुकर्कशेरितमहावादांधकारांतरभ्राम्यन्मंदमतेरमंदमहिमंस्त्वज्ञान
वर्त्मास्फुटम् ॥ श्रीमन्माधववामनत्रिनयन श्रीशंकर श्रीपते गोविंदेति मुदा वदन्मधुमते मुक्तः कदा स्यामहम् ॥ २५ ॥ १९ राम

ननु ॥ असद्यदि नोत्पद्यते यदि च त्रिगुणमयः प्रकृतेर्न भवति ॥ तर्हीदं प्रपंचजातं प्रकृतस्वरूपग्राह्लीमत्वकं स्यात् ॥ कथं तर्हि तद्योः सत्त्वेन प्रतीतिरित्यत आह सदिव मन इति ॥ मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातं असदेव सदिव विभाति ॥ कथमिति चेत्तत्राह ॥ त्वयीति त्वय्यधिष्ठाने अधिष्ठानसत्तया सद्रूपत्वं प्रतीयते इत्यर्थः ॥ न केवलमिदं कारणस्यैव किंत्वामनुजात् ॥ मनुजः पुरुषः अभिविधावाकारः ॥ पुरुषमभिव्याप्येति ॥ पुरुषस्यापि एवमसत्त्वप्रतीतिर्मनोमात्रविलसितत्वात् ॥ तथा च श्रुतिः असतोऽधि मनोऽसृज्यत मनः प्रजापतिमसृजत ॥ सदाद्रूपं मनस्येव प्रतिष्ठितं यदिदं किंच नेति ॥ ए ॥ तत्त्वात्मविदामपि विश्वं सदेव सत्

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मवि-
दः ॥ न हि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं ॥ २६ ॥

रति ॥ अतः कथमसत्स्यादत आह ॥ सदभिमृशंतीति आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकमिदं विश्वमात्मतये ॥ व सदभिमृशंति दिति जानंति ॥ आत्मकार्यत्वात्तद्रूपमित्यर्थः ॥ तथा हि यदुपादानकं यत्कार्यं भवति तत्तेनैव रूपेण प्रतीयते उपादीयते वेति लोकाचारेण दर्शयति ॥ न हि विकृतिमिति ॥ कनकस्य विकृतिं कुंडलादि कनकार्थिनो न त्यजंति ॥ अत्र हेतुः तदात्मतया कनकरूपत्वेनेत्यर्थः अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषमात्मतयैवावसितं निश्चितं ॥ यत्सत्त्वतः सदाभाति जगदेतदसत्स्वतः ॥ सदाभासमसत्यस्मिन्भगवंतं भजाम तं ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

श्री
भाग॰
ट॰ ७॰
२२२

नत्वसत्यं त्वन्निमनं तं व्रत्यनेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ इत्यादिश्रुतिभिरेवंभूतस्य भगवतः ॥
प्रतिपादनात्तत्वं न हुंकारमेवेति कृतं भक्त्या अत आह ॥ तव परिचरंतीति ॥ तवेति कर्मणि षष्ठी त्वां ये परिचरंति ॥ ह्रदसिव्य वहिता श्च
ति यच्छ हेतत्सव्वहो नमदोषः केन रूपेणाखिलसत्त्वनिकेतया ॥ अखिलानि सत्त्वानि निकेतो यस्य स तथा तस्य भावः ॥ तत्तया
सर्वभूतावासत्वपेत्यर्थः ॥ उत एव अविगणय्यातिरस्कृत्य तत एव निःशृतस्ते त्वोः शिरो मूर्धानं पदा पादेन ॥ आक्रमंति मृत्योर्मूर्ध्नि पदं पद
धतितरंतिमुच्यंते इत्यर्थः ॥ ये पुनर्विमुखा अभक्ता स्तान् गिरा वाचा पशूनिव विबुधान् विद्वांसोपि परिचयसे बध्नासि अतः त्वयि क

तव परिचये चरं त्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निरृतेः ॥ परि
वयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः ॥ २७ ॥

कृतसौहृदाः ॥ त्वयि कृतं सौहृदं प्रेम यैस्ते ॥ खलु निश्चितं भुवनं तु पवित्रयंति ॥ त्वामात्मानमन्यानपीति शेषः नेतरे ॥ तथा च श्रुतिः तस्य वा
कृतिर्नामानि दामानि तस्येदं वा चात त्वा नाम भिर्दामभिः ॥ सर्वं सितमित्यादि अयमभिप्रायः सत्यमेवंभूतमात्मानं श्रुतयः प्रतिपाद
यंति ॥ तत्र च यद्यपि सत्तु तोपरो हृत्वादपरोक्षमेव तत्तान सुत्पद्यते ॥ तथापि संभावना विपरीत भावनातिरस्कृतत्वात्मलिनचित्ते अपरो
क्षमिव न भवतीति ॥ नापरोक्षं संसारबंधमति हृत्तिसमर्थं भगवत्परिचर्यया तु सम्यगमलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञाना
नामयत्न एव करकलितो मोक्ष इति ॥ तथा च श्रुतयः देहांते देवः परंब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्यः ॥ यस्य देवे परा भ
क्तिर्यथा देवे तथा गुरौ इत्यादयः ॥ तपंतु तापैः प्रपतंतु पर्वताद् टंतु तीर्थानि पठंतु चागमान् ॥ यजंतु यागैर्विवदंतु योगैर्हरिं विना नैव मृ

२२१

मधुपर्कएवार्हणं । तस्मिन्वा ऊढपचितमर्हमर्हणमाहरत् आनीय समर्पितवानित्यर्थः ॥३८॥ ४० । सत्कृतं संमानितं निरनुग्रहे हे क्रूरे कथं केन च का
रेणास्य जीवथेत्यर्थः ॥ सौनः पशुघाती स एव पालको येषां अवीनां मेषाणां तद्वत्तुल्या इत्यर्थः ॥४१॥ निरनुग्रहतामाह योऽवधीदिति तोकान्
तोकानि । असुतृप् असुभिरेव तर्पयतीत्ययः अतः खलः तस्य कंसस्य प्रजानां हे अक्रूर येषां जीवनमात्रमपि दुर्लभं ते यावः । किं त्वात्मा विचार

निवेद्य गां चातिथये संवा
पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनं ॥ प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हमाहरत् ॥३८॥ निवेद्य गां चातिथये संवा
ह्य श्रांतमादृतः ॥ अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ॥३९॥ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ॥ मुखवा
सैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ॥४०॥ पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे ॥ कंसे जीवति दाशार्ह सौनपाला इ
वावयः ॥४१॥ योऽवधीत्स्वस्वसुस्तोकान्क्रोशंत्या असुतृप् खलः ॥ किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥
४२ ॥ इत्थं सूनृतया वाचा नंदेन सुसभाजितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमं ॥४३॥ इति श्रीभागवते महापुराणे
दशमे अक्रूरागमने ऽष्टत्रिंशोऽध्यायः ॥३८॥ श्रीशुक उवाच ॥ सुखोपविष्टः पर्यंके रामकृष्णोरुमानितः ॥ लेभे म
नोरथान्सर्वान्पथि यान्स चकार ह ॥१॥ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने ॥ तथापि तत्परा राजन्न हि वांछं
ति किंचन ॥२॥ सायंतनाशनं कृत्वा भगवान्देवकीसुतः ॥ सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥३॥ ॥

यामीति ॥४२॥ मधुरया वाचा सूनृतया सत्कृतः तथैव वाचा परिपृष्टेन प्रश्नेन अध्वपरिश्रमं संसारश्रमं ॥४३॥ इति अष्टत्रिंशः ॥३८॥ नवत्रिंशे पुरीं गच्छन्ते गोपि
कोत्कंठ्यः अक्रूरेणाथ कालिंद्यां विष्णुलोकस्य दर्शनम् ॥१॥ भक्तानां मनोरथाः सत्या भवंतीति द्योतयन्नाह सुखोपविष्ट इति । रामकृष्णाभ्यां उरु अ
धिकं मानितः ।२।

हेतात हे सौम्य स्वागतं यथा तथा आगतः ॥ स्वज्ञातिबंधूनां स्वेस्तुहृदः ज्ञातयः सपिंडाः बंधवोऽसंपिंडाः संबंधिनः तेषामपि किं अनमीवं अ
पापं ॥ अङ्गः स्वस्वत्वेमितियावत ॥ अनामयमारोग्यं ॥ ७ ॥ एवं प्रश्नोऽपि ममनाति संगतिइत्याह किंतिति ॥ अंगहे अक्रूर हे केकामि ॥ अस्माकंत
लस्यामयरोगे नोमातुल इति नाम यस्य तस्मिन् ॥ नः स्वानां ज्ञातीनां तस्य प्रजासुच ॥ ८ ॥ अस्मत् अस्मन्निमित्तं इहजिनडुः खे आर्ययोः यद्धेतोः यो
ऽहमेव हेतुः तस्मात् ॥ ६ ॥ हे सौम्य स्वानां वो दर्शनं अद्य मम संजातं तत् दिष्ट्या भद्रं ॥ १० ॥ माधवः मधोर्वंशजः ॥ ११ ॥ यः धन्नर्मावक्त सामंदेशो यस्य

कृष्ण उवाच ॥ तात सौम्या गतः कच्चित्स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबंधूनाममनमीवमनामयं ॥ ७ ॥ किं नु नः कुश
लं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च ॥ ८ ॥ अहो अस्मदभूद्भूरि पित्रोर्वृजिनमा
र्ययोः ॥ यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ॥ ६ ॥ दिष्ट्याद्य दर्शनं स्वानां मह्यं वः सौम्य कांक्षितं ॥ संजातं वर्ण्यतां
तात तवागमनकारणम् ॥ १० ॥ पृष्टो भगवता सर्वं वर्णयामास माधवः ॥ वैरानुबंधं यदुषु वसुदेववधोद्यमं ॥ ११ ॥ यत्सं
देशो यदर्थं वा दूतः संप्रेषितः स्वयं ॥ यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः ॥ १२ ॥ श्रुत्वाक्रूरवचः कृष्णो बलश्च प
रवीरहा ॥ प्रहस्य नंदं पितरं राज्ञादिष्टं विजज्ञतुः ॥ १३ ॥ गोपान्समादिशत्सोऽपि गृह्यतां सर्वगोरसः ॥ उपायनानि गृह्णी
ध्वं युज्यंतां शकटानि च ॥ १४ ॥ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ १५ ॥ द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः
किल ॥ एवमाघोषयत्क्षत्त्रा नंदगोपः स्वगोकुले ॥ १२ ॥ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ ॥

यदर्थं चारणादिभिर्वा तनार्थं अस्य कृष्णस्य स्वजन्मकृष्णस्य जन्म ॥ आनकदुंदुभेः सकाशात् ॥ १२ ॥ विजज्ञतुः विशेषेण ज्ञापयामासतुः ॥ १३ ॥ सोऽपिनं
दोऽपि गोपान्समादिशत् ॥ तदेव दर्शयति गृह्यतामित्यादिना ॥ गोरसः क्षीरादि ॥ उपायनानि ढौकनवस्तूनि ॥ १४ ॥ रसान् दुग्धादीन् शब्दकुलेन दर्श
यति ॥ अचिकित्सस्य रोगस्य चिकित्सार्थं रसान् दास्याम इति ॥ स्वजात्ररसाद्धि धत्तेन ॥ आघोषयत् सर्वतो घोषितवान् ॥ १२ ॥ ॥ राम ॥

एवं तावत्परमात्मनः ॥ सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः ॥ संसरंतो भजंतीत्युक्तं ॥ तत्र यद्येकाविद्या तदा जीवस्या
पि एकत्वादेकस्य मुक्तौ सर्वमुक्तिप्रसंगः ॥ अथवा नाना विद्यास्तर्हि तस्यैवांशांतरेण संसारानपगमादनिर्मोक्ष इत्यादितर्कैवल्ये न वे
त्स्यत एव नानात्मवादः तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न स्यात् ॥ देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वस्या
त् ॥ अतः सर्वगता नित्याश्चेति केचन मन्यंते ॥ तत्र तत्तावदुक्तदोषप्रसंगः ॥ अविद्याभेदेन वा बद्धमुक्तव्यवस्थासंभवात् ॥ ईश्वरस्य तु के

प्र

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा ॥

नांशांशेन न संसारशंकेत्युक्तत्वेनैव प्रसिद्धं चात्मैक्यं सर्वश्रुतिषु ॥ किंच इमं पक्षं संतयोमिब्रह्मणामपि न सहंत इत्याहुः अपरिमिता इ
ति ॥ अपरिमिता इव वस्तुत एवानंता ध्रुवा नित्या नैव ब्रह्मरूपेणानित्याः सर्वगताश्च तनुभृतो जीवा यदि स्युः ॥ तर्हि तेषां समत्वात् शास्यता न
घटते इति कृत्वा हे ध्रुव नियमो नियमनं तत्त्वया न स्यात् ॥ इतरथा तु घटते कथं यन्मयं तदुपाधितो यद्विकारस्तदायं जीवाख्यमजानि जातं ॥

श्री
भाग
द॰ ३
११३

ततस्संकारस्यनियंतृत्वाभिमतं कं भवेत् ॥ अविज्ञेयकारणतयाऽपरित्यऽपकितत्वं ॥ समनुस्मृतं न तु किं यत्तच्छब्दे ज्ञायते वेऽयस्यतां तदि-
ति ॥ अत आह ॥ अनुज्ञानतां यदमतमिति ज्ञानीमइतिवदतां ॥ यदमतमविज्ञातप्रायं अविषयत्वात् ॥ तथा च श्रुतिः ॥ यस्यामतं तस्य
मतं मतं यस्य न वेद सः ॥ अविज्ञातं विजानतां विज्ञातमविजानतां ॥ अवचनेनैव प्रोवाच स ह तूष्णीं बभूवेत्यादि ॥ किंच मतस्य ज्ञा-

अत्र निश्चयन्मयं तदविज्ञेयं नियंतृ भवेत्समनुज्ञानतां यदमतं मतं तु दृष्टतया ॥ २ ॥

नस्य दृष्टतयादोषश्रवणात् ॥ तथा च श्रुतिः ॥ यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं तदस्य त्वं यदस्य वेदे-
ष्वित्यादि ॥ तस्माद्यत्नं कृत्वा वद्योतमतर्क्यं किमपि सर्वानुस्यूतत्वेन सर्वनियंतृ भवेदित्यर्थः ॥ अंतर्यामी सर्वलोकैकगीतः श्रुत्या
युक्त्या चैवमेवावसेयः यः सर्वज्ञः सर्वशक्तिरीशसिंहः ॥ श्रीमत्तं तं चेतसैवावलंबे ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ४

११३
राम

न्तु यदि च परमात्मनो जीवा जायंत इति नित्यत्वभाव उच्यते ॥ तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतहानाकृताभ्यागमप्रसं
गः स्यात् किंच तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् ॥ न चैतद्युक्तं ॥ स्वप्रकाशानंदात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य
मोक्षत्वाभ्युपगमादित्याशंक्योपाधिजन्मैव जन्म जीवस्य स्वरूपहानिरेव स्यात् ॥ जीवा जाता उच्यते ॥ न स्वतो घटते इत्याह न घटत
इति तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् उत पुरुषस्य वा उभयोर्वा आद्ये जीवानां जडत्वापत्तिः ॥ द्वितीये पुरुषस्य विकारित्वप्रसंगः ॥ अ
त एव न तृतीयेऽपि इत्याशयेनोक्तं ॥ प्रकृतिपुरुषयोरुद्भवो न घटत इति श्रुत्याजत्वप्रतिपादनार्थमित्याह ॥ अजयोरिति ॥ तथा

न घटत उद्भवः प्रकृतिपुरुषयोरजयोरुभययुजां भवेत्प्रसृतो जलबुद्बुदवत् ॥ ॥ ॥ ॥ राम ॥

च श्रुतिः ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपाः ॥ अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजो
ऽन्य इति ॥ उभययुजां तु भवंति ॥ उभयं च ते युज्यत इति ॥ उभयप्रकृतिसंबंधपरस्परसंबंधमात्रमितियावत् ॥ तेन उद्भूतः ॥ प्राणाद्यु
पाधयो जीवा जायंत इत्यर्थः ॥ जलबुद्बुदवदिति ॥ यथा केवलेनानिलेन जलबुद्बुदा न भवंति ॥ किंतु मिलिताभ्यां तद्वत् ॥ तत्र यथा
निलो निमित्तं जलमुपादानं ॥ एवमत्रापि प्रकृतिर्निमित्तं पुरुषस्तूपादानं ॥ तस्माद्वा एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे
देवाः सर्वाणि भूतानि ॥ सर्व एव आत्मनो व्युच्चरंतीत्यादिश्रुतिषु ॥ चेतनाचेतनप्रपंचस्य परमात्मनोपादानत्वश्रवणात् ॥ न च विका
रित्वं परिणामानंगीकारात् ॥ केचित्तु नः परिणाममंगीकृत्यात्मनो विकारभिया विपरीतं निमित्तोपादानभावमिच्छंति ॥ सर्वथा ता
वत्प्रकृतिपुरुषैक्या

श्री
भाग०
द० उ०
१२४

तदेकमेवाद्वितीयं ब्रह्म अज्ञानमेकामविनाशी वा ॥ अथेयमात्मेत्यादिश्रुतिबलाज्जीवानामौपाधिकमेव जन्म न स्वत इत्युक्तं ॥ उपाधि
लये न परमात्मनि प्रवृत्तस्य श्रवणादपि न वास्तवं जन्मेत्याह त्वयि त इति ॥ कारणात्मनि त इमे जीवाः तत इति न वास्तवं जन्म विविधना
मगुणैरिह नेकधाकारकार्योपाधिभिः सह लिल्युः लीना बभूवुः ॥ तत्र स्वस्विप्रलययोर्मधुन्यशेषरसा इव लीयंते ॥ यथा मधुनि स्तक
लत्तरुकुसुमरसा विशेषतो नुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यंते ॥ एवं स्वापादौ विशेषमात्रलयात्कारणस्याविद्यमानत्वात्तु सोम्या
न्येतो वर्तते ॥ प्रलये तु कारणस्यापि लयात् ॥ त्वयि परमात्मनि निरुपाधौ सरित इवार्णवे विलीय त इति विवेकः ॥ तथा च श्रुतयः यथा

त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ ३१ ॥

सोम्येमा मधु निमधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां गमयंति ॥ ते यथा न विवेकं लभंते ॥ अमुष्याहं वृक्ष
स्य रसो स्मीत्येव ॥ खलु सोम्येमाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ॥ यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छंति नाम
रूपे विहाय ॥ तथा चेतनानामनुपाधिकत्वं च ॥ परात्परं पुरुषमुपैति दिव्यमित्याद्याः ॥ यस्मिन्नुद्भिलयमपि यज्ञाति विकल्पयादेवजी
वोपेतं गुरुकरुणया केवलात्मावबोधे ॥ अत्यंतांतं व्रजति सहसा सिंधुवत्सिंधुमध्ये मध्ये चित्ते त्रिभुवनगुरुं भावयेतं नृसिंहं ॥ ३१
॥ ॥

एवंतावत्परमेष्ठ्यात् जीवाजायंते ॥ तद्वशेनचकर्मणाऽनुवर्तितभ्रमस्तत्रलीयंतेइति संसारचक्रभ्रमणमुक्तं ॥ इदानींतन्निवृत्तयेपरी
त्यक्तानिपरीत्यलोकाद्यपरीत्यसर्वाश्चदिशोदिशश्च ॥ उपस्थायप्रथमजात्मतस्मात्मानात्मानमभिसंविवेश ॥ त्याद्याःभगवदनुष्ठ
निविदध्यनीत्याहश्वतवेति ॥ हेईशअमीषुतवमाययाभ्रमत्सुक्रमलक्षणमेवगत्वाज्ञात्वासुधियः ॥ भृशंत्वयिप्रभवेभवनि
वर्तकेभावंस्वभावमनुष्ठतिंदधतिकुर्वंति ॥ अतएवभवंसंसारंतुप्रभवोयस्मिन्तत्प्रभवंततः किमतआह ॥ कथमिति ॥ अनुवर्ते

भ्रमत्सुतवमाययाअमुममीषुवर्गात्मभृशंत्वयिसुधियोभवेदधतिभावमनुप्रभवं ॥ कथमनुवर्ततांभवभयंतवय
द्भ्रुकुटिःसृजतिमुहुस्त्रिनेमिरभवच्चरणेषुभयं ॥ ३२ ॥ ॥ ॥ ॥ राम राम श्रीकृष्णाय

तामनुवर्तमानानांत्वमेवशरणंभक्तानांभवभयंसंसारभयंकथंभवेत् ॥ नकथंचिदपीत्यर्थः ॥ अतःयद्यस्मात्त्वद्भ्रुकुटिः भ्रूसं
गदूपचक्रनेमिस्त्रिनेमिर्मयइवावक्रेदाः ॥ शीतोष्णवर्षकालात्मकायस्यसंवत्सरात्मकस्यसः ॥ अभवच्चरणेषुतेनभवान्शरणं
रक्षितायेषांतेषांभयंजन्ममरणादिलक्षणंसृजतिकरोति ॥ अतएवंहेतंसंसारमाकलय्य ॥ तन्निवृत्तयेसुधियस्त्वयिभावंदध
तीति ॥ संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तं ॥ कथंचिदापन्नमिहप्रपन्नं ॥ त्वमुद्धरश्रीनृहरेइतिश्लोके ॥ ३२ ॥ राम ॥

श्री
भाग०
द० उ०
२२५

सचभगवतिभावोमनोनियमेसतिभवति सोपिगुरुप्रसादनादिति ॥ गुरूपसदनंविदधतितद्विशिनष्टिसउक्तमेवाभिगच्छेत्समि
त्पाणिःश्रोत्रियंब्रह्मनिष्ठंआचार्यवान्पुरुषोवेदनेघातकेणमतिरापणेय प्रोक्तान्येनैवसुज्ञानायप्रेष्ठेत्याद्याःश्रुतयःसमाह ॥
विजितहृषीकवायुभिरितिविजितानिहृषीकाणीन्द्रियाणिवायुःप्राणश्चयैस्तैरपि ॥ अदांतमनस्तुरगं ॥ अदांतमदमितंमनएवतुरंगः
तुरंगत्वसाम्यात ॥ तंइहयेयंतुंनियंतुंयतंतिप्रयतंते ॥ अतिलोलमतिचंचलंगुरोश्चरणंसमवहायानाश्रित्य ॥ उपायेषुखिद्यंते
त्युपायखिदः ॥ संतोव्यसनशतान्विताबहुव्यसनाकुलाइहसंसारसमुद्रेसंतितिष्ठंतिदुःखमेवप्राप्नुवंतीत्यर्थः ॥ हे अज

विजितहृषीकवायुभिरदांतमनस्तुरंगंयइहयतंतियंतुमतिलोलमुपायखिदः व्यसनशतान्विताःसमवहा
यगुरोश्चरणंवणिजइवाजसंत्यकृतकर्णधराजलधौ ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

अकृतकर्णधराअस्वीकृतनाविकावणिजोयथातद्वत् ॥ उक्तंच ॥ नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारम् ॥ म
यानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महेति ॥ प्राकृतैःसंस्कृतैश्चैववाचापद्यास्त्वैस्तथा ॥ देशभाषादिभिःशिष्यं
बोधयेत्सगुरुःस्मृतः ॥ गुरुणोपदर्शितभगवद्भजनस्वभावानुभूतोस्वतएवमनोनिश्चलंभवति नान्यथेतिभावः ॥ यदापरानं
दगुरोभवत्पदेपदंमनोमेभगवल्लभेत ॥ तदानिरस्ताखिलसाधनश्रमः ॥ श्रयेयसौख्यंभवतःकृपातः ॥ ३३ ॥ ॥ राम ॥ २२५

राम

परीत्यलोकान्कर्मोचितान्ब्राह्मणोनिर्वेदमायात्नास्त्यकृतःकृतेनतथायदासर्वेवव्रजसुचंतेकामायेस्यहृदिस्थिताः॥ अथ
मर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतेइत्याद्यावैराग्यपरंसंविदधतीत्याह॥ स्वजनसुतेति॥ आत्मादेहोधामगृ[illegible]ःप्राणाः स्वजना
दिभिः किंसर्वरसेसर्वरसाःसुखानिविद्यंतेयस्मिन्तस्मिन्त्वयिपरमानंदे॥ एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीति
श्रो श्रुतेः॥ श्रुतयः त्वंसेवमानस्यपुंसः त्वयिआत्मनिसतिनृणांतुच्छैः एतैः किंकउपयोगः इति॥ सत्यसत्ये[illegible]रमार्थं सुखमजानतां

स्वजनसुतात्मदारधनधाममधरासुरथैः त्वयिसतिकिंनृणांश्रयतआत्मनिसर्वरसे॥ इतिसदजानतांमिथुन
तोरतयेचरतोसुखयतिकोन्विहस्वविहतेस्वनिरस्तभगः॥ ३२॥ ॥ ॥ ॥ ॥ ॥ ॥

अतएवमिथुनतः स्त्रियामिथुनीभूयपरस्परंरमंतेमायासुखायानुचरतांप्रवर्तमानानांकर्मणिषष्ठ्योअजानतः चरतः पुरुषान्कोनुअ
र्थः॥ सुखयतिआनंदयतिनकोपीत्यर्थः॥ इहसंसारिकथंभूतेस्वविहतेस्वतएवनश्वरेस्वनिरस्तभगोस्वतएवगतभगासारे॥ पाठांतरे॥
कोन्वित्यस्यैतद्धिशोषणाद्वयंअतस्त्वज्जनमेवोचितमित्यर्थः॥ भजतोहिभवा[illegible]स्त्वात्परमानंदचिद्घनः॥ आत्मैवकिंमतः स्वे
त्यंसुखदारसुतादिभिः॥ ३४॥ ॥ ॥ राम श्रीहरम ॥ प्रज्ञाम्यः श्रेयसे रामयनमः ॥ श्री राम ॥

श्री
भाग०
द०उ०
२२६

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन च सर्वतो निर्विद्य तदेव महत्संगेनोपपत्तिभिः ॥ सम्यगवधारयितुं तीर्थसदना
नि मुनयः पर्यटंतीति ॥ मुनय इति मतत्वमित्यादिश्लोकस्यार्थमाह ॥ भुवि पुरुपुण्यतीर्थसदनानीति ॥ ते उक्तलक्षणा ऋषयो विम
दा निरहंकारा यतो भवत्पदांबुजहृदः ॥ भवतः पदांबुजं हृदि येषां ते अतः ॥ स्वयमेव अघभिदंघ्रिजलं येषां ते ॥ उतापि तथाविधा अ
पि ॥ पुरूणि बहूनि तीर्थानि सदनानि देवागाराणि तान्येवोपासते सेवंते पायस्तत्रैव महत्संगो भवति ॥ अथवा ॥ पुरु अधिकं भगवद्भ
जनलक्षणं पुण्यं येषां तानि च पुरवो वा महांत इत्यर्थः ॥ तेषां सदनानि आश्रमान् ॥ यथाहामरसिंहः ॥ निपानागमयोस्तीर्थमृषि

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः ॥ दधति सकृन्मनस्त्वयि य आ
त्मनि नित्यसुखेन पुनरुपासते पुरुषसारहरावसथान् ॥ ३५ ॥ ॥ राम श्री श्री श्री राम राम

जुष्टे जले इराविति ॥ न पुनः पुरुषसारहरावसथानुपासते ॥ पुरुषाणां सारं विवेकधैर्यस्थैर्यक्षमाशांत्यादिकं सर्वं हरंतीति ॥ तथा
ते च ते आवसथाः गृहाः तान् न चैतेषां गृहादिभवत्सक्तिस्तत्स्वभावापेक्षेत्याह ॥ दधति सकृन्मन त्वयि य आत्मनि नित्यसुखे इति
सकृदपि त्वयि ये मनो दधति तेऽपि गृहाद्यासक्ता न भवंति ॥ किं पुनरेवंभूता इत्यर्थः ॥ सुचन्न गतदंगसंगमानिशं त्वामेव संचिंतयन्स
तः संति यतो यतो गतमदास्तेनाश्रमानावहन् ॥ नित्यं तव पदपंकजाङ्घ्रिगलितलसत्पुण्यगाथामृतस्रोतःसु संप्लवसंप्लुतो नरह
देनस्यामहे देहस्थत ॥ ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

राम
२२६

न्वाधायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तन्नूतार्थानां क्रियार्थेन समन्वय इति ॥ तत्र तत्रेन्द्रैर्मिमिनावेदस्य क्रियापरत्वाभिधानाड
पनिषदामपि तदेव युक्तं ॥ तदुक्तं तत्र वार्तिककृता ॥ एतेन कर्त्रर्थकर्तृत्वप्रतिपादनेनोपनिषदां नैराकांक्ष्यमाख्यातमिति ॥ न एकमेवा
द्वितीयं ब्रह्मेति विज्ञानमानन्दं ब्रह्म तत्त्वमसीति ॥ एवं तद्विपरीतात्मप्रतिपादनात् न ह्यद्वितीयपरमानन्दरूपस्य कर्मांगत्वमुपपद्यते अत
एव मतं चैतद्वार्तिककृता तः कथं सर्वं चैवाद्विविज्ञानं संस्कारत्वेन गम्यते ॥ परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति तेनैवोक्तत्वात् ॥ एत
दर्थमेव मननाय स्त्रनयः पर्यदंतीत्युक्तं ॥ तत्र तावत् द्वैतस्य सत्यत्वे भवेदप्येवं तदेव तु न संभवतीति प्रश्नोत्तराभ्यां मननेन तत्त्वावधार
णप्रकारमाह सत इदमुत्थितं सदिति ॥ इदं विश्वं धर्मि सदिति साध्यो धर्मः ॥ सत उत्पन्नत्वादिति हेतुः यद्यतः उत्पन्नं तत्तदात्मकमेव दृष्टं य

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभययुक् ॥ २ ॥

था कनककार्यमुत्पन्नं कुंडलादि तदात्मकं तद्वदिति ॥ तत्र यदि तदभेदः साध्यते तदोपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरित्याह
ननु तर्कहतमिति ॥ न तन्नाभेदं साधयामः किंतु तदुत्पन्नत्वेन कुंडलादिवत्सद्रूपतीति साधयामः ॥ तत्राभेद एव स्यादिति चेदित्याशंक्यानैका
न्तिकत्वेन दूषयति व्यभिचरतीति क्व चेति ॥ पितृपुत्रादिषु मृद्घटपटध्वंसादिषु तथादर्शनादिति भावः ॥ ननु तदुत्पन्नत्वेनासत उपादान
त्वं न तु तन्निमित्तत्व अतो नानैकांतिकत्वमित्याशंक्य दूषयति ॥ क्व च रज्जुपेति गुणोपादानस्यापि फणिनो [illegible] त्व किं मिथ्यात्वमन्य
था कुंडलादिवद्बाधप्रसंगात् ॥ अतः पुनरप्यनैकान्तिकत्वमेवेति भावः ॥ ननु तत्र केवलगुणमात्रफणिन उपादानं किंत्वविद्यायुक्त
तथाभूतस्यावस्तुत्वात् युक्तं फणिनो मिथ्यात्वमित्याशंक्य न तत्तुल्यमत्रापीति दूषयति न तथोभययुगिति ॥ अयमर्थः अत्राप्यविद्यायु
क्तस्यैव सत उपादानत्वं एवंभूतस्य च न वस्तुसत्यत्वमतः सदुपादानत्वमसिद्धमिति न वस्तु सत्त्वप्रपंचस्येति न तु ॥ २ ॥ राम ॥

मास्तुदेवेनहेतुनाप्रपंचस्यसत्त्वंतर्केणतुसाधयामः॥तथाहिसदिदंअर्थक्रियाकारित्वात्नयदेवंनतदेवंयथाशुक्तिरजतमितितत्राह
व्यवहृतयेविकल्पइषितइति॥व्यवहारायार्थक्रियार्थोविकल्पोभ्रमः॥इषितइष्टएवकूटकार्षापणादिनापिक्वचिद्व्यवहारदर्श
नात्॥नन्वेकत्रसतोन्यत्रारोपोभ्रमःप्रसिद्धःअत्यंतासत्त्वेकथंप्रपंचभ्रमःस्यात्नसत्त्ववादिनांहेतुसिद्धिरुक्तैवमोहेः॥अध्यस्यतेव
सुष्वात्वमसत्कथमवस्तुइति॥प्रज्ञातगुणानामकमध्यारोप्येतवानवेतिनेत्याहअंधपरंपरयेति॥अंधपर[illegible]विकल्पइत्यत्र
योयंभावः॥संस्कारजन्योभ्रमःसंस्कारश्चपूर्वंपूर्वंप्रतीतिमात्रमपेक्षतेनतुवस्तुसत्त्वंप्रतीतौसत्यायावस्तुसत्यत्वाभावेनभ्रमव्य
तिरेकादर्शनात्अतोनादित्वान्नैवभ्रमप्रवाहस्यान्तरोनेतरआरोपोभविष्यतिअंधपरंपरान्यायेनव्यवहारःसंभवतीत्यप्रयोजकोहेतु

व्यवहृतयेविकल्पइषितोंधपरंपरयाभ्रमयतिभारतीतउरुवृत्तिभिरुक्थजडान्॥३६

रिति॥नन्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति॥अपामसोमममृताअभूमेत्यादिभिःकर्मफलस्यनित्यत्वप्रतिपादनात्सत्त्वं
नचयते॥नहिनित्यंवस्तुअसच्चतितस्माद्वेदप्रतिपादितत्वाद्वैतंसदेवेत्याशंक्याहभ्रमयतीति हेभगवंस्तेतवभारतीवेदलक्षणाउ
रुवृत्तिभिःबह्वीभिर्गौणलक्षणादिवृत्तिभिःउक्थजडान्कर्मश्रद्धाभराक्रांतमंदमतीन्भ्रमयतिमोहयत्ययंभावः॥नहिवेदःकर्मफल
स्यनित्यत्वमभिधत्तेकिंतुलक्षणयाप्राशंस्यमात्रंविध्येकवाक्यत्वात्अन्यथावाक्यभेदप्रसंगात्तद्यथेहकर्मजितोलोकःक्षीयतएव
मेवामुत्रपुण्यजितोलोकःक्षीयतइतिन्यायोपबृंहितश्रुत्यंतरविरोधाच्चातःकर्मजडानामिदंभ्रममात्रमिति॥एतेनैवतस्मादात्मनआ
काशःसंभूतइत्यादीनामन्यपरत्वंदर्शितंभवति॥उत्पत्तंभवतःसतोपिभुवनंसन्नैवसर्पःस्रजःकुर्वत्कार्यमपीहकूटकनकंवेदोपिनैवंप
रः॥ अद्वैतंतवसत्परंतुपरमानंदंपदंतन्मुदावंदेसुंदरमिंदिरानुतहरेमामुंचमामानतं॥३६॥ राम॥ श्री॥ ॥

तदेवं च पंच समस्तत्वे साधकं नास्तीत्युक्तं ॥ इदानीमस्तत्वेऽस्य सृष्टिप्रलययुक्तं श्रुतयो यतो वा इमानि भूतानि जायंत इत्याद्याः तन्मूलं चात्तमा
नं षक्षमाणमित्याह नयदिदमिति ॥ यद्यस्मात् ॥ इदं विश्वं सृष्टेः पूर्वं नश्च आसत् आसीत् ॥ सदेव सोम्येदमग्र आसीत् ॥ आत्मा वा इदमेक ए
वाग्र आसीदित्यादिश्रुतेः ॥ स च निधनात् प्रलयात् अनु अनंतरं भविष्यत् भविष्यति ॥ नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेः ॥ अतः
कारणात् अंतरा मध्येऽपि ॥ एकरसे केवले त्वयि सृष्टिप्रलयाभ्यां मिथ्यारूपमेव विभातीति निमित्तं निश्चितं ॥ यत एवं अतः श्रुत्या द्रविणजातिविकल्प
पथैर्द्रविणजातीनां द्रव्यमात्राणां स्थूलोहंकारीयसद्रूपभाणां विकल्पा भेदा घटकुंडलादयः ॥ तेषां पंथानो मार्गाः प्रकाराः तैस्समी

नयदिदमग्र आसन भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे
अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ॥ २८

यते सदृशरूपतया निरूप्यते ॥ यथा तत्र कार्यकारणानां नामधेयमात्रता ॥ कारणं मृदाद्येव तु सत्यं ॥ तथात्राप्याकाशादीनां नाममात्र के
ता ब्रह्मैव तु सत्यं ॥ तथा च श्रुतिः ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं ॥ यथा सोम्यैकेन मृत्पिंडेन विज्ञातेन सर्वं विज्ञातं स्या
त् ॥ यथा एकेन लोहमणिना विज्ञा ॥ तेन सर्वं लोहमयं विज्ञातं स्यात् ॥ तथैकेन विनिश्चितेनेन विज्ञातेन सर्वं [illegible]मित्यादि ॥ न
स्मा दस्य सत्त्वे प्रमाणाभावात् सत्त्वे प्रमाणस्याविद्यमानत्वात् ॥ वितथमनोविलासमृतं सत्यमिति ॥ ये अवयंति जानंति ते अबुधाः अज्ञा ज्ञा
इत्यर्थः ॥ अत्रेवं प्रयोगः ॥ विवादाध्यासितं न सत् ॥ आद्यंतयोरविद्यमानत्वात् विकारित्वात् ॥ दृश्यत्वाद्वा शुक्तिरजतादिवत् आत्मवच्चे
ति ॥ मुकुटकुंडलकंकणकिंकिणीपरिणतं कनकं परमार्थतः ॥ महदहंकृतिखप्रमुखं तथा नरहरेर्न परं परमार्थतः ॥ ३९ ॥ ॥

न नततःपृथक्

ननु च यदि त्वं पंचोनामनास्येवनचाक्षतातेन चैतन्यस्य संबंधो गोघोपि तर्हि किमपराद्धं जीवेन यतः अयं संसरति किंवा बहुगुणमीश्व
रस्य यतो नित्यमुक्तः ॥ किं विषये वा तदा कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषं ॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ अजामेकां लोहितशुक्लकृष्णामित्यादिमंत्रा यद्वदंती तदाह ॥ स यदजयेति सत्वं जी
वः यद्यस्मात् अजया मायया अजां अविद्यां अनुशयीत आलिंगति ॥ ततः गुणांश्च देहेंद्रियादीन् सेवमानः आत्मतया अस्मृत्वा ॥ तदनु त
दनंतरं सरूपतां तद्धर्मयोगं च जुषन् अपेतभगः ॥ विहितानंदादिगुणः सन् मृत्युं संसारं भजतीति प्राप्नोति ॥ तद्विषयमेव च कर्मकांडमि
ति भावः ॥ त्वं तु पुनः जहासि तां मायां नतु सा मत्स्येवजि ॥ कथं तत्याग तत्राह अहिरिव त्वचमिति ॥ अयं भावः यथा भुजंगः स्वग

स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः
त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेष्टगुणितेपरिमेयभगः ॥३८॥

त्वमपि कंचुकं तृणवज्ज्ञानान्नाभिमन्यते ॥ तथा त्वमजां न हि हिनस्ति तदाह्लादिसंचितकामधेनुहृदयपते तज्जयाश्रितत्यमिति ॥ तामुपेक्ष्य इति
उत एतत्तदाह आत्तभगः नित्यप्राप्तैश्वर्यः महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिभिः महीयसे पूज्यसे विराजसे ॥ कथंभूतः
अपरिमेयभगः ~~आत्तभगः नित्यप्राप्तैश्वर्यः महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टौ~~ अपरिमितैश्वर्यः नह्यस्य अणिमादिवद्देशकाला
दिपरिच्छिन्नत्वात् अष्टगुणितमैश्वर्यं अपितु परिपूर्णस्वरूपानुबंधित्वादपरिमितमित्यर्थः ॥ दुहंती तव वीक्षणं गगनगता कालस्वभावादि
भिः भावान् सत्वरजस्तमोगुणमयान् उन्मीलयंती बहुधा ॥ मामाक्रम्य पदा शिरस्यतितरां संमर्दयंत्यातुरं माया ते शरणंगतोस्मि हरे

एवं तावद्दुःसाधनकं देवेन ये भगवंतं भजंति ते दुस्तरं तरंति ॥ इतरे संसरंतीत्युक्तं ॥ इदानीं ये वहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि कथं
चिदंतर्वासनाशिनः कामा न मुंचंति तेन भगवंतं प्राप्नुवंति ॥ न चेह सुखं लभंते ॥ केवलं उभयोनीरिव प्राप्नुवंतीति ताननुशोचन् ॥ यः कामान्नुका
मयते मन्यमानः स कर्मभिर्जायते ॥ तत्र तत्रेत्यादिश्रुत्यर्थमाह ॥ यदि न समुद्धरंतीति हे भगवन् ये यतयः हृदि स्थिता कामजटाः ॥ मूलानि
वासनाः यदि न समुद्धरंति नोत्पाटयंति तेषामसतां भवान् हृदि गतोपि दुरधिगमः दुःप्रापः कथमस्मृतकंठमणिर्विस्मृतकंठगतमणिस्त
तुल्यः स यथा कंठे वर्तमानोपि अस्मृतत्वेदप्राप्तवद्भवति तद्वत्तेन केवलमेतावत् किंतु असुतृपयोगिनामिंद्रियतर्पणपराणां योग

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोसतां हृदि गतोस्मृतकंठमणिः ॥ ३९
असुतृपयोगिनामुभयतोप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥

क्षणानामुभयतोप्यसुखं इहामुत्र च दुःखमेव तदाह अनपगतांतकात् ॥ अनिवृत्तान्मृत्योः लोकाराधनधान्यार्जनादिक्लेशाद्भोगवैभ
वप्राकट्यभयाभयाच्चेह तावद्दुःखं भवत ईश्वराद्धपि दुःखं कथंभूतात् अनधिरूढपदात् ॥ अनधिरूढं पदं यस्य तस्मात् ॥ त्वत्स्वरू
पप्राप्त्यभावादविद्यावद्विषयत्वेन प्रपन्ननिजधर्मातिक्रमनिबंधनात्त्वहं दुष्टपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः ॥ दंभन्यासमिषेण
वंचितजनं भोगैकचिंतातुरं संमुह्यंतमहर्निशं विरचितोद्योगक्लमैराकुलं ॥ आज्ञालंघिनमज्ञजनतासंमाननासंमदं दीनानाथ
दयानिधान परमानंद प्रभो पाहि मां ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मर्त

श्री॰
भाग॰
द॰
११९

नन्वु यतेर्नैष्कर्म्यमपि कृत्यस्ति प्रारब्धमेव तत्त्वोपभोगेनाक्षिप्यते ॥ अतः किमिति दृष्ट्याशङ्क्यते ॥ उभयतोऽप्यस्त्वेवमित्यत्र श्रूयते च एष नित्यो
महिमा ब्राह्मणस्य न कर्मणा वर्धते ॥ नो कनीयानित्यादि तत्राह त्वदवगमीति ॥ हे सगुण एष इयसौ स्वयं यस्त्वदवगमी त्वत्तत्त्वज्ञानवा
न् ॥ भवदुत्थशुभाशुभयोः भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोराविर्भूतयोः ॥ प्राचीनपुण्यापुण्यकर्मणोः फलभूतान् गुण
विगुणान्वयान् सुखदुःखसंबंधान्न वेत्ति नानुसंधत्ते ॥ तर्हि तदानीं च ते देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरीर्गिरः विधिनिषेध
लक्षणा न वेत्ति ॥ विगतदेहाभिमानतया कार्यबोधाभावान्न नियुज्यत इत्यर्थः ॥ युक्तं च एतद्यतः कारणात् मनुजैः अन्वहं श्रवण

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः
अनुयुगमन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥४०॥

भृतः अनुदिनं श्रवणेन चेतसि भृतः त्वं तेषामपवर्गगतिः अपवर्गरूपा गतिर्भवसि ॥ कथं श्रवणभृतः ॥ अनुयुगं प्रतियुगं या गीतपरंप
रा उपदेशसंततिः ॥ तया तत्संप्रदायानुसारेणेत्यर्थः ॥ एतदुक्तं भवति ये तावत्तत्त्वज्ञानिनः ॥ न तेषां कर्माधिकारशङ्कापि ॥ ये चानवरं
तं त्वत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्वात् ॥ पदानां न विधिनिषेधबाधः ॥ इतरेषां तु योगक्षेमेनेन्द्रियलौल्यात्त्वन लालसनाशुभ
यतोऽप्यस्त्वेवमिति ॥ अत एवमुक्तं नवमे दिश माधव स्फुरति यत्र रमारमसंगमः ॥ श्रवणवर्णनभावमथापि वा न हि भवामि यथा विधि
किंकरः ॥४०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥

त्वद्वर्गामैनवेत्तिम्हाखडुःखेनविधिनिषेधावित्युक्तंतत्रैतेनुकथमवगंतुंशक्यंदूरवगमत्वस्योक्तत्वादित्येवमाशंक्यसत्यमेवमनगा
ह्यमहिम्नोवाङ्मनसागोचरत्वादविषयत्वेनैवज्ञानमितिदर्शयन् ॥ यद्दूर्ध्वंस्वर्गादिर्वायदर्वाक्पृथिव्यांयदंतराद्यावापृथिवीइ
मेयद्भूतंभवच्चभविष्यच्चेत्यादिश्रुतिप्रतिपादितमपरिमितमहिमानमाहद्युपतयएवेति ॥ हेभगवन्तैः तेद्युपतयः स्वर्गादिलोकस्य
पतयोब्रह्मादयोपिनययुः नप्रापुः तत्कुतः इदंतवईदृगेतत्किमपितनभवसि ॥ आस्तांद्युपतयोनययुरितियद्यस्मात्त्वमपिश्रा
त्मनोंतंनयासित्ततस्तर्हिसर्वज्ञतासर्वेशक्तितावाः तत्राहानंततयाअंताभावेननहिशशविषाणज्ञानेसर्वज्ञत्वंतदप्राप्तिर्वाश
क्तिवैभवंहंति ॥ अनंतत्वमेवाहयदंतरेति ॥ यस्यतवांतरामध्येनन्वहोसावरणाः उत्तरोत्तरंदशगुणसप्तावरणयुक्ताः अंडनिचयाः

द्युपतयएवतेनययुरंतमनंततयात्वमपियदंतरांडनिचयाननुसावरणाः ॥ खइवरजांसिवांतिवयसासहयच्छ्रुतयः
त्वयिहिफलंत्यतन्निरसनेनभवन्निधनाः ॥४१॥

अस्मांडसहस्राः वांतिपरिभ्रमंतिवयसाकालचक्रेणखेरजांसीवसहैकदेवनतुपर्यायेणहि यस्मादेवमतः श्रुतयः त्वयिफलंतितात्प
र्येणपर्यवस्यंतिनतुसाक्षाद्वदंति अयमेतावानितिसत्त्वएणस्पतुणानंत्यात् निर्गुणस्यवाचागोचरत्वात् कथंतर्ह्येपदार्थतात्पर्यमिति
तत्रविधिरूपवाक्येभवेदयंनियमः पदार्थस्यैववाक्यार्थत्वमिति ॥ निषेधरूपेतुनायंनियमइत्याहतन्निरसनेनेति ॥ अन्यदेवतद्विदि
तादथोअविदितादधि ॥ अन्यत्रधर्मादन्यत्रास्मात्कृताकृतादस्थूलमनणुमित्यादिप्रकारेणलक्षणयाचतत्त्वमसीत्यादयः ॥ पर्यवसं
तिनचवाच्यंनिषेधैः शून्यमेवज्ञाप्यतइतियतोभवन्निधनाः भवतित्वयिनिधनंसमाप्तिर्यासांताः तथाचनहिनिरवधिर्निषेधः संभव
त्यतोवधिभूतेत्वयिफलंतीत्यर्थः ॥ द्युपतयोविदुरंतमनंततेनचभवन्निधिरः ॥ श्रुतिमौलयः ॥ त्वयिफलंतिनिश्चितोममइत्येतो
जयजयेतिभजेनवमात्पदं ॥४१॥ ॥राम॥

श्री
भाग॰
द॰ ३॰
९२॰

९

इति शेषसमाम्नायपुराणोपनिषद्रस इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥४२॥ ब्रह्मदायादेति ॥ ब्रह्मैव दायमिव श्रद्धया प्राप्यं
श्रुतिसेवत इति ॥ तथा ब्रह्मपुत्रेति वा पूर्णः श्रुतहृत्पाङ्क्ष श्रुतधराः श्रुतमर्थं मनसि धारयन् ॥४३॥ वीरव्रतो नैष्ठिकः ॥४४॥ नमस्त इति कृष्णाय

श्री

श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिं ॥४१॥ इत्य
शेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥४२॥ त्वं चैतद्ब्रह्मदायाद श्रद्ध
यात्मानुशासनं ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणां ॥४३॥ श्रीशुक उवाच ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्र
द्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥४४॥ श्री ॥ र ॥ उ ॥ च ॥ नमस्तस्मै भगवते कृष्णायामलकी
र्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥४५॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादा
श्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥४६॥ सभाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमु
खाच्छ्रुतं ॥४७॥ इत्येतद्वर्णितं राजन् यन्नः प्रश्नः कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेत् ॥४८॥ ॥ ॥

नारतया नारायणं नमस्यति ॥ उक्तं च अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति ॥ साक्षात्पितुरिति योनिसंबंधानं विना जनकस्य
अग्निमथनावसरे कथंचिदरणौ भेतः पतितमग्नं घृताभ्यासेः तदैव तत उत्पन्नः ॥ शुक इति हि वदंति ॥४८॥ ॥ राम श्री श्री ॥

राम
९२॰

स

समस्तवेदशास्त्रार्थसंग्रहद्वारानुस्मारयति योस्योत्प्रेक्षक इति ॥ यः अस्य विश्वस्य उत्प्रेक्षकः एवमिदमनुशासितानां समस्तश्रुत्यर्थसंक्षि

प्तेयं सृष्टिस्थितिप्रलयान्यापणीयमित्यालोचकः इत्यर्थः ॥ अनेन निमित्तत्वमुक्तं ॥ एवमालोच्यास्यादिमध्यनिधने आदिजन्मनि

मध्ये पालने निधने अन्तः ॥ एतेषु कर्मसु योऽनुवर्तते अनेनोपादानत्वमुक्तं ॥ ननु प्रकृतिपुरुषयोरुपादाननिमित्ते प्रसिद्धे सत्यं तयोरपित

त्त्वं ... एवं ... तद्धेतुत्वात् मूलकारणं स एवेत्याह योऽव्यक्तजीवेश्वर इति ॥ प्रवेशनियमने दर्शयति पूर्वोक्तप्रकारेणेदं सृष्ट्वा ... तेन

तदेवोद्भूतत्वान्मूलकारणं स एवेत्याह यो अव्यक्तजीवेश्वर इति ॥ प्रवेशनियमने दर्शयति पूर्वोक्तप्रकारेणेदं ... तदा ... पुरः शास्ति तस्य

ऋषिणा सहैककार्ये अहमिति दर्शनात् दृष्टिः जीवः तेन सह अनुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे ताः ॥ पुरः शास्ति तस्य

भोगाद् दत्त्वा परिपालयति ॥ उपासकस्य च वैकैवल्यरूपो भवतीत्याह यं संपद्येति ॥ यं संपद्य प्राप्य अनुशयी अन्वनुदंडवत्प्राणैर्

दृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ॥ यं संपद्य

योस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः ॥ सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ॥ यं संपद्य ... ध्यायेदजस्रं हरिं ॥ ५० ॥ इति श्रीभागवते दशमस्कं

जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ॥ ५० ॥ इति श्रीभागवते दशमस्कं

धे नारदनारायणसंवादे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

प्राणैरुपालेशेत इति ॥ तथा स जीवः अजां कार्यकारणात्मिकां मायां ... ब्रह्मसंपन्नस्यापि जीवतस्तत्संबन्धो दृश्यते अत

अत आह ... कुलायं यथेति अयं भावः ॥ यथा सुप्तः शरीरं वर्तमानमपि पश्यति एवं जीवन्मुक्तोऽपि अन्ये देहं वर्तमानं पश्यन्ति स तु न किंचित् पश्यती

त्यर्थः ॥ ... कैवल्येन निरस्ता योनिः कैवल्ये

तं तं हरिमजस्रमनवरतं ध्यायेत् किमिति तत्राह अभयं येन भयं यस्मात् भयं निवर्तते किमित्यर्थः ॥ कुत एतत् कैवल्यनिरस्तयोनिं केवल्ये

नात्मस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन तं ॥ सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजं भोगयोगा

प्रदं वंदे माधवं कर्मिनम्रयोः ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे भावार्थदीपिकायां सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ राम ॥ ॥

स तु नात्मानं तथा पश्यति ॥ १४

पद्य पश्यति

नारायण

श्री
भाग०
द० उ०
१२१

अस्याशीतितमे विष्णुभक्तः कैवल्यमश्नुते ॥ ततोर्वाग्देवभक्तास्तु विभूतिमितिवर्ण्यते ॥ हरिर्भजतां भक्तिदस्तत्क्रमभयं ध्यायेद्भजस्व
हरिमिति तत्र शंकते देवासुरेति अशिवं अवधीरितभोगं भोजा भोगिनः लक्ष्म्याः पतिं सर्वभोगायुक्तं ॥ अन्योपमर्देन तामसत्वेन वि
धमात्रिलिंगः त्रिलिंगत्वमाह वैकारिक इति अहंकारः ॥ विकारा मनइंद्रियभूतरूपाः षोडशेति इंद्रियदेवानामभेदविवक्षया ॥ किंच
नेति किंचिद्विकारोपाधिकं भजन् उपाधेस्तु रूपाणां विभूतीनां स्वरूपं प्राप्नोति उपद्रष्टा साक्षी सेतु यतः सर्वदृक सर्वं पश्यति अतः प्रकृ
तेः परः ॥ अत्रेदं तत्त्वं ब्रह्मणो गुणसंबंधे रूपत्रयमिदं प्रतीतं तत्र धर्मयोगयोर्गाभ्यां बिंबवत्त्वाति बिंबवद्गुणाः सत्वादयः आतचोषूरुः स्व

राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ॥ प्रायस्ते धनिनो भोजाः न तु लक्ष्म्याः पतिं हरिं ॥ १ ॥ एतद्वेदितुमिच्छा
मः संदेहोत्र महान्हि नः ॥ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो
गुणसंवृतः वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३ ॥ ततो विकारा अभवन्षोडशामीषु किंचन ॥ उपधावन्विभूती
नां सर्वासामश्नुते गतिं ॥ ४ ॥ हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥ ॥

भावतः ॥ ब्रह्मविष्णुशिवानां च गुणाद्यं तत्स्वरूपिणां नातिभेदो भवेत् भेदो गुणधर्मैरिहांशतः सत्वस्यांशांत्या नोजात्तु विष्णोर्विद्वेपस्त
ढेतेरजस्तमो गुणाभ्यां तु भवेतां ब्रह्मरुद्रयोः गुणोपमर्दनो भूयः तदंशानां च भिन्नता अतः समय सत्वस्य विष्णोर्मोक्षकरी मतिः
अंशतो भूतिहेतुश्च तथानंदमयी स्वतः अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनां विभूतयो भवंत्येव शानैर्मोक्षोप्यनंशतः ॥ इदमेवाभिप्रे
त्य तत्र तत्रोच्यते श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः तथा सत्वं यस्य प्रिया मूर्तिरिति तथा सत्वं न तीर्थसाधनमिति तथा त्रयाणामे
कभावानां यो न पश्यति वै भिदामिति ॥ तथानंतमध्ये भूते जीवभिदाम एवापि च यत्तत इत्यादि एवं च सति न किंचिदसमंजसं तत्रक्तानां तु

कत्वेनोक्तिमात्रमिति ५

राम
१२१

८।९। यस्याहमनुगृह्णामीत्ययमर्थः योविषयात्परिजिहीर्षुरपिकथंचिद्विद्यमानेषु सज्जते क्लिश्यति च तस्य विषयापहार एवानुग्रह इति ॥ तथा
कृतत्वेश्रवादीनामैश्वर्यविरोधात् ॥ अथावाप्यधर्मविभूतीः कामनानुष्टपाः दत्त्वाशनैर्विषयभोगावसाने तस्य निर्वेदस्तस्माद्धरिध्या
भिपरिमाणुग्रहकारोमिति ॥ तदुक्तं भागवते च ॥ न मय्यावेशितधियां कामः कामाय कल्पते इति ॥ दुःखदुःखितमिति ॥ दुःखाद्दुःखिनः दुः

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः ॥ शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतं ॥६॥ स आह भगवांस्तस्मै प्री
तः शुश्रूषवे प्रभुः ॥ नृणां निःश्रेयसार्थाय योवतीर्णो यदोः कुले ॥७॥ श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामि हरि
ष्ये तद्धनं शनैः ॥ ततोधनं त्यजंत्यस्य स्वजना दुःखदुःखितम् ॥८॥ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया ॥ मत्प
रैः कृतमैत्रस्य करिष्ये मदनुग्रहम् ॥९॥ तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनंतकं ॥ अतो मां सुदुराराध्यं हित्वान्यान्भजते
जनः ॥१०॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः ॥ मत्ताः प्रमत्ता वरदान्विस्मयंत्यवजानते ॥११॥ ऋषिरुवाच
शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ॥ सद्यः शापप्रसादोंग शिवो ब्रह्मा न चाच्युतः ॥१२॥ अत्रैवोदाहरंती
ममितिहासं पुरातनं ॥ वृकासुराय गिरिशो वरं दत्त्वाप संकटम् ॥ १३ ॥ ॥ राम श्री श्री ॥ ॥

खितमिव प्रतीयमानमित्यर्थः ॥ ८ ॥ स पुनर्बंधूनामाग्रहेण धनेहया प्रवृत्तोपि मदनुग्रहेण यदा फलोद्योगो निर्विण्णः स्यात्तदा मदनुग्रहमि
ति ॥ ममासाधारणमनुग्रहं ॥ ९ ॥ अतः पश्चादपि मोक्षमरोचयन्नन्यासक्तो जन इत्यर्थः ॥ १० । ११ ॥ एतदेवेतिहासेन स्पष्टयितुमा
ह शापप्रसादयोरिति ब्रह्मा चेत्यन्वयः ॥ १२ । १३ ॥ ॥ ॥ ॥ ॥ श्री ॥ श्री श्री ॥ राम ॥

श्री
भाग॰
द॰
१२२

शकुनेः पुत्रः १७।१५ रुद्रसंकटमापन्नोत्यासोन्यास्त्वं ईश्वरपालनंच ॥ २६ ॥ स्वगात्रत उपाधावत् क्षमात्मक्रमेण स्वमांसेन जुह्वानइ
ति ॥ २७ ॥ अग्निरुत्थितो ज्वलत इत्यूचतः ॥ २८ ॥ मूर्तिमानग्निरिव देदीप्यमानः वयमधुनातनाः यथा कथंचिद्दुःखिनहतं कामं वारयामः तद्वदि

वृको नामासुरः पुत्रः शकुनेः पथि नारदं ॥ दृष्ट्वाशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः ॥ १४ ॥ स आह देवं गिरिशमु
पधावाशु सिद्ध्यति ॥ सोल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्यबाणयोस्तुष्टः स्तुवतोर्वन्दि
नोरिव ॥ ऐश्वर्यमतुलं दत्त्वा तत आप सुसंकटं १६ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः ॥ केदार आत्मक्रव्ये
ण जुह्वानोग्निमुखं हरिं ॥ १७ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेहनि ॥ शिरोवृश्चत्स्वधितिना तत्तीर्थक्लिन्नमूर्ध
जं ॥ १८ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोनलात् ॥ निगृह्य दोर्भ्यां भुजयोर्न्यवारयत्तत्स्प
र्शनाद्भूय उपस्कृताकृतिः ॥ १९ ॥ तमाह चांगालमलं वृणीष्व मे यथाभिकामं वितरामि ते वरं ॥ प्रीयेय तोयेन नृणां प्र
पद्यतामहो त्वयात्मा भृशमर्द्यते वृथा ॥ २१ ॥ देवं स वव्रे पापीयान्वरं भूतभयावहं ॥ यस्य यस्य करं शीर्ष्णि धास्ये स म्रि
यतामिति ॥ २५ ॥ तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत ॥ ॐ इति प्रहसंस्तस्मै ददेहेरमृतं यथा ॥ २२ ॥ इत्युक्तः सोसु
रो नूनं गौरीहरणलालसः ॥ स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि किलासुरः ॥ २३ ॥ स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृ
ताच्छिवः ॥ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः ॥ यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् ॥ २४ ॥ राम ॥

ति ॥ स चोपस्कृताकृतिः परिपूर्णदेहो भवत् न्यवारयच्च ॥ २९ ॥ एवमाह च यतो येनापि भक्ततां प्रीतः स्यां सत्वया त्वद्देहो वृथा पीड्यत इ
ति ॥ २० । २१ ॥ दातुमनर्हमपि दत्तवान् सर्पाय क्षीरमिव ॥ २२ । २३ ॥ उपसृष्टोनुगतः उदगात् अन्वधावत् उदक् उत्तरतः ॥ २४ ॥ राम ॥

राम
१२२

वैकुंठं श्वेतद्वीपं ॥२६॥ तं तादृक्कात्स्न्यं तथा तादृक् व्यसनं यस्य तं वृजिनार्दनो दुःखहं तादृशत एव दृष्ट्वा मेखलादिभिरुपलक्षितः प्रत्युदियात् तं तु
खमागतः ॥२७॥२८॥२९॥ व्यक्तिं निश्चितं किं किमर्थं आत्मदेहः सर्वकामधुक् पुरुषार्थहेतुः अतो मा पीडयेति ॥३०॥ प्रायशः पुंभिर्धृतैर्भवादृशैः समीहते

अज्ञानतः प्रतिविधित्सुरीमास लोकेश्वराः ॥ ततो वैकुंठमगमद्भास्वरं तमसः परं ॥२६॥ यत्र नारायणः साक्षान्न्यासि
नां परमा गतिः ॥ शांतानां न्यस्तदंडानां यतो नावर्त्तते गतः ॥२७॥ तत्तथा व्यसनं दृष्ट्वा भगवान्वृजिनार्दनः ॥ दूरात्प्रत्यु
दियाद्भूत्वा बटुको योगमायया ॥२८॥ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन् ॥ अभिवादयामास तं कुशपाणिर्विनी
तवत् ॥२९॥ श्रीभगवानुवाच ॥ शकुनेय भवान्व्यक्तं श्रांतः किं दूरमागतः ॥ क्षणं विश्रम्यतां पुंस आत्मायं सर्वकामधुक्
३०॥ यदि नः श्रवणायालं युष्मद्व्यवसितं विभो ॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते ॥३१॥ शुक उवाच ॥ एवं भगवता
पृष्टो वचसामृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितं ॥३२॥ श्रीभगवानुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीम
हि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥३३॥ यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ ॥ तर्ह्यंगाशु स्वशिरसि हस्तं
न्यस्य प्रतीयतां ॥३४॥ यद्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ ॥ तदैनं जह्यसद्वाचं न यद्वक्तानृतं पुनः ॥३५॥ शुक उवाच ॥
इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः ॥ भिन्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ॥३६॥ ॥ राम श्री ॥ ॥

साधयितुमिच्छति ॥ अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयति अतो नः कथ्यतामिति ॥३१॥ पैशाच्यं पिशाचानामिव वृत्तिं ॥३३॥ यतस्त्व
या वदंतावदिष्यति ॥३३॥ चित्रैर्नानाकैः सुपेशलैरतिरम्यैर्भिन्नधीर्भ्रंशितमतिः ॥३४।३५।३६॥ ॥ श्रीरामायनमः ॥

कोतिसंचारैः २

श्री
भाग
द० टी
१२३

द्वितीयद्रवपर्वतः

३७।३८।३९। किमु कृतागस्कः विशेषेण त्वयि कृतागाः कृतापराध इति ॥४०॥ अव्याकृतशक्त्युदन्वतः वाङ्मनसागोचरशक्तिसमुद्रस्य गिरित्रमोक्षं शि
तमोचनरूपं चरित्रं संसृतिभिर्नानारूपचरित्रे ॥४१॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां मष्टाशीतितमोध्यायः ८८ ॥ नवाशीति

अथापतत्स्वशिरा वज्राहत इव तत्क्षणात् ॥ जयशब्दो नमःशब्दः साधुशब्दोभवद्दिवि ॥३६॥ मुमुचुः पुष्पवर्षाणि हते
पापे वृकासुरे ॥ देवर्षिपितृगंधर्वा मोचितः संकटाच्छिवः ॥३७॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महा
देव पापोयं स्वेन पाप्मना ॥३८॥ हतः कोनु महत्स्वीश जंतुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ॥
३९॥ य एवमव्याकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः ॥ गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभि
स्तथारिभिः ॥४०॥ इति श्रीभागवते महापुराणे दशमस्कंधे वृकमोक्षणं नामाष्टाशीतितमोध्यायः ॥८८॥ श्रीशुक उवाच ॥ सर
स्वत्यास्तटे राजन्नृषयः सत्रमासत ॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥१॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं
नृप ॥ तज्ज्ञप्त्यै प्रेषयामासुः सोभ्यगाद्ब्रह्मणः सभां ॥२॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्त्वपरीक्षया ॥ तस्मै चुक्रोध भग
वान्प्रज्वलन्स्वेन तेजसा ॥३॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः ॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणा
प्रभुः ॥४॥ ॥ ॥ राम ॥ ॥ राम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मै देवः को महानिति संशये ॥ परीक्षा विप्रोत्कर्षं मुनिभ्यो वर्णाय भृगुः ॥ इतिहासांतमाह सरस्वत्या इति ॥१।२।३॥ स्वयोन्या स्वस्यैव रूपांतरे
णाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः ॥ तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेणानिमित्तेन क्रोधं शमयामासेत्यर्थः ॥४॥ ॥ राम ॥

राम
१२३

११।१२। तीर्थीकारिणा तीर्थत्वनिमित्तेन ११।१३। तस्य मंदयामास भीरया विमानि हंत्तं तत्पत्नी वक्षुवेति शेषः ॥१७।१९। विस्मिता अपराधातिरेकेपि
निर्विकारत्वेन स्थयां संश्रद्धधर्महत्तममनिश्चितवंतः ॥२८॥ यतो यस्मिन्वैराग्यं चचार विधमिति पादे तत्त्वतद्विधमेवरूपमुख्यं विषयास्त्यक्त्वा

ततः कैलासमगमत्सदेवदेवो महेश्वरः ॥ पवित्रं समारेभे तस्या यथा तरं यथा ॥५॥ नैकत्वमसस्तुत्यष एइति वेदच्छकोपि ७
ह ॥ शूलत्सुद्यम्य तं हंतुमारेभे तितमलोचनः ॥६॥ पतित्वा पादयो देवी सा त्वया मा सतीगिरा
अथो जगाम वैकुंठे यत्र देवो जनार्दनः ॥ अयानं छिय उत्संगे पदा वक्षस्यताडयत् ॥८॥ ततउत्थाय भगवान्सहलक्ष्म्या
सतां गतिः ॥ स्वतत्पादवरुद्ध्य शुभनामशिरसा मुनिं ॥१०॥ आहते स्वागतं ब्रह्मन्निषीदात्रासनेसणं ॥ अजानतामागा
तात्वः क्षंतुमर्हेथनः प्रभो ॥११॥ पुनीहि सहलोकं मां लोकपालान्प्रमदूतान् ॥ पादोदकेन भगवत्तीर्थानां तीर्थ
कारिणा ॥१२॥ अत्यंतकोमलौ तात चरणौ ते महामुने ॥ वज्रकर्कशमदुरः स्पर्शेन परिपीडितौ ॥१३॥ इत्युक्त्वा विप्रचरणौ
मर्दयन्स्वेन पाणिना ॥ अद्यहं भगवाँल्लक्ष्म्या आसमेकांतभाजनं ॥ वसत्युरसि मे भूतिर्भवत्पादहतांहसः ॥१४॥ पुनः स्वस्त्वमासत्यमुनी
एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा ॥ निर्वृतस्तर्पित स्तूष्णीं भक्त्युत्कंठो स्रुलोचनः ॥१४॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ भूयां
नां ब्रह्मवादिनां ॥ स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥१५॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ ऐश्वर्यं चाष्टधा यस्माद्यशश्चा
सं श्रद्धयाविष्णुयतः शांतिर्यतो भयं ॥१६॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्विते ॥ " " " " " "
त्ममलापहं ॥१७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शक्तिर्वैतो भिन्नमानेकान्यागो नामाद्यं वैराग्यं ततो विषयाणां मध्ये लवणादिव्यतिरिकेणापि इहति द्वितीयं तथाद्यत्वावमिन्नसितागषैथि
ल्यनाबाह्येंद्रियैर्देवविषयेत्येव नाल्लीयं तत्राणौदासीन्यं चतुर्थं तथाङ्क ॥ वैराग्यमाद्ययतमानसंज्ञं ॥ क्वचिद्धि रागो व्यतिरेकसंज्ञः एकेंद्रिया
त्यं हृदि रागसोक्ष्मं तस्मा द्विभावस्तु वशीकृताख्यमिति ॥१७॥

१८।१९। यस्य भागवतरूपस्य पवित्रिविधा आकृतयस्तत्र तासु सत्त्वमेवतीर्थसाधनं पुरुषार्थहेतुः ॥२०॥ इत्थं निश्चित्य सरस्वती तीरनिवासि
नो विप्रा हरिसेवया भक्तिं प्रापुरिति ॥२१॥ व्यासनंदनस्य मुखपंकजादुद्गतं गंधयुक्तं पीयूषवत्तुल्यं हरेः नश्शान्तयशोयः संसारी स मुक्तो
भवतीति ॥२२॥ स चोक्तलक्षणो भगवान् केशव एवेति दर्शयितुं आख्यानांतरमाह एकदेति ॥२३॥ ब्रह्मद्विष इत्यादि स्वां गाथा वाक्यम

मुनीनां न्यस्तदंडानां शांतानां समचेतसां ॥ अकिंचनानां साधूनां यमाहुः परमां गतिं ॥१८॥ सत्त्वं यस्य प्रिया मूर्तिर्ब्रा
ह्मणास्त्विष्टदेवताः ॥ भजंत्यनाशिषः शांता यं वा निपुणबुद्धयः ॥१९॥ त्रिविधाः कृतयो यस्य राजसी तामसी तथा
सः ॥२०॥ तासां तु सत्त्वं सत्त्वमेव तीर्थसाधनं ॥ ... शुक उवाच॥ इत्थं सारस्वता विप्रा नृणां संशयमुत्तये ॥ पुरुष
स्य पदांभोजसेवया तद्गतिं गताः ॥२१॥ सूत उवाच॥ इत्येतन्मुनितनयास्यपद्मगंधपीयूषं भवभयभित्परस्य पुंसः
सुश्लोकं श्रवणपुटैः पिबत्यभीक्ष्णं पांथोध्वभ्रमणपरिश्रमं जहाति ॥२२॥ शुक उवाच॥ एकदा द्वारवत्यां तु विप्रपत्न्याः
कुमारकः ॥ जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥२३॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः ॥ इदं प्रोवाच
विलपन्नातुरो दीनमानसः ॥२४॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः ॥ क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोर्भ
कः ॥२५॥ हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियं ॥ प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः ॥२६॥ एवं द्वितीयं
ब्रह्मर्षिस्तृतीयं त्वेवमेव च ॥ विसृज्य स नृपद्वारि तां गाथां समगायत ॥२७॥ तामर्जुन उपश्रुत्य कर्हिचित्केशवां
तिके ॥ परेते नवमे बाले ब्राह्मणं समभाषत ॥२८॥ किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः ॥ राजन्यबंधुरेते वै ब्रा

यिनः कश्चिद्दोषः अतो मम दोषेणैव मम पुत्रा म्रियंते इति वारं वारं चुक्रोशेत्यर्थः ॥२७।२८॥ ब्रह्मन् किंस्विदिति किमर्थं वृथा रोदिषि यतः
त्वन्निवासे धनुर्धरो मात्रा राजन्यबंधुरपि नास्ति ब्राह्मणस्य तु का वार्ता यतस्ते सत्रयागे इव ब्राह्मणा मिलिता भवतो मर्हंतीत्यर्थः ॥२९॥

तेदेवाहुर्धनदारात्मजापृक्ताइति॥धनादिभिरपृक्तावियुक्ताः॥यत्रयेसुजीवन्तःशोचंतिजीवंतिकेवलंजीविकांसंदूषयति३१॥हतकल्मषउ
तिअग्निप्रवेशेनत्राणविलापश्रवणात्पातकाद्धतोभवेयमित्यर्थः॥यद्वाअहतकल्मषस्वेदितिवा॥३१।३२।नब्रह्मध्नइहेनसंभ्रतीमःब्र

धनदारात्मजापृक्तायत्रशोचंतिब्राह्मणाः॥तेवैराजन्यवेषेणनटाजीवंत्यसुंभराः३१॥अहंप्रजावांभगवन्रक्षिष्ये
दीनयोरिह॥अनिस्तीर्णप्रतिज्ञोग्निंप्रवेक्ष्येहतकल्मषः३२॥ब्राह्मणउवाच॥संकर्षणोवासुदेवःप्रद्युम्नोधन्विनांव
रः॥अनिरुद्धोप्रतिरथोनत्रातुंशक्नुवंतियत्३३॥तत्कथंनुभवान्कर्मदुःकरंजगदीश्वरैः॥चिकीर्षसित्वंबालिश्यात्
तन्नश्रद्दध्महेवयं३४॥अर्जुनउवाच॥नाहंसंकर्षणोब्रह्मन्नकृष्णःकार्ष्णिरेवच॥अहंवाअर्जुनोनामगांडीवंयस्यवैधनुः॥
३५॥मावमंस्थाममब्रह्मन्वीर्यंत्र्यंबकतोषणं॥मृत्युंविजित्यप्रधनेआनेष्येतेप्रजाःप्रभो॥३६॥एवंविस्रंभितोविप्रः
फाल्गुनेनपरंतप॥जगामस्वगृहंप्रीतःपार्थवीर्यंनिशामयन्॥३७॥प्रसूतिकालआसन्नेभार्यायाद्विजसत्तमः॥
पाहिपाहिप्रजांमृत्योरित्याहार्जुनमातुरः॥३८॥सउपस्पृश्यशुच्यंभोनमस्कृत्यमहेश्वरं॥दिव्यान्यस्त्राणिसंस्मृ
त्यसज्यंगांडीवमाददे॥३९॥न्यरुणत्सूतिकागारंशरैर्नानास्त्रयोजितैः॥तिर्यगूर्ध्वमधःपार्थश्चकारशरपंजरं॥
३९ ततःकुमारःसंजातोविप्रपत्न्यारुदन्मुहुः॥सद्योदर्शनमापेदेसशरीरोविहायसः॥४०॥ ॥ ॥ राम ॥

३५ एवंपौरुषवादैर्विस्रंभितःविश्वासंप्रापितःनिशामयन्श्लाघयन्॥३६।३७ब्राह्मणोपेक्षकत्वेनहास्यावज्ञयामहेश्वरंनमस्कृत्य॥३८॥न्यरु
णत्आवृतवान्तदेवाहतिर्यगूर्ध्वमिति॥३९॥अदर्शनमापेदेदेहोपिनावशिष्टइत्यर्थः॥४०॥ श्री श्री श्री राम श्री॥

४१॥३६॥ प्रत्युक्तो वारितः उपपत्तिभिः प्रतिषेधं कुर्वता ॥ ४७ ॥ मावज्ञं मावज्ञानीहि येनिंदंतित एवमनुष्याः नकीर्त्तिस्थापयंति निश्चलां करि
ष्यंति ॥ पादांतत्वे ॥ छंदोभंगभयात् ॥ ४८ ॥ दाहकमिति ॥ सप्तसप्तसंख्या गिरयेषु द्वीपेषु तान् ॥ ४९।५० हतमिति परिणामरूपनालोका

तदाहविप्रोविनिंद्यंविनिंदन्हृत्सत्सन्निधौ ॥ मैवंमच्छपतमेयोहंश्रद्धेत्वंक्लीवकत्थनं ॥ ४१ ॥ नवद्धान्नोनानिरुद्धोनरामो
नचकेशवः ॥ यस्यशक्तः कुमारित्रातुंकोन्यस्तदवनेश्वरः ॥ ४२ ॥ धिगर्जुनंमृषावादंधिगात्मश्लाघिनोधनुः ॥ दैवोपसृष्टं
योमौढ्यादानिनीषतिदुर्मतिः ॥ ४३ ॥ एवंशपतिविप्रर्षौविद्यामास्थायफाल्गुनः ॥ ययौसंयमनीमाशुयत्रास्तेभग
वान्यमः ॥ ४४ ॥ विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरीं ॥ आग्नेयींनैर्ऋतींसौम्यांवायव्यांवारुणीमथ ॥ ४५ ॥ रसातलं
नाकपृष्ठंधिष्ण्यान्यन्यान्युदायुधः ॥ ततोलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः ॥ ४६ ॥ अग्निंविविक्षुः कृष्णेनप्रत्युक्तः
प्रतिषेधता ॥ ४७ ॥ दर्शयेद्विजसूनुंस्तेमावज्ञात्मानमात्मना ॥ येतेहकीर्त्तिंविमलांमनुष्याः स्थापयंतिते ॥ ४८ ॥ इति
संभाष्यभगवानर्जुनेनसहेश्वरः ॥ दिव्यंस्वरथमास्थायप्रतीचींदिशमाविशत् ॥ ४९ ॥ सप्तद्वीपान्सप्तसिंधून्सप्त
सप्तगिरीनथ ॥ लोकालोकंतथातीत्यविवेशसुमहत्तमः ॥ ५० ॥ तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि
भ्रष्टगतयोबभूवुर्भरतर्षभ ॥ ५१ ॥ तान्दृष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्
पुरः ॥ ५२ ॥ तमः सुघोरंगहनंकृतंमहद्विदारयद्भूरितरेणरोचिषा ॥ मनोजवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरो
यथाचमूः ॥ ५३ ॥ द्वारेणचक्रानुपथेनतत्तमः परंपरंज्योतिरनंतपारं ॥ समश्नुवानंप्रसमीक्ष्यफाल्गुनः प्रताडिता

मात्रभावं ॥ ५४ ॥ चक्रानुपथेनचक्रमनुगतेनद्वारेणतत्तमः ॥ परंतस्मात्तमसः परंदूरेवर्तमानंपरंश्रेष्ठंभागवतंज्योतिः समश्नुवानंव्या
प्नुवत्प्रसमीक्ष्यप्रताडिताक्षः ॥ अक्षिणीनेत्रेन्यमील्लयदति ॥ ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम

पंतं ततः अन्धं लतः वृहत् ततः महान्त ऊर्मयो भूषणानि यस्य तत् ॥ तत्र सलिले भवनं महाकालपुरं यत् द्युमत्तमं द्युतिमत्तमं श्रेष्ठं ॥५५॥ सहस्रं मूर्धभि
र्वा फणाः तासां मणयः तेषां द्युतिभिः द्विसहस्रनेत्रैर्दर्शितः स्फटिकगिरिसंकाशः शितिकंठः कंठे जिह्वा शिता यो नीलाः कंठजिह्वा य

नतः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृहदूर्मिभूषणम् ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशो
भितं ॥५५॥ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः ॥ विभ्राजमानं द्विगुणोल्बणेक्षणं शिताचला
भं शितिकंठजिह्वं ॥५६॥ ददर्श तद्भोगसुखासनं प्रभुं महानुभावं पुरुषोत्तमोत्तमम् ॥ सांद्रांबुदाभं सुपिशंगवाससं
प्रसन्नवक्त्रं रुचिरायतेक्षणं ॥५७॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंडलं ॥ प्रलंबचार्वष्टभुजं स
कौस्तुभं श्रीवत्सलक्ष्मं वनमालयावृतम् ॥५८॥ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥
पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणं परमेष्ठिनां पतिं ॥५९॥ ववंद आत्मानमनंतमच्युतो जिष्णुश्च त
द्दर्शनजातसाध्वसः ॥ तावाह भूमा परमेष्ठिनां प्रभुः बद्धांजली सस्मितमूर्जया गिरा ॥६०॥ ॥ ॥ राम ॥

स्यंतं ॥५६॥ तद्भोगसुखासनं तस्यानंतस्य भोगो देहः सुखकरमासनं यस्य तं ॥५७॥ महान्तो मणिव्राता येषु ते येषां किरीटकुंडलानां प्रभया
परिक्षिप्ताः सर्वतः स्फुरंतः सहस्रं परिमि नाः कुंडला यस्य तं ॥५८॥ कीर्त्यजया कीर्तिसहितया अजया अखिलर्द्धिभिः अणिमादिविभूतिभिः
मूर्तिः धराभिः ॥५९॥ ऊर्जया ऊर्जितया गिरा ॥६०॥

श्री॰
भाग॰
द॰उ॰
२२८

मेकल्लावतीर्णांतिसंबोधनं शीघ्रं मेअंतिसकाशं इतमागच्छतं ॥६५॥ आचरतां आचरतं इदं तं भारतयुद्धान्सर्वमेवकृतमपि श्रेयस्कथन
प्रस्तावेनाचोक्तं ॥६४।६३।६२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे एकोनशीतितमोध्यायः ॥८९॥ चरमेतुपुनःप्रोक्ताः कृष्णलीला

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णावनेर्भरासुरान्हत्वेह भूयस्त्वरये
तमंतिमे ॥६१॥ पूर्णकामावपि युवां नरनारायणावृषी ॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं ॥६२॥ इत्यादिष्टौ
भगवता तौ कृष्णौ परमेष्ठिना ॥ ओमित्यानम्य भूमानमादाय द्विजदारकान् ॥६३॥ न्यवर्ततां स्वकं धाम संप्रहृष्टौ यथा
गतं ॥ विप्राय ददतुः पुत्रान्यथारूपं यथावयः ॥६४॥ निशाम्य वैष्णवं धाम पार्थः परमविस्मितः ॥ यत्किंचित्पौरुषं
पुंसां मेने कृष्णानुकंपितं ॥६५॥ इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन् ॥ बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जितै
र्मखैः ॥६६॥ प्रववर्षाखिलान्कामान्प्रजासु ब्राह्मणादिषु ॥ यथाकालं यथैवेंद्रो भगवान्श्रैष्ठ्यमास्थितः ॥६७॥
हत्वा नृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः ॥ अंजसा वर्तयामास धर्मं धर्मसुतादिभिः ॥६८॥ इति श्रीभागवतेम
हापुराणे दशमस्कंधे एकोनशीतितमोध्यायः ॥८९॥ श्रीशुक उवाच ॥ सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः प
तिः ॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः ॥१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लासमासतः ॥ यदुवंशावतंसानां मनंतपंचसकारणं ॥ श्रीकृष्णविभूतिं समासेन दर्शयति सुखंस्वपुर्यामिति ॥ सर्वसंपदादिसमृद्धायां
विशिष्टायाम् ॥ २ ॥

राम
२२८

२। ३।४। श्रियः पतिः षोडशपत्नीनामेकवल्लभः सन् तासां गेहेषु रेमे इत्यन्वयः ॥ ५ ॥ गेहविशेषणं प्रोत्फुल्लेति श्लोकेन तथा ह्रदिनीषु च
अंभो विगाह्य विजहार महान् उदयो वैभवं यस्य सः ॥ योषितां कुचकुंकुमैः लिप्तांगः यतः ताभिः परिरब्धः ॥ ७ ॥ सूतमागधवंदिभिः चोप

स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषु क्रीडंतीभिस्तडिद्द्युभिः ॥ २ ॥ नित्यं संकुलमा
र्गायां मदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वैरथैश्च कनकोज्वलैः ॥ ३ ॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु।
निर्विशद्भृंगविहगैर्नादितायां समंततः ॥ ४ ॥ रेमे षोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोसौ तद्गेहेषु
महर्द्धिषु ॥ ५ ॥ प्रोत्फुल्लोत्पलकल्हारकुमुदांभोजरेणुभिः ॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च ॥ ६ ॥ वि
जहार विगाह्यांभो ह्रदिनीषु महोदयः ॥ कुचकुंकुमलिप्तांगः परिरब्धश्च योषितां ॥ ७ ॥ उपगीयमानो गंधर्वैर्मृ
दंगपनवानकान् ॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥ ८ ॥ सिच्यमानोच्युतस्ताभिर्हसंतीभिः स्म रेचकैः
प्रतिसिंचन्विचिक्रीडे यक्षीभिर्यक्षराडिव ॥ ९ ॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कबरा
प्रसूनाः ॥ कांतं स्म रेचकजिहीर्षययोपगुह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥ १० ॥ ॥ ॥ ॥ ॥ ॥

गीयमानः ८ ताः क्लिन्नवस्त्राः अत एव विवृता ऊरू कुचप्रदेशाः उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि याभिः ताः जातेन स्मरोत्सवेन उ
ल्लसंति वदनानि यासां ताः ९

कच

श्री
भाग०
द० ३०
१२७

तासां स्तनेभ्यो विघट्टितं कुंकुमं मासकं यस्य सः ॥ क्रीडाया अभिषंगेण अभिनिवेशेन धुनः कंपितः कौतहंदबंधो यस्य सः ॥ ११ ॥ १२
१२ ॥ कृष्णैकधियः समाहिता इव तृष्णामना गिरः सत्यः पुनस्तमेवेशाचिंतयंत्यः जडं यथा भवति ॥ तथा यानि वाक्यानि ऊचुस्तानि मे
मत्तो गदतः शृणु इत्यन्वयः ॥ १४ ॥ ईश्वरः श्रीकृष्णः स्वपिति त्वं निद्राभंगं कुर्वती विलपसि न शेषे न स्वपिषि तद्धेतुरुचितमित्यर्थः ॥ अंवाना

दोःस्तनस्तनतलस्तनविघट्टितकुंकुमस्रक्क्रीडाभिषंगधुतकुंतलवृंदबंधः ॥ सिंचन्मुहुः युवतिभिः प्रतिषिच्यमानो रेजे
करेणुभिरिवेभपतिः परीतः ॥ ११ ॥ नटानां नर्तकानां च गीतवाद्योपजीविनां ॥ क्रीडालंकारवासांसि कृष्णोऽदात्तस्य च स्त्रियः
१२ ॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृता धियः ॥ १३ ॥ ऊचुर्मुकुंदैकधि
योगिर उन्मत्तवज्जडं ॥ चिंतयंत्योऽरविंदाक्षं तानि मे गदतः शृणु ॥ १४ ॥ स्त्रिय ऊचुः ॥ कुररि विलपसि त्वं वीतनिद्रा न शे
षे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ॥ वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीले
क्षितेन ॥ १५ ॥ नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि ॥ दास्यं गता वयमिवाच्युतपादजुष्टां
किंवा स्रजं स्पृहयसे कबरेण वोढुं ॥ १६ ॥ भो भोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोऽधिगतप्रजागरः ॥ किंवा मुकुंदापहृ
तात्मलांछनः प्राप्तां दशां त्वं च गतो दुरत्ययां ॥ १७ ॥ ॥ ॥ ॥ राम श्री राम श्री राम ॥

यराधस्तवापीत्याशयेनेत्याहुः ॥ नलिननयनस्य हासेन हसितमुदारं यल्लीलेक्षितं तेन कश्चिद्गाढं निर्भिन्नचेताः त्वमिति ॥ १५ ॥ नक्तं रात्राव
दृष्टबंधुः सती रोरवीषि किं चैतावता अपि त्वं वयमिव स्पृहयसे ॥ १६ ॥ अलब्धनिद्रः सदा निष्टनसे क्रोशसि किं चास्माभिः प्राप्तां दशां त्वम
पि गतोऽसि अहो कष्टं यथा वयं संभोगे न मुकुंदापहृतकुचकुंकुमादिलांछनाः तथा त्वमपि यत्तोपहृतश्रीकौस्तुभादिलांछनो लक्ष्यसे १७

राम
१२७

अर्दितःपीडितः॥ उर्व्युपस्थस्थले ॥२४॥२५॥ वल्गांतौनृत्यादिकुर्वंतौ ॥२६॥ साधुसाध्विति वदंतः ॥ नृ ॥ अव्ययः ॥ अश्रमः ॥ लाघिम्नालाघवेन ॥२७

प्रवेपितः सकंधिरमुद्वमन्व्यवेतोर्दितः ॥ अस्त्रुः पपातोर्व्युपस्थेवाताहतइवांघ्रिपः ॥२५॥ ततः कूटमनुप्राप्तं रामः प्रहर
तांवरः ॥ अवधीत्लीलयाराजन्सावज्ञंवाममुष्टिना ॥२६॥ तर्ह्येव हिशलः कूटस्य पादापहतशीर्षकः ॥ द्विधाविदीर्णस्तोश ३
लकउभावपिनिपेततुः ॥२९॥ चाणूरे मुष्टिके कूटे शलेतोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वेप्राणपरीप्सवः ॥३०॥ गो
पान्वयस्यानाकृष्यतैः संसृज्यविजह्रतुः ॥ वाद्यमानेषुतूर्येषु वल्गंतौ रुतनूपुरौ ॥३१॥ जनाः प्रजहृषुः सर्वेकर्मणारा
महष्णयोः ॥ ऋतेकंसं विप्रमुख्याः साधवः साधुसाध्विति ॥३२॥ हतेषुमल्लवर्येषु विद्रुतेषुचभोजराड्न्यवारयत्स्वतू
र्याणिवाक्यंचेदमुवाचह ॥३३॥ निःसारयतदुर्वृत्तौवसुदेवात्मजौपुरात् ॥ धनंहरतगोपानांनंदंबध्नीतदुर्मतिं ॥३४॥ वसु
देवस्तुदुर्मेधाहन्यतामाश्वसत्तमः ॥ उग्रसेनः पिताचापिसानुगः परपक्षगः ॥३५॥ एवंविकत्थमानेवैकंसेप्रकुपितोऽव्ययः
लघिम्नोत्पत्यतरसामंचमुत्तुंगमारुहत् ॥३७॥ तमाविशंतमालोक्यमृत्युमात्मनआसनात् ॥ मनस्वीसहसोत्थायजगृ
हेसोऽसिचर्मणी ॥३७॥ तंखड्गपाणिंविचरंतमाशुश्येनंयथादक्षिणसव्यमंबरे ॥ समग्रहीद्दुर्विषहोग्रतेजायथोरगंता
र्क्ष्यसुतःप्रसह्य ॥३८॥ प्रगृह्यकेशेषुचलत्किरीटंनिपात्यरंगोपरितुंगमंचात् ॥ तस्योपरिष्टात्स्वयमब्जनाभः पपातविश्वा
राम राम राम राम राम राम राम ॥
अथआत्मतंत्रः ॥३९॥ राम राम राम राम राम राम राम राम राम

३५ दुर्विषहं अविषह्य प्रग्रंतेजोयस्यसश्रीशातः ॥ ३८॥ गरिष्ठत्वायविश्वाश्रयत्वमुक्तंतत्रहेतुः अब्जनाभः उत्तमस्तस्योपर्येवपपातयतआत्मतंत्रः
३९

नूपे ॥ निर्विशेषानिः कृतिः आस्त्रण्यमित्यर्थः तत्कारिणः संतस्ते अभ्यधावन् ॥ ४० ॥ तथाता ह्यक अतिरभसो वेगो येषां तान् ॥ संयतान् उद्धतकान् ॥ ४१ ॥ ४३ ॥
शोचत्यो विलापाः भ्रकृः स्वचः अस्त्राणि ॥ ४४ ॥ धर्मज्ञेत्यादिनि विलापे प्रेमसंबोधनानि ॥ ४५ ॥ ४६ ॥ अनागसामिति तु परमार्थाभिधानं ॥ ४८ ॥ तेन व

तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ॥ हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र ॥ ३० ॥ सनि
त्यदोहि निर्धियात मीश्वरं पिवत्वदन्वा विचरन्नुखवपनुभवस्व ॥ ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप ॥ ३९ ॥ तस्या
नुगाश्यानसोष्टो कंकन्यग्रोधकादयः ॥ अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्विशाकारिणः ॥ ४० ॥ तथ्यातिरभसांस्तान् स सूयंताञ्चो ॥
३ ह्निमिहतः ॥ अहन्यदियमुद्धम्यपष्टनिवष्टगाधिपाः ॥ ४१ ॥ नेडुर्दुर्भयोभ्योपि प्रह्वेशाद्या विभूतयः ॥ ७ष्ये कि रतत्तं नीताः
शशंसुर्देहवतः स्त्रियः ॥ ४२ ॥ तेषां स्त्रियो महाराज रुरुदुर्मृतबन्धवः ॥ तत्राभीर्येर्विनिध्नंत्यः शीर्षाण्यपहृतविलोचनाः ॥ ४३
शयानान्वीरशय्यायां पीतीनालिंग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ॥ ४४ ॥ हा नाथ प्रियधर्मज्ञ
करुणानाथवत्सल ॥ त्वया हतेन निहता वयं ते सपुरप्रजाः ॥ ४५ ॥ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमि
व निर्दग्धोत्सवमंगला ॥ ४६ ॥ अनागसां त्वं भूतानां कृतवानुद्रोहमुल्बणं ॥ तेनेमां मोहदशां नीतोभूत्वंकं कोलमेतदृशं ॥ ४७
सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ॥ गोप्ता च तद्वधध्यायी न क्वचित्सुखमेधते ॥ ४८ ॥ राम राम राम राम
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दीयाव्ययांत्वया पत्या विरहिता पुरीयं न शोभत इति स्वदुःखस्याभिधानं ॥ ४६ ॥ प्रभवत्येषः प्रभवं त्यस्मादिति प्रभवः ॥ अपियंत्यस्मिन्निति अप्ययः
सच सच ॥ तद्वध्यानं तत्स्वज्ञातकार्ले शील्लं यस्य सः ॥ ४८ ॥ राम राम राम राम राम राम राम राम राम राम

७९ ॥ आस्य इत्यर्थः इष्टत्वमस्पृक्षत् ॥ ४९ ॥ पुत्रभ्रांतिं विहाय जगदीश्वरा विति ज्ञात्वा शंकितौ न सस्वजाते नालिंगितवंतौ ॥ किंतु वद्धांजली तस्थतुरि
त्यर्थः प्रसह्य हत्वा हंसरीद्रं मल्लं द्वन्द्वमल्ललीलया ॥ बीभत्सचरितकंसं स बीभत्सममारयत ॥ ५१ ॥ इति दशमे चतुश्चत्वारिंशः ॥ ४४ ॥ प
ञ्चचत्वारिंशे कथ्यपितृनंदादिविसांत्वनं ॥ उग्रसेनाभिषेकश्च गुरौ वासात्पुरागमः ॥ १ ॥ उपलब्धार्थौ विदित्वेति ॥ अयमर्थः ॥ उपसमीपे आश्रयाः
पुत्रत्वबुध्या सांसारिकपरमस्त्रारभोगः ॥ स्वैरमेव लब्धार्थौ ॥ अत्र आवामीश्वरावितिप्राप्तः परमज्ञानत्वपार्थौ याभ्यां तथाभूतौ ज्ञात्वा ॥ म

श्रीशुकउवाच ॥ राजयोषित आश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां हतानां समकारयत ॥ ४९ ॥ मा
तरं पितरं चैव मोचयित्वाथ बंधनात ॥ कृष्णरामौ ववंदाते शिरसा स्पृश्य पादयोः ॥ ५० ॥ देवकी वसुदेवश्च विज्ञाय जगदीश्व
रौ ॥ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ श्री
शुकउवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ माभूदिति निजां मायां ततान जनमोहिनीं ॥ १ ॥ उवाच पितरावे
त्य साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नंव ताततेति सादरं ॥ २ ॥ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि ॥ बाल्यपो
गंडकैशोराः पुत्राभ्यामभवन्क्वचित ॥ ३ ॥ न लब्धो दैवहतयोर्वासो नो भवदंतिके ॥ यां बालाः पितृगेहस्था विंदंते लालि

ताभूदं ४

यिप्रसन्नेऽमत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात दुर्लभं तु मयि पुत्रतया प्रेम ॥ अत इदानीमेव तत्वज्ञानं माभूदिति निजां स्वाधीनां मायां तयोः प्र
साधितवानिति ॥ १ ॥ नंदेवदर्शयन्निदुवाचेत्याह द्वाभ्यां ॥ प्रीणयन्सादरं प्रवन्नू ॥ २ ॥ अस्मत्तः अस्मन्निमित्तं नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्या
मावाभ्यां हेतुभ्यां बाल्यपौगंडकैशोराः तत्तदवस्था न भवन्नु लालनीत्यर्थः ॥ तेन भवन्निति अहंतेतः पुत्राभ्यामिति सामानाधिकरण्यं वा ॥ ३ ॥ आवा
भ्यां दैवहीनाभ्यामित्याह ॥ न लब्ध इति ॥ पितृगेहस्था बाला यां मुदं विंदंते सा च न लब्धेति ॥ एवं तावत् श्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्ते
३ ४

आवयोः पुत्रयोः स्मत्यविर्यमी लोपेन धर्महानिरपि जातेत्याह सर्वार्थसंभव इति ॥ सर्वेषां धर्माद्यर्थानां संभवो यस्मिन् स देहः यतः याभ्यां जनितः पो
षितश्च ॥ तयोः पित्रोर्निर्वेशं भृत्यानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषा न प्राप्नोति ॥५॥ तन्मध्ये पितुर्व्यः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रो
र्वृत्तिं जीविकां न संपादयेत्तं प्रेत्य लोकांतरे यमदूताः स्वस्यैव मांसं खादयंति हीति ॥६॥ किंच ॥ मात्रादिशुश्रूषामकृत्वा वन्यफलजीवितस्य भव

सर्वार्थसंभवो देहो जनितः पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥५॥ यस्तयोरात्मजः कल्प आत्मना च
धनेन च ॥ वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंति हि ॥६॥ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं ॥ गुरुं विप्रं प्रपन्नं च क
ल्पोऽविभ्रच्छ्वसन्मृतः ॥७॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रांता दिवसा वामनर्चतोः ॥८॥ तत्क्ष
न्तुमर्हथस्तात मातर्नौ परतंत्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं ॥९॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य
हरेर्विश्वात्मनो गिरा ॥ मोहितावंकमारोप्य परिष्वज्यापतुर्मुदं ॥१०॥ सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किं
चिदूचतू राजन्बाष्पकंठौ विमोहितौ ॥११॥ एवमाश्वास्य पितरौ भगवान्देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृ
पं ॥१२॥ आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥१३॥ मयि भृत्य उपासी
ने भवतो विबुधादयः ॥ बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥१४॥ राम राम राम राम राम राम

तीत्याह मातरमिति ॥ अविभ्रत् अपुष्णन् ॥ श्वसन्नपि मृत एवेति ॥७॥ तत्तस्मान्नौ आवयोः मोघं व्यर्थं अनर्चतोः अपूजयतोः ॥८॥ दुर्हृदा
कंसेन कृता ॥९॥११॥ आश्वास्य सान्त्वयित्वा ॥१२॥ त्वमेवाज्ञापयेति मा वदेत्याह ॥ ययातिशापादिति ॥ तवत्तु यादवत्वेपि मदाज्ञया न दो
ष इति भावः ॥१३॥ ममतादृशी शक्तिर्नास्तीति चेत्तत्राह ॥ मयीति मत्प्रसादेन सर्वं भविष्यतीत्यर्थः ॥१४॥ राम राम राम राम

कृ २

स्वान् ज्ञातीन् सर्वान्संबंधांश्च दिग्भ्य आनाय्येति ॥ १५ ॥ १६ ॥ सिद्धाः पूर्णाः कृष्णरामाभ्यां गतो निःशेषतो ज्वरस्तापो येषां ते ॥ १७ ॥ सदयस्मितं वीक्षणं यस्मिं
स्तत् ॥ १८ ॥ प्रवयसो वृद्धा अपि अतिशयितबलौजसोऽभवन्नित्यर्थः ॥ १९ ॥ २० ॥ भृशं आत्मनोऽप्यधिकेन पोषितौ ॥ नचाश्चर्यमेतदित्याहुः पित्रोरिति

सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥ सभाजितान्समाश्वा
स्य विदेशावासकर्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥ १६ ॥ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ।
गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजं ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मित
वीक्षणं ॥ १८ ॥ तत्र प्रवयसोऽप्यासन्युवानोऽतिबलौजसः ॥ पिबंतोक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥ १९ ॥ अथ नंद समा
साद्य भगवान्देवकीसुतः ॥ संकर्षणश्च राजेंद्र परिष्वज्येदमूचतुः ॥ २० ॥ पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशं ॥
पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोपि हि ॥ २१ ॥ स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टान
कल्पैः पोषरक्षणे ॥ २२ ॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं ॥ २३ ॥ एवं
सांत्वय्य भगवान्नंदं सव्रजमच्युतः ॥ वासोलंकारकुप्याद्यैरर्हयामास सादरं ॥ २४ ॥ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः
पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २५ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥
॥ रा ॥ रा ॥ रा ॥ राम ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥ रा ॥

आत्मनो देहादप्यात्मजेष्वभ्यधिका हि प्रीतिरिति ॥ २१ ॥ देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्राविति नि वाच्यमित्याह स पितेति ॥ २२ ॥ २३ ॥ स
व्रजं व्रजवासिभिः सहितं ॥ कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्रादीनि तत्प्रभृतिभिः ॥ २४ ॥ ॥ राम राम राम ॥

पुरोधसा गर्गाचार्येण द्विजसंस्कृतिं उपनयनं ॥ २६ ॥ गावो गाः ॥ रुक्मस्य माला विद्यंते यासां ताः ॥ क्षौमवस्त्रमालावतीः ॥ २७ ॥ याः पूर्वं मनोद
त्ताश्चासन् ताः एवाददात् ननु ताः कंसेन हृताः ॥ सत्यं ॥ राजगोष्ठ्या दाक्षिण्यं दत्ता इत्याह ॥ कंसेनाधर्मत इति ॥ २८ ॥ गायत्रं व्रतं ब्रह्मचर्यं ॥ २९ ॥
प्रकर्षेण भवंत्याभ्यामिति प्रभवौ ॥ अत एव सर्वज्ञौ ॥ स्वतःसिद्धममलं ज्ञानं प्रच्छादयंतौ नरचेष्टितैः ॥ ३० ॥ ३१ ॥ यथा यथावत् उपसाद्य

अथशूरसुतोराजन्पुत्रयोः समकारयत् ॥ पुरोधसाब्राह्मणैश्च यथावद्द्विजसंस्कृतं ॥ २६ ॥ तेभ्योऽदाद्दक्षिणांगावोरु
क्ममालाः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥ २७ ॥ यः कृष्णरामजन्मर्क्षे मनोदत्तामहाम
तिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचा
र्याद्गायत्रं व्रतमास्थितौ ॥ २९ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ॥ ३०
अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवंतिपुरवासिनं ॥ ३१ ॥ यथोपसाद्य तौ दांतौ गुरौ
वृत्तिमनिंदितां ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदा
नखिलान्सांगोपनिषदो गुरुः ॥ ३३ ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्वि
धां ॥ ३४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥ ३५ ॥ राम राम राम ॥

प्राप्य गुरौ वृत्तिं मत्या नु ग्राहयंतौ शिक्षयंतौ ॥ उपसृप्य उपगतौ सेवितवंतावित्यर्थः ॥ ३२ ॥ शुद्धो भावो यासां ताभिरनुवृत्तिभिः ॥ सांगोपनि
षदः अंगानि शिक्षादीनि तैः उपनिषद्भिश्च सहितान् ॥ ३३ ॥ सरहस्यं मंत्रदेवताज्ञानसहितं ॥ धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांसा
दीन् ॥ आन्वीक्षिकीं तर्कविद्यां षड्विधां संधिविग्रहयानासनद्वैधमाश्रय इत्येवं षड्विधां राजनीतिं ॥ ३४ ॥ सकृन्निगदमात्रेण एकपाठेन गुरोरुच्चार
णमात्रेण ॥ ३५ ॥

तावतीः चतुःषष्टिकलाः ॥ ताश्च शैवतंत्रप्रोक्ता लिख्यन्ते यथा ॥ गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४ आलेख्यं ५ विशेषकच्छेद्यं ६ तंडुलकुसुमबलिविकाराः ७
पुष्पास्तरणं ८ दशनवसनांगरागाः ९ मणिभूमिकाकर्म १० शयनरचनं ११ उदकवाद्यमुदकसंघातः १२ चित्रायोगाः १३ माल्यग्रथनविक
ल्पाः १४ शेखरापीडयोजनं १५ नेपथ्ययोगाः १६ कर्णपत्रभंगाः १७ गंधयुक्तिः १८ भूषणभोजनं १९ ऐंद्रजालं २० कौचुमारयोगाः २१
हस्तलाघवं ॥ २२ ॥ चित्रशाकापूपभक्ष्यविकारक्रियाः ॥ २३ ॥ पानकरसरागासवयोजनं २४ सूचीवायकर्म २५ सूत्रक्रीडा २६ वीणाडमरुक
वाद्यानि २७ प्रहेलिका २८ प्रतिमाला २९ दुर्वचकयोगाः ३० पुस्तकवाचनं ३१ नाटकाख्यायिकादर्शनं ३२ काव्यसमस्यापूरणं ३३ पट्टिका
वेत्रवाणविकल्पाः ३४ तर्ककर्माणि ३५ तक्षणं ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवादः ३९ मणिरागज्ञानं ४० आकरज्ञानं ४१ वृ

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाचार्यं छंदयामासतुर्नृप ॥ ३६ ॥ द्विजस्तयोस्तं महिमानम
द्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं ॥ संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह ॥ ३७ ॥ तथेत्यथारुह्य महा
रथौ रथं प्रभासमासाद्य दुरंतविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहरत्तयोः ॥ ३८ ॥ तमाह
भगवानाशु गुरुपुत्रः प्रदीयतां ॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥ राम राम राम राम ॥

क्षायुर्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकसारिकाप्रलापनं ४४ उत्सादनं ४५ केशमार्जनकौशलं ४६ अक्षरमुष्टिकाकथनं
४७ म्लेच्छितकविकल्पाः ४८ देशभाषाज्ञानं ४९ पुष्पशकटिका ५० निमित्तज्ञानं ५१ यंत्रमातृकाधारणमातृकासांवाच्यं ५२ मानसीका
व्यक्रिया ५३ अभिधानकोशः ५४ छंदोज्ञानं ५५ क्रियाविकल्पाः ५६ छलितकयोगाः ५७ वस्त्रगोपनानि ५८ द्यूतविशेषाः ५९ आकर्ष
क्रीडाः ६० बालक्रीडनकानि ६१ वैनायिकानां ६२ वैजयिकानां ६३ वैयासिकानां च ज्ञानानि ६४ इति चतुःषष्टिकलाः ॥ छंदयामासतुः उप
लोभितवंतौ ॥ ३६ ॥ प्रभासक्षेत्रे महार्णवे मृतं बालं वरयामास ॥ ३७ ॥ ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहारेति ॥ ३८ ॥ रामायनमः

पंचजनस्त्वत्तो रोऽह्वार्षीन्न सचसमहान् ममासाध्य इत्यर्थः ॥ ४० ॥ ४२ ॥ सपर्यां पूजां ॥ ४३ ॥ सर्वेषां भूतानामाशया अंतःकरणानि तान्यालयो विषयो यस्य तं ॥ ४४ ॥ निजं कर्मैव बंधनं यस्य तं ॥ तथा भूतमपि मदाज्ञापुरस्कारेणानय तत्तेन दोष इत्यर्थः ॥ ४५ ॥ ४६ ॥ वत्सेति प्राधान्येनैकस्य

समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान् ॥ अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः ॥ ४० ॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकं ॥ तदंगप्रभवं शंखमादाय रथमागमत् ॥ ४१ ॥ ततः संयमनीं नाम यमस्य दयितां पुरीं ॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ॥ ४२ ॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां ॥ ४३ ॥ उवाचावनतः कृष्णं सर्वभूताशयालयं ॥ लीलामनुष्य हे विष्णो युवयोः करवाम किं ॥ ४४ ॥ श्रीकृष्ण उवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबंधनं ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ॥ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिःक्रियः ॥ को नु युष्मद्विधगुरोः कामो नामावशिष्यते ॥ ४७ ॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छंदांस्ययातयामानि भवंत्विह परत्र च ॥ ४८ ॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥ ४९ ॥ समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ राम श्रीरामो यनमः राम रामा ॥

संबोधनं गुरोर्निःक्रयो गुरुदक्षिणा ॥ युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामो विशिष्यते न कोपि ॥ ४७ ॥ हे वीरौ ॥ ४८ ॥ अनिलवद्रंहो यस्य तेन पर्जन्यो मेघः तद्वन्निनदो यस्य तेन ॥ ४९ ॥ नष्टं अदृष्टं तत्पुनर्लब्धं धनं याभिः ता इव ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कंधटीकायां पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ षट्चत्वारिंशके चोक्तं उद्धवे प्रेष्यते हरिः ॥ यशोदानंदयोर्यत्र क्रियते शोकापनोदनं ॥ १ ॥ रामायनमः ॥ राम २३१

प

कामचारं हि जातिः सत्त्यरित्यज्याति संयतः ॥ गुरोर्ज्ञानमनुत्राप्य साक्षात्गोपीतपादिशात् ॥ गोपीनां सांत्वनमति रहस्यं सन्मंत्रिसाध्य
मिति तदर्थं उद्धवं विशिनष्टि वृष्णीनामिति ॥ बुद्धिसत्तमः बुद्ध्या इति श्रेष्ठः ॥ १ ॥ गोपीनां विशेषतः संदेशे कारणमाह ताइति ॥ मय्येव
संकल्पात्मकं मनो यासां ताः ॥ अहमेव प्राणो यासां ताः ॥ मदर्थे त्यक्ता दैहिकाः पतिपुत्रादयो याभिस्ताः ततः किं अत आह येत्यक्त

श्रीशुक उवाच ॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षाडुद्धवो बुद्धिसत्तमः ॥ १ ॥
तमाह भगवान्प्रेष्टं भक्तमेकैतिनं क्वचित् ॥ गृहीत्वा पाणिना पाणी प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौ
म्य पित्रोर्न्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ॥ ३ ॥ तामन्मनस्का मत्प्राणा मदर्थे त्यक्त
दैहिकाः ॥ येत्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ॥ ४ ॥ मयिताः प्रेयसां प्रेष्टे दूरस्थे गोकुलस्त्रियः ॥ स्मरंत्यो
गविमुह्यंति विरहौत्कंठ्यविह्वलाः ॥ ५ ॥ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन ॥ प्रत्यागमनसंदेशैर्वल्लव्यो मे
मदात्मकाः ॥ ६ ॥ श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुराहतः ॥ आदाय रथमारुह्य प्रययौ नंदगोकुलं ७

लोकधर्मा इति ॥ मन्निमित्तं त्यक्ता लोकधर्मा ऐहिकामुष्मिकसाधनानि च यैस्तान्बिभर्मि अस्माभिः संवर्द्धयामीत्यर्थः ॥ ४ ॥ तासां वियोगाधिं दर्श
यति द्वयेन ॥ मयि ता इति विरहौत्कंठ्येन विह्वलाः परवशाः ॥ ५ ॥ गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति प्रत्यागमनसंदेशा
तैः मे मदीयाः वल्लव्यो गोप्यः मदात्मिका इति तासामात्मा च स्वदेहे यदि स्यात्तर्हि विरहतापेन दह्येतैव तस्य मयि वर्तमानत्वाज्जीवंतीति भा
वः ॥ ६ ॥ संदेशं भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदित्यादिकं ॥ ७ ॥

निम्लोचति अस्तं गच्छति सति ॥ छन्नं यानं यस्येति तदा गोपीभिरज्ञातत्वेन नंदसंगं लब्धवानित्यस्य सूचयति ॥ ८ ॥ व्रजं वर्णयति पंचभिः वाशिताः ऋतुम
त्यो गावः तन्निमित्तमभितो युद्ध्यद्भिः शुष्मिभिर्मत्तैर्गर्वैर्वृषैर्नादितं वास्राभिर्धेनुभिः स्ववत्सकान्प्रति ॥ ९ ॥ विलंघद्भिरुत्पतद्भिः ॥ गोदोहशब्दैः

प्राप्तो नंदव्रजं श्रीमन्निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥ वाशितार्थेभियुद्ध्यद्भिर्नादितं शु
ष्मिभिर्वृषैः ॥ धावंतीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः ॥ गोदोहश
ब्दाभिरवं वेणूनां निःस्वनेन च ॥ १० ॥ गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सु
विराजितं ॥ ११ ॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमं ॥ १२ ॥ सर्वतः पुष्पि
तवनं द्विजालिकुलनादितं ॥ हंसकारंडवाकीर्णैः पद्मषंडैश्च मंडितं ॥ १३ ॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियं ॥ नं
दः प्रीतः परिष्वज्य वासुदेवधियार्चयत् ॥ १४ ॥ भोजितं परमान्नेन संविष्टं कशिपौ सुखं ॥ गतश्रमं पर्यपृच्छत्पादसंवाहना
दिभिः ॥ १५ ॥ कच्चिदंग महाभाग सखा नः शूरनंदनः ॥ आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १६ ॥ दिष्ट्या कंसो ह
तः पापः सानुगः स्वेन पाप्मना ॥ साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥ १७ ॥ अपि स्मरति नः कृष्णो मातरं सुहृ
दः सखीन् ॥ गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिं ॥ १८ ॥ राम राम राम राम राम राम राम ॥

कं

सहाभितो रवाः मुंचमानं वत्सानय अत्रानय गृहाण देहीत्यादयो यस्मिन् तत् वेणूनां निःस्वनेन च ॥ १० ॥ गायंतीभिर्गोपीभिर्गोपैश्च सुविराजितं ॥ ११ ॥
अग्न्याद्यर्चनान्वितैर्गृहैः धूपादिभिश्च मनोरमं ॥ १२ ॥ षंडं समूहः ॥ १३ ॥ आर्चयत्पूजयामास ॥ १४ ॥ द साधूनामिति कर्मणि षष्ठ्यः ॥ १७ ॥ गावो गाः गि
रिं गोवर्द्धनं ॥ १८ ॥

अप्यायास्यतीत्यागमिष्यतीति किं ॥१९॥ श्रीकृष्णोपकारस्मरणादिभिरनुपमानंदेनाभिभूयमान आह ॥ दावाग्नेरित्यादिना । वातात् वर्षाच्चेति वृषा
त्सर्पाच्चेति ॥ अत्ययेभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्म ॥२०॥ किंच स्मरतामिति । लीलया अपांगेन निरीक्षितं । अंग हे उद्धव २१

अप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुं ॥ तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणं ॥१९॥ दावाग्नेर्वातवर्षाच्च वृष
सर्पाच्च रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥२०॥ स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षितं ॥ हसि
भाषितं तं चांग सर्वा नः शिथिलाः क्रियाः ॥२१॥ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्ष्यमाणानां मनो याति तद
ात्मतां ॥२२॥ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥२३॥ कंसं नागायुतप्रा
णं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपाः ॥२४॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभं
गिरिं जैकेन हस्तेन सप्ताहमदधाद्गिरिं ॥२५॥ प्रलंबो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया
२६ ॥ श्रीशुक उवाच ॥ इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥२७॥ यशोदा वर्ण्य
मानानि पुत्रस्य चरितानि च ॥ शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥२८॥ तयोरित्थं भगवति कृष्णे नंदयशोदयोः
वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥२९॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ
राम ॥ राम राम राम राम ॥ यत्कृता मतिरीदृशी ॥३०॥ राम राम राम राम राम ॥ राम
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नकेवलं शिथिला एव ॥ किंतु शनैरुपरमंतीत्याह सरिच्छैलेति ॥ सरितश्च शैलाश्च वनोद्देशाश्च तान् ॥ आक्रीडान् ॥ क्रीडास्थानानि २२ सुराणाम
र्थाय महद्गंभीरं गर्गस्य वचनं यथा ॥२३॥ नकेवलं तद्वचनानुसारेणैव ॥ व्यवहारसंवादादपीत्याह कंसमिति ॥२४॥ इभराट् यष्टिमिव तालत्रयप्रमाणं
धनुर्बभंज

श्रीभा°
द° अ°
२३३

२४

अखिलगुरुत्वमेव जनकत्वेन नियंतृत्वेन चाह॥ एताविति॥ रामो मुकुंदश्चेत्येतौ विश्वस्य बीजयोनी निमित्तोपादाने॥ ननु पुरुषप्रधानयोर्बीजयो
निंत्वं प्रसिद्धं मत आह॥ पुरुषः प्रधानमिति पुरुषोंऽशः प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावेवेत्यर्थः॥ एवं जगत्कारणत्वमुक्तं॥ किंच॥ अन्वीय भूते
षु भूतेषु अनुप्रविश्य भूतानां॥ तदुपहितस्य विलक्षणस्य चनानाभेदस्य ज्ञानस्य च जीवस्य॥ ईशाते ईश्वरौ नियंतारौ भवतः॥ पुराणौ अनादी
अनादित्वात्कारणत्वे॥ तत्वश्च नियंतृत्वमित्यर्थः॥ ३१॥ ननु स्मृत्यादिकर्मावेशामनुष्यादिवज्जन्मदर्शनाच्च तस्यान्येभ्यः को विशेष इत्याशंक्याह यस्मि

एतौ हि विश्वस्य च बीजयोनी रामो मुकुंदः पुरुषः प्रधानं॥ अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ॥ ३१॥ य
स्मिन्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धं॥ निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः॥ ३२
तस्मिन्भवंतावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ॥ भावं विधत्तां नितरां महात्मन् किं वावशिष्टं युवयोः सुकृत्यं॥
३३॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः॥ प्रियं विधास्यते पित्रोर्भगवान्सात्वतां पतिः॥ ३४॥ हत्वा कंसं रंगमध्ये प्रतीपं
सर्वसात्वतां॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत्॥ ३५॥ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके॥ अंतर्हृदि स
भूतानामास्ते ज्योतिरिवैधसि॥ ३६॥ राम राम राम राम राम राम राम राम राम राम राम॥

निति द्वाभ्यां कर्माशयं कर्मवासनां निर्हृत्य त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवान्॥ अर्कवर्णः शुद्धसत्वमूर्तिः सन् परां गतिं तत्पदं याति॥ ३२॥ अखिलस्यात्मा
च हेतुश्च तस्मिन् कारणेन मनुष्याकृतौ महात्मनु महात्मपरिपूर्णौ भवंतौ भक्तिं कृतवंतौ॥ अतः कृतकृत्यावित्यर्थः॥ ३३॥ प्रस्तुतमाह॥ आगमिष्यतीति पि
त्रोर्युवयोः॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान्॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमिति यदाह कृष्णस्तत्सत्यं करिष्यतीति॥ ३४॥ ३५॥
कालविलंबं तमसहमानौ प्रत्याह॥ मा खिद्यतमिति हे महाभागौ॥ अंतिके इदानीमेव समीपे वा॥ ज्ञात इत्यत आह॥ अंतर्हृदीति तर्हि सर्वैः कि
मिति न दृश्यते॥ तत्राह ज्योतिरिति॥ तद्यथा मथनं विना न दृश्यते तथा भक्तिं विना कृष्णोपीति भावः॥ ३६॥ राम राम राम राम राम॥

राम
२३३

अहं ह्यात्मा तेन तस्य त्वं हि मामकं ॥ न ह्यस्यातिप्रियान्प्रियादीन्विहाय तत्तत्संगकृत इति मन्येत तत्रोक्तं न ह्यस्येति ॥ अस्य प्रियादयो न हि संति तत्र हेतुः अमानिनः समानस्येति च ॥ ३७ ॥ ३८ ॥ सोऽपि जन्मकर्मादिरहितोऽपि क्रीडाप्रयोजनः सन् साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्विकतामसराजसयोनिषु ॥ यद्वा देवादिमत्स्यादिनृसिंहादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥ ननु जन्मकर्मादिरहितस्य कुत एतदित्यत आह सत्वमिति ॥ क्रीडन् अतीतोऽपि क्रीडन्नु ॥ तथापि मायागुणैर्घटत इत्यर्थः ॥ ४० ॥ अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टांतीकुर्वंस्तस्याविद्ययैव कर्तृत्वमिति सदृष्टांतमाह

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः ॥ नोत्तमो नाधमो वापि समानस्यासमोऽपि वा ॥ ३७ ॥ न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थः सोऽपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥ सत्वं रजस्तम इति भजते निर्गुणो गुणान् ॥ क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हंत्यजः ॥ ४० ॥ यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते ॥ चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥ युवयोरेव नैवायमात्मजो भगवान् हरिः ॥ सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥ दृष्टं श्रुतं भूतभवद्भविष्यत् स्थास्नुश्चरिष्णुर्महदल्पकं च ॥ विनाच्युताद्वस्तु तरां न वाच्यं स एव सर्वं परमार्थभूतः ॥ ४३ ॥ राम राम राम राम राम राम राम ॥

यथेति ॥ भ्रमरिका भ्रमणं परिभ्रमणं तयोपलक्षिता तया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते ॥ एवं चित्ते कर्तरि सति ॥ तत्र चित्ते अहंधिया आत्माध्यासेन आत्मा कर्ता स्मृतो यथा तद्वदिति ॥ ४१ ॥ किंच सर्वात्मत्वनिरूपणेन मोहनिवृत्तये संबंधमनैकांतिकी करोति युवयोरेवेति द्वाभ्यां ॥ युवयोरेव नायमात्मजः किंतु सर्वेषामपि ॥ तत्रापि नात्मज एव किंतु शत्रुमित्रादिरूपोऽपीति ॥ ४२ ॥ अच्युतादृते नास्ति वस्तु तरां न तत्त्वतो वाच्यं निर्वचनार्हं नास्तीति ४३

दीपान्निःश्वासज्वालया वा म्लानदेहत्यादीन् ॥ ७४ ॥ मरीचिभिः कांच्यादिभूषणस्थितैः ॥ रज्जूर्विकर्षद्भुजेषु कंकणानां स्रजो यासां ताः ॥ चलंतो नितंबाः
स्तना हाराश्च यासां कुंडलत्विषा त्विषंतः स्फुरंतः कपोला यासां ॥ अरुणानि कुंकुमानि येषु तान्याननानि यासां ता एवंताश्च ताश्च ॥ ७५ ॥ द्वतदाव्र
जौकसो गोपाः ॥ ७७ ॥ स क्रोधमाहुः अक्रूर इति ॥ अर्थं साधितवानित्यर्थसाधकः तदाहुः येन नीत इति ॥ ७८ ॥ कंसं घातयित्वा पुनः किमर्थमागत

एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन् ॥ गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमंथन् ॥ ४४
ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः ॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ॥
४५ ॥ उद्गायतीनामरविंदलोचनं व्रजांगनानां दिवमस्पृशद्ध्वनिः ॥ दध्नश्च निर्मंथनशब्दमिश्रितो निरस्यते येन दिशाममंगलं ॥
४६ ॥ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः ॥ दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन् ॥ ४७ ॥ अक्रूर आगतः किं वा यः कंस
स्यार्थसाधकः ॥ येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥ किं साधयिष्यत्यस्माभिर्भर्तुः प्रीतस्य निःकृतिं ॥ इति स्त्री
णां वदंतीनामुद्धवोऽगात्कृताह्निकः ॥ ४९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ श्रीशुक उ
वाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं ॥ पीतांबरं पुष्करमालिनं लसन्मुखारविंदं मणिमृष्टकुंड
लं १

कृत्याशंकि कार्यं संभावयंति ॥ किमिति ॥ तदा साधितेन कार्येण प्रीतस्य भर्तुः ॥ पापांतरे प्रेतस्य मृतस्य कंसस्य निःकृतिमौर्ध्वदेहिकमस्माभिः
कृत्वा साधयिष्यति किं अस्मन्मांसैः पिंडान्दास्यतीत्यर्थः ॥ एवं वदंतीनां स्त्रीणां ॥ ततस्तस्मिन्नवसरे कृतस्नानादिनियम उद्धव आगत इति ॥ ४९ ॥
षट्चत्वारिंशः ॥ सप्तचत्वारिंशके त्वकृष्णसंदेशेन गोपिकाः ॥ बोधयित्वोद्धवस्तत्र मनुज्ञाप्यागमत्पुरीम् ॥ १ ॥ राम राम राम राम ॥

उद्धव्यान गोपिकासं
पो॰ नम

म

अपीच्यं रूपदर्शनं यस्य सः ॥ अस्मृतस्य वेषेषोभूषणानि च यस्य सः ॥ कोयं कुतो वा कस्य चेति वदंत्य एतं परिवव्रुः ॥ ३ ॥ पार्षदे सेवकं ॥ ४ ॥ पित्रोः प्रियचिकीर्षये यत्र हेतु ॥ स्नेहानुबंधः इति ॥ ५ ॥ अथवा गोत्रजे तस्य तत्र हेतुः ॥ अन्ये इति ॥ अर्थकृता कार्यनिमित्ता विडंबनं करणमात्रं न तु तात्त्विकी मैत्री ॥ ज्ञातिभिरिति द्वाभ्यां ॥ ६

स्त्रियो विस्मिताः को यमपीच्यदर्शनः कुतस्त्यः कस्यात्मजो वेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुका उत्तमश्लोकपदांबुजाश्रयं ॥ ३ ॥ तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ४ ॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतं ॥ भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया ॥ ५ ॥ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ॥ स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः ॥ ६ ॥ अन्ये ह्यर्थकृता मैत्री यावदर्थविडंबनं ॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनःस्विव षट्पदैः ॥ ७ ॥ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः ॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं ॥ ८ ॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहं ॥ दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियं ॥ ९ ॥ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः ॥ कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ १० ॥ गायंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः ॥ तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ ११ ॥ राम राम राम राम राम राम राम राम

अस्यैवान्यार्थदर्शने प्रपंचः निःस्वमित्यादिना ॥ दत्ता दक्षिणा येन तं यजमानं ॥ ८ ॥ पक्षिणो विगतफलं वृक्षं रतां आसक्तां अनुरतामित्यर्थः ॥ ९ ॥ त्यक्तलौकिकाः त्यक्तलोकव्यवहाराः ॥ १० ॥ प्रियस्य कर्माणि गायंत्यः तथा तस्य बाल्यकैशोरयोर्यानि कर्माणि तानि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदंत्यश्च गतह्रिय इति पूर्वक्रिययैव संबंधः ॥ ११ ॥

प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितो यं दूत इति कल्पयित्वाऽब्रवीत्॥ यदा तस्मिन्प्रियप्रस्थापितो ऽपि वे दृष्टिं कृत्वा मधुकरापदेशे
नोद्धवमेवाब्रवीदित्यर्थः॥११॥ हे मधुप कितवस्य धूर्तस्य बंधो॥ नोऽस्माकमंघ्रिं मा स्पृश मा मां नमस्कारेण प्रार्थयस्वेत्यर्थः॥ ननु किमित्य
पेक्षायामाह त्वत्सखस्य तव श्मश्रूणि लोहितत्वे कारणमुक्तेक्षमाणाह॥ सपत्न्याः कुचाभ्यां विलुलिता संमर्दिता या श्रीकृष्णस्य या वनमाला
अत एव तस्याः॥ कुंकुममयेष्कैः श्मश्रुभिरुपलक्षितः॥ किंतु तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्मत्प्रसादनेन तस्य॥ यदुस

काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमं॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत्॥११॥ गोप्युवाच॥ मधुप कितवबंधो
मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः॥ वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि
विडंब्यं यस्य दूतस्त्वमीदृक्॥१२॥ सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान्भवादृक्॥ परिच
रति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः॥१३॥ किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपति
मगृहाणामग्रतो नः पुराणं॥ विजयसखसखीनां गीयतां तत्प्रसंगः क्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः॥१४॥ ॥

दसि विडंब्यं उपहासास्पदं॥ कुतः यस्य दूतस्त्वमीदृक ईदृशः॥१२॥ ननु किमित्येवमवज्ञानीयं किं वा तेनापकृतं अत आह॥ सकृदिति भवादृक
त्वादृशो दुर्मनाः सुमनसः कुसुमानि यथा त्यजति तद्वत्॥ अहो वत ताविद्वत्स्य पादपद्मं श्रीः कथं सेवते॥ विदितं मयेत्याह अपीति॥ बतेति खेदे
उत्तमश्लोकजल्पैर्मिथ्याकथाभिः प्रायो हृतचेताः॥ वयं तु न लक्ष्मीवदविचक्षणा इति भावः॥१३॥ झंकारानुबद्धधाकुर्वंतमस्मत्प्रसादलाभाय
कृष्णं गायतीति मत्वाह॥ किमिहेति पुराणं पुरातनं बहुशोऽनुभूतं॥ विजयसखस्य कृष्णस्य सांप्रतं याः सख्यस्तासामग्रतस्तत्प्रसंगो गीयतां
कृष्णाः कृष्णस्य प्रियाः तेन पूजिता इति वा॥ तेनालिंगनेन क्षपिता कुचरुक्कयाः स्तनाः ते तवेष्टमपेक्षितं कल्पयंतीति॥१४॥ रामायनमः श्रीकृष्णा

भोमातमैवं वोत्सलामनुसृत्यानंगाविक्लवत्वं प्रसादयितुं मामादिष्टवानित्यत आह दिवीति दिवि भुवि रसातले या ह्रियः सुताः काना
मधुरापानकाश्च न ॥ ददित्यस्मयां तस्येत्यर्थः ॥ कपटेन रुचिरेण हासेन सुविक्रमो यस्य तस्य ॥ हे कपटेति वा किंच यस्य चरणरजः श्रीः सेवते तत्र
वयं काः ॥ अपि च यद्यप्येवं तथापि कृपणपदे कृपणानुकंपितेत्युक्ते उत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः ॥ २५ ॥ पादहृल्ले
प्रविशंतं तमापयिष्यंतमिव मत्वाह ॥ शिरसि न्यस्त पादं विसृज्य ॥ तथापि मंचतमाहवे स्मीति ॥ मुकुंदाद् अन्यत्र तत्र ॥ शिक्षितेत्यर्थः दौ

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य याः स्युः ॥ चरणरज उपास्ते यस्य भूतिर्वयं
का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ २५ ॥ विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मु
कुंदात् स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥ २६ ॥ राम राम राम

त्यैर्हृतकर्मभिः ॥ चाटुकारैः प्रियोक्तिरचनाभिः अनुनयविदुषः प्रार्थनाचातुर्यस्य ते सर्वमहं वेद्मि ॥ मुकुंदे त्वत्त्वमप्यविश्वसनीय इति भावः
ननु तेन किमपराद्धं तत्राह स्वकृत इति ॥ स्वकृते तदर्थमेव विसृष्टाः ॥ अपत्यपत्यन्यलोकाः अपत्यानि पतयश्चेतीहलोकश्चान्यलोको
धर्मसाध्यस्तद्याभिस्ताः ताः अकृतचेताः ॥ असंयतचित्तः त्यो व्यसृजत ॥ अस्मिन् किमनुसंधातव्यमित्यर्थः ॥ २६ ॥ राम। यनमो नमः
राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम राम राम राम राम राम राम राम ॥

किंच ॥ हन्तास्य दुष्कर्माणि कर्माण्येव संदधानाद्बिभेम्यहमस्मादित्याह मृगयुरिवेति ॥ मृगयुर्लुब्धक इव यः कपीन्द्रं वालिनं ॥ विव्यधे अविध्यत् ।
लुब्धधर्मा क्रौर्यवान् ॥ अलुब्धधर्मेति वा ॥ लुब्धको हि तन्मांसमत्तुकामो विध्यति ॥ अयं तु न तथा अतो दुष्टात्कस्मिन्नित्यर्थः ॥ तथा स्त्रियं च शूर्पणखां
स्त्रीजितः सीतापरतंत्रः ॥ कामएव यानं प्राप्तिसाधनमस्यास्तां विरूपां छिन्नकर्णनासिकामकरोद्द्वारार्थिरूपेण ॥ तथा बलिमपि तद्द

मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानां ॥ बलिमपि बलिमत्त्वावेष्टयद्ध्वांक्षव
द्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥ राम राम राम राम राम राम राम ॥

त्तबलिं अत्त्वा लब्धयित्वा ध्वांक्षवत् काकवत् अवेष्टयत् बबंध वामनरूपेण ॥ बलिमपि बलिमत्त्वाऽध्यो द्विपदिष्टपाद्य इति पाठे बलिं पूजां गृ
हीत्वा विष्टपात्स्वर्गादिध्योद्विपदित्यर्थः ॥ तत्तस्मादसितस्य कृष्णस्य सख्यैरलं ॥ एवं चेत्किमिति नित्यं गायथ ॥ तत्राह दुस्त्यज इति तस्य कथार्थ
पोर्थ इति २

राम
२३६

अपिच ज्ञानीमधनत्कथापिविवर्णलतामूलोन्मूलिनीतितथापिनत्यक्तुंशक्नुमः किंकुर्म इत्याह ॥ यदन्नुचरितेनीति ॥ यस्याश्चरितमेवलीलातदेवकर्णापीयू
षतस्यविप्रुट्कणिकातस्याः सकृददनंसेवनंतेनविधूतानिरस्ताद्वंद्वधर्माःरागादयोयेषांते ॥ अतएवविनष्टाः असन्तुल्याः ॥ दीनंदुःखितंगृहकुटुंबंवि
हायदीनाभोगहीनाविहंगाअपिभिक्षुचर्यांप्राणवृत्तिमात्रंचरंति ॥ अतस्याः कथात्यक्तुंनशक्नुमइतिनिंदापरत्वेऽयंतावच्छ्रोतोर्थः ॥ अन्यत्तु
त्वेपिपारमार्थिकोयमर्थः ॥ विधूतद्वंद्वधर्माइत्यंतःसमासःपूर्ववत् ॥ ततस्तेचतेअविनष्टाश्चेतिसमासः ॥ इतरेषुनर्द्वंद्वधर्माणोविनष्टाएव ॥ सप
दितत्क्षणमेवदीनंतुच्छंगृहमहितंकुटुंबंविहायदीनाइवाकिंचनाः धीराइतिवापाठः ॥ बहवोविहंगाहंसाइवसारासारविवेकचतुराःभिक्षुच
र्यांपारमहंस्यंचरंति ॥ तस्मादेवंपरमपुरुषार्थरूपत्वादुस्त्यजत्तत्कथार्थइति ॥ १८ ॥ ननुकिमेवंक्लेशेवर्त्तसेयेवसाकंरहस्यंकिमेवंनावेचदित्यतआहवयमिति

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्माविनष्टाः ॥ सपदिगृहकुटुंबंदीनमुत्सृज्यदीनाबहवइवविहंगा
भिक्षुचर्यांचरंति ॥ १८ ॥ वयमृतमिवजिह्मव्याहृतंश्रद्दधानाःकुलिकरुतमिवाज्ञाःकृष्णवध्वोहरिण्यः ॥ ददृशुरसकृदेतत्तन्नखस्प
र्शतीव्रस्मररुजउपमंत्रिन्भण्यतामन्यवार्ता ॥ १९ ॥ प्रियसखपुनरागाः प्रेयसाप्रेषितः किंवरयकिमनुरुंधेमाननीयोसिमेंग ।
नयसिकथमिहास्मान्दुस्त्यजद्वंद्वपार्श्वंसततमुरसिसौम्यश्रीर्वधूःसाकमास्ते ॥ २० ॥ राम राम राम राम ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

हेउपमंत्रिन्दूत ॥ अन्यामिमांवार्ता ॥ यतः कुलिकस्यव्याधस्यगायोः रुतंगीतं ॥ अज्ञाःयथात्रतंसत्यमितिश्रद्दधानाकृष्णस्यहारिणस्यवध्वोभार्याःहरि
ण्यःशरैःहताःसत्योरुजोदहशुः ॥ एवंजिह्मस्यकुटिलस्यव्याहृतंऋतमिवश्रद्दधानाःस्पृहयंत्योवयंअसकृदेतद्ददृशिम ॥ किंतत् ॥ तस्यनखैःस्प
र्शःतेनतीव्रःस्मरःतेनरुजाःपीडाःतस्मादन्यावार्ताभण्यतांकथ्यतामिति ॥ १९ ॥ पराइत्यगत्वापुनरागतंप्रत्याह ॥ प्रियसखेति ॥ हेप्रियसखे ॥ प्रेय
साप्रेष्ठेनकृष्णेनपुनःप्रेषितः किंत्वमागतोसि ॥ हेअंगमेमाननीयःप्रियोसिभवान्किमनुरुंधेप्रार्थितुमिच्छतीत्यर्थः ॥ तद्वरयद्वृणीष्वाभ्यंमानितंकृत्याह
नयसीति ॥ इहसतीरस्मान्दुस्त्यजद्वंद्वमिथुनीभावोयस्यतस्यपार्श्वंसमीपंकथंनयसितथाहसौम्यश्रीर्नामवधूःसाकंसहैवसततमास्ते ॥ तस्या
उरसिवक्षस्येव ॥ २० ॥

श्रीभा°
द° ३°
२३०

तेनसंमंत्रितासतीब्रूते ॥ अपिबतेति बतहर्षे ॥ हेसौम्य अक्रूरात्कुलादागत्य आर्यपुत्रः कृष्णः अधुनाकिंमधुपुर्यांवर्तते ॥ कदाचिदपिनोस्माकंवार्ता
किंब्रूते ॥ अगुरुवत्सुगंधंभुजंनोमूर्ध्निकदानुधास्यतीति ॥ २१ ॥ श्रीकृष्णदर्शनोत्सुकागोपीः ॥ प्रेयस्यसंदेशैः सांत्वयन्प्रथमंतावदिदमभाषत
२२ ॥ तदाहषड्भिः ॥ अहोइति ॥ स्मस्फुटंयूयंपूर्णार्थाः कृतार्थाः ॥ २३ ॥ श्रेयोभिः श्रेयः साधनैः ॥ २४ ॥ अनुत्तमा अतिश्रेष्ठा ॥ २५ ॥ अवृणीतवृतवत्यः २६

अपिबतमधुपुर्यामार्यपुत्रो,धुनास्ते स्मरति सपितृगेहान्सौम्यबंधूंश्चगोपान् ॥ क्वचिदपिसकथानः किंकरीणांगृणीतेभुज
मगुरुसुगंधंमूर्ध्न्यधास्यत्कदानु ॥ २१ ॥ श्रीशुकउवाच ॥ अथोद्धवोनिशम्यैवंकृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपी
रिदमभाषत ॥ २२ ॥ श्रीउद्धवउवाच ॥ अहोयूयंस्मपूर्णार्थाभवत्योलोकपूजिताः ॥ वासुदेवेभगवतियासामित्यर्पितंमनः ॥ २३
दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णेभक्तिर्हिसाध्यते ॥ २४ ॥ भगवत्युत्तमश्लोकेभवती
भिरनुत्तमा ॥ भक्तिः प्रवर्तितादिष्ट्यामुनीनामपिदुर्लभा ॥ २५ ॥ दिष्ट्यापुत्रान्पतीन्देहान्स्वजनान्भवनानिच ॥ हित्वावृ
णीतयूयंयत्कृष्णाख्यंपुरुषंपरं ॥ २६ ॥ सर्वात्मभावोधिकृतोभवतीनामधोक्षजे ॥ विरहेणमहाभागामहान्मेनुग्रहः कृ
तः ॥ २७ ॥ श्रूयतांप्रियसंदेशोभवतीनांसुखावहः ॥ यमादायागतोभद्राअहंभर्तूरहस्करः ॥ २८ ॥ श्रीभगवानुवाच ॥ भवती
नांवियोगोमेनहिसर्वात्मनाक्वचित् ॥ यथाभूतानिभूतेषुखंवाय्वग्निर्जलंमही ॥ तथाहंचमनःप्राणभूतेंद्रियगुणा
श्रयः ॥ २९ ॥ ॥ राम राम राम राम राम राम राम राम राम राम राम राम राम ॥ ॥

सर्वात्मभावः ऐकांतभक्तिः अधिकृतः प्रसन्नः ॥ भगवत्प्रेमसद्भावदर्शनेनममैवमहाननुग्रहः कृतइति ॥ २७ ॥ भर्तुः कृष्णस्यरहस्करः रहस्य
कार्यकर्ता ॥ २८ ॥ भवतीनांमेमयासह ॥ वियोगोनास्तिकुतः ॥ सर्वात्मनासर्वस्योपादानकारणेन अतएवसर्वंचमनआदिकार्येष्व[illegible]मनुगत
त्वेनास्थितइतिसदृष्टांतमाहयथेति ॥ भूतेषुचराचरेषुभूतानियथावाय्वग्निः ॥ वायुश्चअग्निश्चेत्यर्थः ॥ तथाहंचेतिमनआदीतिकार्याणि
गुणाः करणंतेषामाश्रयत्वेनानुगतइत्यर्थः ॥ २९ ॥ राम राम राम राम राम राम राम श्रीकृष्णायनमः ॥ रामा ॥ ॥

राम
२३०

ननु कारणत्वे सर्वानुगतत्वे च कार्यकारणभेदः स्यात् अत आह आत्मन्येवेति ॥ ननु नित्यसिद्धस्य कुतः सृष्ट्यादि तत्राह भूतेन्द्रियगुणात्म
ना ॥ भूतेन्द्रियेति वा पाठः ॥ तद्रूपेणेति ॥ ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह ॥ आत्ममायानुभावेनेति ॥ ३० ॥ ननु आत्मनो भूतादिरूपत्वे तद्दोष
प्रसङ्गस्तत्राह आत्मेति आत्मा तु शुद्धः कुतः अगुणान्वयः न गुणोऽन्वेतीति तथा ॥ तत् कुतः व्यतिरिक्तः तदपि कुतः ज्ञानमयः ज्ञानस्वरूपः
नन्वहंप्रत्यये स्वसंवेद्यमेवात्मनो नानावस्थत्वमिति कुतः शुद्ध इति तत्राह सुषुप्तेति ॥ मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेणाध्यवसी
यते न स्वतः इत्यर्थः ॥ ३१ ॥ अतः मनोनिरोधे तदभावादित्यात्मव्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते ॥ येनेति ॥ उत्थितः प्रबुद्धः यथा मिथ्याभूतमे

साक्षात्कारिज्ञानकारणमिन्द्रियम्

आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ॥ आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥ ३० ॥ आत्मा ज्ञानमयः शुद्धो व्यति
रिक्तोऽगुणान्वयः ॥ सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३१ ॥ येनेन्द्रियार्थान् ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुन्ध्यादिन्द्रि
याणि विनिद्रः प्रत्यपद्यत ॥ ३२ ॥ एतदन्तः समाम्नायो योगः सांख्यं मनीषिणां ॥ त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥ ३३ ॥
यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशां ॥ मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥ ३४ ॥ राम मम श्रीकृष्णाय नमः ॥

अत्रेदोऽर्थग्रहः तुरी
तत्र जाग्रदादित्रिकं प्रोच्यते
तैर्विनाऽऽस्मरणं यत्तु मन
साक्षरप्रसज्जितम् यत्रा
वीत्स्मरणे न स्यात् तत्तु
सुप्तमिति स्मृतम्

भवत्स्वप्नं ध्यायति ॥ एवं बाधितानपीन्द्रियार्थान् शब्दादीन् येन मनसा ध्यायेत् चिन्तयेत् ॥ ध्यायंश्च येनेन्द्रियाणि प्रत्यपद्यत प्राप्नुयात् तन्मनः विनिद्रः अनलसः
सन् निरुन्ध्यान्नियच्छेदिति ॥ ३२ ॥ तावता च कृतार्थो भवतीत्याह एतदन्त इति ॥ एष मनोनिरोधः अन्तः समाप्तिः फलं यस्य सः समाम्नायो वेदः स तत्र पर्य
वस्यतीत्यर्थः ॥ योगोऽष्टाङ्गः ॥ सांख्यमात्मानात्मविवेकः ॥ त्यागः संन्यासः तपः स्वधर्मः ॥ दमः इन्द्रियदमनं मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः ॥ समु
द्रान्ता आपगा नद्य इवेति ॥ ३३ ॥ ननु किमन्याय्य इवास्मानात्मविद्यया प्रलोभयसि ॥ वयं तु सर्वसंदेहे सकलगुणगणालंकृते न त्वया विरहं नैव
सहामहे इति चेदत आह ॥ यत्त्वहमिति दृशां प्रियोऽपि यद्दूरे वर्ते तन्मदनुध्यानार्थं तदनुध्यानं मनसः सन्निकर्षार्थमिति ॥ ३४ ॥ ॥ ॥ ॥ ॥

योगोऽष्टाङ्गः ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि आसनेन रुजो हन्ति प्राणायामेन पातकम् विकारं मानसं योगी प्रत्याहारेण सर्वदा निरोधात् जाय
ते वायुर्वायोरग्निः प्रजायते तापेनापः प्रजायन्ते ततोऽन्तः शुद्ध्यते त्रिभिः प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः प्रत्याहारद्विषट्केन जायते धारणा शुभा धारणा द्वादश
प्रोक्तं ध्यानं ध्यानविशारदैः ध्यानं द्वादशकेनैव तत्समाधिरिहोच्यते चरतां चक्षुरादीनां विषयेभ्यो यथाक्रमम् प्रत्याहारस्तथा तेषां प्रत्याहारः स कथ्यते ॥ द्विविधं भवति ध्यानं सगुणं नि
र्गुणं तथा सगुणं वर्णभेदेन निर्गुणं केवलं विदुः

शब्दादीनां यथामा
त्रायावत्कर्णादि
प्रस्थितानां वेदव
स्तं ध्यानं तत्समा
धितः परम्

एतदुपपादयति त्रयेण यथा दूरचरइति ॥३४॥ उपैष्यथेति माधुर्यमात्रमिति चेदत आह या इति ॥ हे कल्याण्यः स्वभर्तृभिः प्रतिबद्धा या वने क्री
डन्ता मया सह अलब्धक्रीडाः तास्तदैव मां मां प्रापुः प्रापुः ॥३७॥ तस्य संदेशेनागता स्मृतिर्यासां ताः प्रथमार्थे द्वितीया ॥३८॥ यदूनामहितः शत्रुः
अघकृत् दुःखदः ॥ दिष्ट्येत्यानंदे ॥ आप्तैः प्राप्तैः हितैर्वा सह ॥३९॥ अन्या ऊचुः कथमिति ताम्सां वाक्यैर्विभ्रमैश्चानुभाजितः पूजितः ॥४०॥ अन्या ऊचुः

यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते ॥ स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥३५॥ मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृ
त्ति यत् ॥ अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ॥३६॥ या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ॥ अलब्धरासाः कल्याण्यो
मापुर्मद्वीर्यचिंतया ॥३७॥ श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ॥ ता ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः
॥३८॥ गोप्य ऊचुः ॥ दिष्ट्याऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ॥ दिष्ट्याप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥३९॥ कथं रति
विशेषज्ञः प्रियः सपुरयोषितां ॥ नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुभाजितः ॥४०॥ कच्चिद्गदाग्रजः सौम्य करोति पुरयोषितां ॥ प्री
तिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥४१॥ अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वै
रकथांतरे ॥४२॥ ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृंदावने कुमुदकुंदशशांकरम्ये रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्मा
भिरीडितमनोज्ञकथः कदाचित् ॥४३॥

कच्चिदिति ॥ नोऽस्माकं कमनीयां प्रीतिं कच्चित्पुरयोषितां करोति स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितः ॥ ताभिरस्माभिर्वा ॥४१॥ पुन
रन्या ऊचुः ॥ किमनया चिंतया ॥ अस्मान् कच्चित्प्रस्तुते स्मरति किं ॥ ग्राम्याः अविदग्धाः ॥४२॥ अन्या ऊचुः ताः किमिति ॥ कुमुदैः कुंदैः शशां
केन च रम्ये वृंदावने क्वणंति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां ॥ अस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य सः तदा या निशा रेमे ताः
कदाचित्किं स्मरति वा न वेति ॥४३॥

त्वन्निमित्तेन शोकेन तप्ताः नः अस्मान् गात्रैः कृष्णस्पर्शादिभिः संजीवयन्किं उज्जेष्यतीति ॥ ७४ ॥ अन्या ऊचुः कस्मादिति ॥ अनन्यगतित्वेन सर्वमत्रावसरसंपत्ति मद्दैश्वर्यं प्राप्तः कस्मादिहागमिष्यतीति ॥ ७५ ॥ अन्यास्तु परमार्थमूचुः ॥ किमस्माभिरिति ॥ वनचारीभिरस्माभिः ॥ अन्याभिर्वा वीरराजकन्याभिर्महात्मनो धीमस्य किंच ॥ श्रीपतेः ॥ तदप्यात्मत्वत एवाप्तकामस्य अत एव कृतात्मनः पूर्णस्य किं कोप्यर्थः क्रियेत न कश्चिदिति ॥ ७६ ॥ यतोऽयं समानायाहुः परं

अक्ष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ॥ संजीवयन्नु नो गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ७४ ॥ कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताहितः ॥ नरेन्द्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ७५ ॥ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ॥ श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ॥ ७६ ॥ परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला ॥ तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ७७ ॥ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदं ॥ अनिच्छतोपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥ ७८ ॥ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ॥ संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ॥ ७९ ॥ पुनः पुनः स्मारयन्ति नंदगोपसुतं बत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ८० ॥ गत्या ललितयोदारहाससलीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ॥ ८१ ॥ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ मग्नमुद्धर गोविंद गोकुलं वृजिनार्णवात् ॥ ८२ ॥ श्रीशुक उवाच ॥ ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजं ॥ ८३ ॥ उवास कतिचिन्मासान् गोपीनां विनुदञ्छुचः ॥ कृष्णलीलाकथां गायन् रमयामास गोकुलं ॥ ८४ ॥ राम राम ॥

गतिः सैवास्मान्नाकुलयति ॥ अतो नैराश्यमेव परं सुखं तच्चातिदुःखकरमित्याहुः ॥ परं सौख्यमिति ॥ स्वैरिणी कामचारिणी ॥ ७७ ॥ संविदमेकांतवार्ता ॥ ७८ ॥ किंच ॥ तद्विस्मर्तोन तावद्दुःखमस्ति सापि नास्माकं संभवतीत्याहुः ॥ सरिच्छैलेति त्रिभिः ॥ आचरिताः ॥ सेविताः ॥ ७९ ॥ ८० ॥ हेउद्धव ॥ तं कथं विस्म रामेति ॥ ८१ ॥ ८२ ॥ श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा ॥ ८३ ॥ विनुदयन्नपनयन् ॥ ८४ ॥ राम राम राम राम राम राम ॥

५५ ॥ सरिद्वनगिरिद्रोण्यादिषु प्रत्येकं कृष्णलीलासंबंधस्थानादिभिः संस्मारयन्रेमे ॥ ५६ ॥ कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यं ॥ ताः गोपीर्नमस्यन्नुनम
स्कारिष्यन्नु ॥ उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्यानभवतीति दर्शयितुं ॥ तासां महत्वं पंचभि ॥ जगौ उवाच ॥ ५७ ॥ एता इति ॥ एताः परं केवलं तनु
भृतः सफलजन्मानः ॥ रूढभावाः परमप्रेमवत्यः ॥ यदिति यं रूढभावं भवभियो मुमुक्षवः ॥ मुनयो मुक्ता अपि वांछंति ॥ वयं भक्ता अपि अतः
अनंतस्य कथारसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसंबंधिभिः शौक्लसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिः किं कोऽतिशयः यत्र तत्र जातः स एव
सर्वोत्तम इत्यर्थः ॥ यद्वा ॥ अनंतकथारसो यस्य तस्य ब्रह्मजन्मभिस्तत्तुल्यैर्जन्मभिरपि किमित्यर्थः ॥ ५८ ॥ किंतु ॥ ईश्वरप्रसादो महत्वे कार

यावंत्यहानि नंदस्य व्रजेऽवात्सीत्स उद्धवः ॥ व्रजौकसां क्षणप्रायाण्यासन्कृष्णस्य वार्तया ॥ ५५ ॥ सरिद्वनगिरिद्रोणीर्वीक्षन्कु
सुमितान्द्रुमान् ॥ कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसां ॥ ५६ ॥ दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवं ॥ उद्धवः परमप्रीत
स्ता नमस्यन्निदं जगौ ॥ ५७ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखिलात्मनि रूढभावाः ॥ वांछंति यद्भवभियो मुनयो व
यं च किं ब्रह्मजन्मभिरनंतकथारसस्य ॥ ५८ ॥ क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः ॥ नन्वीश्व
रोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ५९ ॥ नायं श्रियोऽङ्ग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगं
धरुचां कुतोऽन्याः ॥ रासोत्सवेऽस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनां ॥ ६० ॥ राम राम राम राम राम

णं तस्य च न जातिराचारो ज्ञानं वा कारणं ॥ किंतु ॥ केवलं भजनमेवेत्याह ॥ क्वेमा इति ॥ साक्षाज्ज्ञातः शुभम् ॥ नन्वहो ॥ उपयुक्तः सेवितः अगदराज
श्रेष्ठतमौषधमिति ॥ ५९ ॥ अत्यंतामहत्वं स्त्रीणां गोपीषु भगवतः प्रसाद इत्याह नायमिति ॥ अंग उद्धव ॥ अहो नितांतरतेरेकांतरतिमत्याः श्रियोऽपि नायं
प्रसादः अनुग्रहोऽस्ति ॥ नलिनस्येव गंधो रुक्कांतिश्च यासां तासां स्वर्गांगनानामप्सरसामपि नास्ति ॥ अन्याः पुनर्दूरतो निरस्ताः रासोत्सवे कृ
ष्णभुजदंडाभ्यां गृहीतः आलिंगितः कंठो येन लब्धा आशिषो याभिः तासां गोपीनां य उदगात् आविर्बभूव ॥ ६० ॥ राम राम राम राम ॥ राम
१३९

किंच ॥ आस्तां तावद्गोपीनां भाग्यं ममत्वेतावत्प्रार्थ्यमित्याह ॥ आसामिति गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यामित्या
शंसा कथंभूतानां याइति ॥ आर्याणां मार्गं धर्मं च हित्वा ॥ ६१ ॥ पुनस्ता एव विशिनष्टि ॥ यावा इति ये योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषु न्यस्तं परिर
भ्य तापं जहुरिति ॥ ६२ ॥ एवं महत्वं प्रतिपाद्य तं नमस्करोति वंद इति ॥ ६३ ॥ अनुज्ञाप्य अनुज्ञां याचित्वा ॥ आमंत्र्य पृष्ट्वा ॥ ६४ ॥ ६५ ॥ नोऽस्माकं मनसो वृ

आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनां ॥ या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मु
कुंदपदवीं श्रुतिभिर्विमृग्यां ॥ ६१ ॥ या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्यां ॥ कृष्णस्य त
द्भगवतश्चरणारविंदं न्यस्तं स्तनेषु विजहुः परिरभ्य तापं ॥ ६२ ॥ वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ॥ यासां हरिकथो
द्गीतं पुनाति भुवनत्रयं ॥ ६३ ॥ श्रीशुक उवाच ॥ अथ गोपीरनुज्ञाप्य यशोदां नंदमेव च ॥ गोपानामंत्र्य दाशार्हो यास्यन्नारुरुहे
रथं ॥ ६४ ॥ तं निर्गतं समासाद्य नानोपायनपाणयः ॥ नंदादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६५ ॥ मनसो वृत्तयो नः स्युः कृ
ष्णपादांबुजाश्रयाः ॥ वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥ ६६ ॥ कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ॥ मंग
लाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥ ६७ ॥ एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ॥ उद्धवः पुनरागच्छन्मथुरां कृष्णपालितां ॥
६८ ॥ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसां ॥ वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ६९ ॥ इति श्रीभागवते महापुरा
णे दशमस्कंधे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः श्री श्रीरामायसमस्तोनमः ॥

त्तयः ॥ कृष्णपादांबुजाश्रयाः स्युः ॥ अभिधायिनीः अभिधायिन्यः ॥ ६६ ॥ कृष्णे रतिः स्यादिति ॥ ६७ ॥ ६८ ॥ कृष्णादिभ्यो नंदादीनां भक्त्युद्रेक
माह ॥ उपायनानि चादादिति ॥ ६९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां सप्तचत्वारिंशोऽध्यायः ॥ अष्टचत्वारिंशकेऽथ कृष्णः
कुब्जामभीरमत् ॥ अक्रूरस्य गृहं गत्वा ततो गजाह्वयमाशितात् ॥ १ ॥ सैरंध्रीकाममानार्थ्यं पूरयित्वा मनोरथान् ॥ अक्रूरस्य ततः कृष्णस्तेन पार्थानसौ
न्ययत् ॥ २ ॥

महार्होहैरुपस्करैः ॥ उपस्करैर्महार्होपकरणैरन्वितां कामोपायैः स्रग्गंधदीपकैः स्वरतसंबंधादिलिंगैरुपबृंहितं ॥२॥ यथायथोदितं ॥३॥४ प्रसाधितोऽयोग्यतामा
पादित आत्मा देहो यया सा ॥ सव्रीडं यल्लीलयोत्स्मितं स्मितं तद्युक्तैर्विभ्रमयुतैरीक्षितैरुपलक्षिता ॥५॥ अनुलेपार्पणादन्यन्नास्याः पुण्यं नास्तीति दु

श्रीशुक उवाच ॥ अथ विज्ञाय भगवान्सर्वात्मा सर्वदर्शनः ॥ सैरंध्र्याः कामतप्तायाः प्रियमिच्छन्गृहं ययौ ॥१॥ महार्होपस्करैराढ्यं
कामोपायोपबृंहितं ॥ मुक्तादामपताकाभिर्वितानशयनासनैः ॥ धूपैः सुरभिभिर्दीपैः स्रग्गंधैरपि मंडितं ॥२॥ गृहं तमायां
तमवेक्ष्य सासनात्सद्यः समुत्थाय हि जातसंभ्रमा ॥ यथोपसंगम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥३॥
तथोद्धवः साधुतयाभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनं ॥ कृष्णोऽपि तूर्णं शयनं महाधनं विवेश लोकाचरितान्य
नुव्रतः ॥४॥ सा मज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः ॥ प्रसाधितात्मोपससार माधवं सव्रीडलीलो
त्स्मितविभ्रमेक्षितैः ॥५॥ आहूय कांतां नवसंगमह्रिया विशंकितां कंकणभूषिते करे ॥ प्रगृह्य शय्यामधिवेश्य रामया रे
मेऽनुलेपार्पणपुण्यलेशया ॥६॥ सानंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेन रुजो मृजंती दोर्भ्यां स्तनांत
रगतं परिरभ्य कांतमानंदमूर्तिमजहादतिदीर्घतापं ॥७॥ सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरं ॥ अंगरागार्पणेनाहो दुर्भ
गेदमयाचत ॥८॥ आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया ॥ रमस्व नोत्सहे त्यक्तुं संगं तेंबुरुहेक्षण ॥९॥ तस्यै कामवरं
दत्वा मानयित्वा च मानदः ॥ सहोद्धवेन सर्वेशः स्वधामागमदर्द्धिमत् ॥१०॥ ॥ राम राम राम रामच

र्भगेत्युक्तं पुण्यलेशयेत्युक्तं न तु पुण्यस्याल्पत्वविवक्षया ॥६॥ कुचादीनां रुजो मृजंतीति जिघ्रंतीति चरणं ॥७॥ काममेव प्राक्तनदृष्ट्या याचत न चो
पाइवत्सा तन्निष्टेति दुर्भगेत्युक्तं ॥ कृतार्थत्वेऽतस्या न संदेहः ॥८॥९॥ कामं एव वरं तं दत्वा ॥ मानयित्वा ॥ चालिंकादिदानैः ॥ १०॥ रामायनमः कृष्ण

मनोग्राह्यं विषयकामं ॥ असत्त्वात्कुबुद्धित्वात् ॥११॥ किंचिच्चिकीर्षयन्हस्तिनापुरप्रस्थानं कारयितुमिच्छन्नित्यर्थः ॥ अक्रूरप्रियकाम्यया च ॥१२॥ आरा
द्दूरत एव ॥१३।१४॥ आप इति विच्छेदः अपः आ सर्वतो धारयन्नित्यर्थः ॥१५।१६॥ वां युवयोरिदं कुलं उद्धृतं समेधितं च ॥१७॥ वामिदं कुलमित्यादि व्य
वहारदृष्ट्योक्त्वा परमार्थमाह युवामिति ॥ जगन्मयौ युवां ॥ कुतः जगद्धेतू ॥ तदपि कुतः प्रधानपुरुषौ तदात्मकौ अतो भवद्भ्यां विना परं कारणं का
र्यं च नास्तीति ॥१८॥ ननु प्रत्यक्षादिसिद्धं कथं नास्तीत्युच्यते अत आह आत्मसृष्टमिति ॥ हे ब्रह्मन् परमेश्वर ॥ ब्रह्मेति वा पाठः तत्र आदिशक्तिभिरा

दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरं ॥ यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ ॥११॥ अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः
किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया ॥१२॥ स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबांधवान् ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्याभि
नंद्य च ॥१३॥ ननाम कृष्णं रामं च स तैरप्यभिवादितः ॥ पूजयामास विधिवत्कृतासनपरिग्रहान् ॥१४॥ पादावनेजनीरापो धारयन्
शिरसा नृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः ॥१५॥ अर्चित्वा शिरसानम्य पादावंकगतौ मृजन् ॥ प्रश्रयावनतोऽक्रूरः
कृष्णरामावभाषत ॥१६॥ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलं ॥ भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंताच्च समेधितं ॥१७॥ युवां प्रधानपु
रुषौ जगद्धेतू जगन्मयौ ॥ भवद्भ्यां न विना किंचित्परमस्ति न चापरं ॥१८॥ आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ॥ ईयते ब
हुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरं ॥१९॥ यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भांति नाना ॥ एवं भवान्केवल आत्मयोनिष्वा
त्मात्मतंत्रो बहुधा विभाति ॥२०॥ राम राम राम राम राम राम राम राम राम राम राम।

त्मनैव सृष्टमिदं विश्वं अन्वाविश्य कारणत्वादनुप्रविष्टोऽप्यनुप्रविशेव स्थितः ॥ श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भवानेव प्रतीयसे ॥१९
एकस्यैव बहुधा ~~भवानेव प्रतीयते~~ १९ प्रतीतिं सदृष्टान्तमाह ॥ यथा हीति योनिषु स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेषु ॥ चराचरेषु भूतेषु भा
वमहीप्रभृतीनि कारणान्येव नाना भांति ॥ आत्मयोनिषु स्वकारणेषु भूतभौतिकेषु जीवोपि नरमृगादिशरीरेषु बालवृद्धाद्यवस्थासु च तथा
तथा प्रतीयत इति तद्वदेवकेदार्थमात्मतंत्रग्रहणं २०

ननु हस्यादिकर्तृत्वेन सगुणत्वेन च मम किं जीववद्बंधः कः ॥ नहि नहीत्याह सृजसीति ॥ तद्गुणकर्मभिर्वा तैर्गुणैः कर्मभिर्वेत्यर्थः ॥ यतः क्वच
कदाचिदपि बंधहेतुरविद्या तव नैवास्ति ॥ कुत इत्यत आह ॥ ज्ञानात्मन इति ॥ मायाया आश्रयाना वरकत्वादिति भावः ॥ २५ ॥ किंच आस्तांता
तावत्तव बंधशंका यतोऽविद्योपाधेर्जीवात्मनोऽपि न वस्तुतो बंधोऽस्तीत्याह ॥ देहाद्युपाधेरिति भवो जन्म ॥ तन्मूला भिदा च साक्षात्त्वद्रूपतो
नस्यादिति ॥ ननु मम बंधाभाववदता त्वया किं मोक्षो गीकृतः ॥ ॐमिति चेत्तर्हि बंधाभावो मोक्षासंभवादापन्नो बंधोऽपीत्याशंक्याह अत इ

सृजस्यथो लुंपसि पासि विश्वं रजस्तमः सत्त्वगुणैः स्वशक्तिभिः ॥ न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बंधहेतुः
२५ ॥ देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् ॥ अतो न बंधस्तव नैव मोक्षः स्यातां निकामस्त्वयि नो
विवेकः ॥ २६ ॥ त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः ॥ बाध्येत पाखंडपथैरसद्भिस्तदा भवान्सत्त्वगुणं बि
भर्ति ॥ २७ ॥ स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशरा
ज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २८ ॥ ॥ राम राम राम राम राम राम राम राम ॥

ति ॥ यतो नाविद्या अतो न बंधो मोक्षश्च ॥ एवमुभौ न स्यातामित्यर्थः ॥ ननु त्वमेवलेमां बद्धं ज्ञातवान् ॥ यमुनाह्रदे तद्युक्तं दृष्टवानसि ॥ अतः क
थमुभयं नास्त्यत आह ॥ निकाम इति अतिशयेन स्वाभिप्रायानुरूपः त्वयि नोऽस्माकमविवेक एव परमेष्ठत इति ॥ यद्वा ॥ नः अविवेक एव
तवोभौ स्यातामिति ॥ २६ ॥ ननु तर्हि मम अवतारा मत्स्यचरित्राणि च शुक्तिरजतवत् अविद्याकल्पितान्येव किं ॥ नहि नहि ॥ उभयं तु तव लीलेत्या
हाद्वयेन त्वयोदित इति ॥ २७ ॥ स्वेतरांशायया ज्ञानस्तेषां अक्षौहिणीशतानां वधेन भूभारमपनेतुं स्वांशेन रामेण सहावतीर्णोऽसीति ॥ २८ ॥

अत एवंभूतस्य तवागमनेन कृतार्थोस्मीत्याह त्रयेण अद्येति ॥ हे ईश अद्य नो वसतयो गृहाः ॥ तपोवनादपि वरिष्ठतमाः कुतः यावसतीत्वं
साक्षात्प्रविष्टः कथंभूतः ॥ यस्य तव पादसलिलमेव गंगा त्रिजगत्पुनाति ॥ यश्च त्वं पञ्चयज्ञदेवतामूर्तिः स त्वं जगद्गुरुरिति ॥२५॥ स्वमनोरथः
परिपूरित इति हृष्यान्नाह कः पण्डित इति ॥ अतएव गिरः सत्या वाचस्त्वत्तोऽपरं शरणं कः समीयात् केन यतो भवान् भजतः सर्वानभितः कामांश्च द

अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरु
रधोक्षज याः प्रविष्टः ॥२५॥ कः पण्डितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ॥ सर्वान् ददाति सुहृदो भज
तोऽभिकामानात्मानमप्युपचयापचयौ न यस्य ॥२६॥ दिष्ट्याद्य जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः
छिन्ध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायां ॥२७॥ इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः ॥ अक्रू
रं सस्मितं प्राह गीर्भिः संमोहयन्निव ॥२८॥ श्रीभगवानुवाच ॥ त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा ॥ वयं तु रक्ष्याः पोष्या
श्च अनुकंप्याः प्रजा हि वः ॥२९॥ भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥३०॥ न ह्य
म्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥३१॥ राम राम राम राम राम ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ददाति आत्मानमपीति ॥२६॥ नः अविवेकिनां तत्रापि इह गृहे ॥२७॥२८॥ वः युष्माकं प्रजाः पुत्रा हि वयमिति ॥२९॥ ननु नृभिर्देवाः सेव्या इति प्रसि
द्धं तत्राह देवा इति स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥३०॥
तर्हि मृच्छिलादिमयाः किं देवादयो नैवेत्यत आह ॥ न हीति ॥ अम्मयानि तीर्थानि तिष्ठन्मयाः शिलामयाश्च देवा न भवन्ति ॥ अपि तु भवन्त्येव
तथापि साधूनां तेषां च महदन्तरमित्याह ॥ ते पुनन्तीति ॥३१॥ राम राम राम राम राम राम राम राम राम ५ ॥

किंचिच्चिकीर्षयन्त्वागमादिति यदुक्तं तत्कार्यमादिशति ॥ स इति ॥ नः सुहृदां मध्ये भवान् श्रेष्ठः अतः पांडवानां श्रेयश्चिकीर्षया गजसाह्वयं गच्छस्व
गच्छेति यद्वा स्वेति पृथक् पदं हे स्व आत्मीयेत्यर्थः ॥ ३२ ॥ राज्ञा धृतराष्ट्रेण एवं संतेन निवसंति स्म शुश्रुमः श्रुतवंतो वयं ॥ ३३ ॥ दुष्टा ये स्वपुत्रा दुर्योधनादयस्त
द्वशेन गच्छतीति तथा यतः अंधदृक् अंधनेत्रः ॥ इति दशमे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ऊनपंचाशत्तमे तु गत्वाऽक्रूरो गजाह्वयं ॥ राज्ञः स्वभ्रातृपु

स भवान् सुहृदां वै नः श्रेयान् श्रेयश्चिकीर्षया ॥ जिज्ञासार्थं पांडवानां गच्छस्व गजसाह्वयं ॥ ३२ ॥ पितर्युपरते बालाः सह मा
त्रा सुदुःखिताः ॥ आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुमः ॥ ३३ ॥ तेषु राजांबिकापुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्तते नू
नं दुःपुत्रवशगोंधदृक ॥ ३४ ॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥
इत्यक्रूरं समादिश्य भगवान् हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीभागवते महापुराणे दशमस्कं
धे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ श्रीशुक उवाच ॥ स गत्वा हास्तिनपुरं पौरवेंद्रयशोंकितं ॥ ददर्श तत्रांबिकेयं सभीष्मं विदुरं पृ
थां ॥ १ ॥ सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमं ॥ कर्णं दुर्योधनं द्रौणिं पांडवान् सुहृदोऽपरान् ॥ २ ॥ यथावदुपसंगम्य बंधुभि
र्गांदिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययं ॥ ३ ॥ उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया ॥ दुःप्रजस्याल्प
सारस्य खलछंदानुवर्तिनः ॥ ४ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ॥ प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितं ॥ ५

त्रेषु द्वैधं वैषम्यमाज्ञासत ॥ पौरवेंद्राणां यशोभिः तत्कृतदेवब्राह्मणायतनादिभिरंकितं ॥ १ ॥ बाह्लीकपुत्रः सोमदत्तः भारद्वाजो द्रोणः ॥ गौतमः
कृपः ॥ २ ॥ अव्ययं कुशलं ॥ ३ ॥ दुःप्रजस्य असत्पुत्रस्य ॥ अल्पसारस्य मंददृष्टेः ॥ खलानां कर्णादीनां छंदमभिप्रायमनुवर्तितुं शीलं यस्येति तथा त
स्य ॥ ४ ॥ तेजः प्रभावं ओजः शास्त्रादिनैपुण्यं वीर्यं शौर्यं येन सहद्भिः सहमानैश्चिकीर्षितं इति उपरि कर्तुमिष्टं ॥ ५ ॥ श्रीकृष्णाय नमः ॥ रामाय नमः

ॐ

गारस्यविषस्यदानादिअपेशलं अन्यायंमतेजडरूपादिसर्वंकथयामास ॥ ६ ॥ तत्कथनात्सर्वंतरंपृथावात्मजमाहपृथात्विति ॥ अहन्त्वणांकलालेशाययोले
श्वरांशोयस्याःसा ॥ ७ ॥ अपिकिंजामयःकुलस्त्रियः ॥ ८ ॥ पैतृष्वस्रेयानुमत्तवजान् ॥ ९ ॥ सांत्वयिष्यतिकिं ॥ १० ॥ हेमहायोगिन् महानुयोगरूपायोमाया
योस्यास्तीति ॥ हेविश्वात्मन् सर्वंतर्यामिन् ॥ हेविश्वभावनविश्वपालकप्रपन्नाशरणागतां ॥ अवसीदंतींक्लिश्यंतीं ॥ ११ ॥ अपवर्गिकान्मोक्ष

कृतंचधार्तराष्ट्रैर्यद्गरदानाद्यपेशलं ॥ आचख्यौसर्वमेवास्मैपृथाविदुरएवच ॥ ६ ॥ पृथातुभ्रातरंप्राप्तमक्रूरमुपसृत्यतं ॥ उ
वाचजन्मनिलयंस्मरंत्यश्रुकलेक्षणा ॥ ७ ॥ अपिस्मरंतिनःसौम्यपितरौभ्रातरश्चमे ॥ भगिन्योभ्रातृपुत्राश्चजामयःसख्यए
वच ॥ ८ ॥ भ्रात्रेयोभगवान्कृष्णःशरण्योभक्तवत्सलः ॥ पैतृष्वस्रेयान्स्मरतिरामश्चांबुरुहेक्षणः ॥ ९ ॥ सपत्नमध्येशोचंती
वृकाणांहरिणीमिवसांत्वयिष्यतिमांवाक्यैःपितृहीनांश्चबालकान् ॥ १० ॥ कृष्णकृष्णमहायोगिन्विश्वात्मन्विश्वभावन
प्रपन्नांपाहिगोविंदशिशुभिश्चावसीदतीं ॥ ११ ॥ नान्यंतवपदांभोजात्पश्यामिशरणंनृणां ॥ बिभ्यतांमृत्युसंसारादीश्वरस्या
पवर्गिकात् ॥ १२ ॥ नमःकृष्णायशुद्धायब्रह्मणेपरमात्मने ॥ योगेश्वराययोगायत्वामहंशरणंगता ॥ १३ ॥ श्रीशुकउवाच ॥
इत्यनुस्मृत्यस्वजनंकृष्णंचजगदीश्वरं ॥ प्रारुदद्दुःखिताराजन्भवतांप्रपितामही ॥ १४ ॥ समदुःखसुखोऽक्रूरोविदुरश्चम
हायशाः ॥ सांत्वयामासतुःकुंतींतत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥ श्री श्री श्री श्री श्री श्री श्री श्री श्रीराम

प्रदात् ॥ १२ ॥ शुद्धायधर्मात्मनेब्रह्मणेअपरिछिन्नायपरमात्मनेजीवसत्वाययोगेश्वरायअनिमादियुक्तायंयोगायज्ञानात्मने ॥ १३ ॥ प्रपिता
महापांडुःतस्यभार्याकुंत्याप्रोदा ॥ १४ ॥ पृथयासहसमंदुःखंसुखंचयस्यसः ॥ तस्याःपुत्राणामुत्पत्तिहेतुभिर्जानकोर्धर्मादिलेंद्रादिभिस्तत्कथनेरि
त्यर्थः ॥ १५ ॥

श्रीभा
१०
१७२

बंधुभिः रामकृष्णादिभिः सौहृदेन उदितं उक्तं यत् तददिति ॥१६॥ भ्रातर्युपरत इति पांडोः पुत्रेषु सत्सु राज्ञा सन् त्वमास्थित इति काकुः ॥१७॥ भवानत
थापि एवं वर्तमानः श्रेयो वाप्स्यसीत्याह धर्मेणेति तमः नरकं इह च महत् दुःखमिति भावः ॥१९॥ नन्वात्मजानात्मजादिषु कथं समत्वं स्यात् तत्राह।
नेह चेति ॥ अत्यंतं नित्यं संवासः सम्यक्स्थितिः ॥२०॥ तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोः केनापि साहित्यं नास्तीत्याह एक इति ॥२१॥ किंच

यास्यन् राजा ज्ञातीनभ्येत्य विषमं पुत्रलालसं ॥ अवदत् सुहृदां मध्ये बंधुभिः सौहृदोदितं ॥१६॥ अक्रूर उवाच ॥ भो भो वैचित्रवीर्य
त्वं कुरूणां कीर्तिवर्द्धन ॥ भ्रातर्युपरते पांडावधुनासनमास्थितः ॥१७॥ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन् ॥ वर्तमानः स
मः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥१८॥ अन्यथा त्वाचरन् लोके गर्हितो यास्यसे तमः ॥ तस्मात् समत्वे वर्तस्व पांडवेष्वात्मजेषु च ॥१९॥
नेह चात्यंतसंवासः कर्हिचित् केनचित् सह ॥ राजन् स्वेनापि देहेन किमु जायात्मजादिभिः ॥२०॥ एकः प्रसूयते जंतुरेक एव प्रली
यते ॥ एकोनुभुंक्ते सुकृतमेक एव च दुःकृतं ॥२१॥ अधर्मोपचितं वित्तं हरंत्यन्येल्पमेधसः ॥ संभोजनीयापदेशैर्जलानीव जलौक
सः ॥२२॥ पुष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितं ॥ तेकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः ॥२३॥ स्वयं किल्बिषमादाय तै
स्त्यक्तो नार्थकोविदः ॥ असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः ॥२४॥ राम राम राम राम राम राम श्री ॥

यदा च सह संति तदपि क्लेशोपार्जितवित्तापहारितया शत्रव एव ज्ञेया इत्याह ॥ अधर्मेति ॥ संभोजनीयाः पोष्याः पुत्रादयः इति अपदेशैः
अल्पमेधसो मूढस्य वित्तं हरंति जलौकसो मत्स्या जीवनहेतूनि जलानि यथा तद्वदिति ॥२२॥ किंच यानेव पुष्णाति ते धनमादाय हृता जीवंतोपि
वा तं परित्यजंतीत्याह ॥ पुष्णातीति ॥ स्वबुद्ध्या स्वीया इत्यभिमानेन रायश्च अर्थाः ॥ अकृतार्थं [illegible]मप्राप्तभोगं ॥२३॥ ततश्च पापैकपाथेयो नरकं विश
तीत्याह ॥ स्वयमिति असिद्धार्थः अपूर्णमनोरथः ॥२४॥ राम राम राम म राम राम राम श्रीरामाय नमः

राम
१७२

श्रीभा
द॰ उ॰
२७७

स्वप्नश्चमायाचमनोरथश्चतत्तत्तेनतुल्यंआयम्यनियम्य ॥ शांतः सत्समोभवेति ॥ २५ ॥ हेदानपते अक्रूरानतृप्यामिअलमितिनमन्ये ॥ २६
लब्धाप्रियावाक् चलेअस्थिरेहृदिनस्थीयतेनतिष्ठतीत्यर्थः ॥ सुदामापर्वतः तत्रभवाविद्युदिव ॥ तस्मिन्स्फटिकशिलामयेसहसैवा
तिस्फुरंतीविद्युद्यथालीयतेतद्वदित्यर्थः ॥ यद्वा ॥ सुदामामालातस्याइयंसौदामिनी ॥ २७ ॥ नन्वेवंज्ञानतोपिकथमेवमोहइतिचेदत्आह

तस्माल्लोकमिमंराजन्स्वप्नमायामनोरथंवीक्ष्यायम्यात्मनात्मानंसमः शांतोभवप्रभो ॥ २५ ॥
धृतराष्ट्रउवाच ॥ यथावदतिकल्याणींवाचंदानपतेभवान् ॥ तथानयानतृप्यामिमर्त्यः प्रा
प्ययथामृतं ॥ २६ ॥ तथापिसूनृतासौम्यहृदिनस्थीयतेचले ॥ पुत्रानुरागविषमेविद्युत्सौदा
मिनीयथा ॥ २७ ॥ ईश्वरस्यविधिंकोनुविधुनोत्यन्यथापुमान् ॥ भूमेर्भारावताराययोवतीर्णो
यदोःकुले ॥ २८ ॥ योदुर्विमर्शपथयानिजमाययेदंसृष्ट्वागुणान्विभजतेतदनुप्रविष्टः ॥ तस्मै
नमोदुरवबोधविहारतंत्रसंसारचक्रगतयेपरमेश्वराय ॥ २९ ॥ श्रीशुकउवाच ॥ इत्यभिप्रेत्यनृप
तेरभिप्रायंसयादवः ॥ सुहृद्भिःसमनुज्ञातःपुनर्यदुपुरीमगात् ॥ ३० ॥ शशंसरामकृष्णाभ्यांधृत
राष्ट्रविचेष्टितं ॥ पांडवान्प्रतिकौरव्ययदर्थंप्रेषितःस्वयं ॥ ३१ ॥ ३ ॥ श्रीएकोनपंचाशत्तमोध्यायः

ईश्वरस्येतिविधिंविधानंमायामितियावत् ॥ २८ ॥ अतस्तमेवनमस्यतियइतिदुर्विमर्शपथयाअवितर्क्यमार्गया ॥ गुणान्कर्माणितत
चविभजतेविविच्यददातिदुरवबोधोयोविहारस्तस्यक्रीडामः तंत्रंप्रधानंशास्त्रंचकारणंयस्यसंसारचक्रस्य ॥ अतएवतस्यगतिर्यस्मा
मति ॥ २९ ॥ अभिप्रेत्यज्ञात्वा ॥ ३० ॥ ३१ ॥ इतिश्रीश्रीधरस्वामिविरचितायांपदभावार्थदीपिकायामेकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ राम



(47)

156

दशम
3



श्रीभा
द० ३
२

ॐ नमो भगवते वासुदेवाय ॥ ॐ श्रीगणेशाय नमः ॥ ॐ ततः पंचाशतमेव जरासंधभयादिव ॥ कारयित्वां तु धोऽर्ध्मान्निनाय निजं जनं
कपटात्कमपैरेव हत्वा दैत्यानजन्नतः ॥ अजयच्च जरासंधं धर्मेणौरस्तु धार्मिकं ॥ २ ॥ अस्तिप्राप्तिसंज्ञके ई यतुर्भ्रमतुः ॥ ३ ॥ कंसे शोकः
कृत्ले अमर्षः ताभ्यां युतः ॥ ३ ॥ न्यवहन्मगधं रोध ॥ ४ ॥ तस्य बलं सैन्यं उद्वेलं लंघितमर्यादं सागरमिव ॥ तेन तस्य बलेन संरुद्धं ॥ ५ ॥ किंच

श्री ३ क ३ वा २ ॥ ॐ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ मृते भर्तरि दुःखार्ते ईयतुः स्म पितुर्गृहा
न ॥ १ ॥ पित्रे मगधराजाय जरासंधाय दुःखिते ॥ वेदयांचक्रतुः सर्वमात्मवैधव्यकारणं ॥ २ ॥ स तदप्रियमा
कर्ण्य शोकामर्षयुतो नृप ॥ अयादवीं महीं कर्तुं चक्रे परममुद्यमं ॥ ३ ॥ अक्षौहिणीभिर्विंशत्या तिसृभिश्चा
पि संवृतः ॥ यदुराजधानीं मथुरां न्यरुधत्सर्वतो दिशं ॥ ४ ॥ निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरं ॥ स्वपुरं
तेन संरुद्धं स्वजनं च भयाकुलं ॥ ५ ॥ चिंतयामास भगवान् हरिः कारणमानुषः ॥ तद्देशकालानुगुणं स्वावतार ३
प्रयोजनं ॥ ६ ॥ हनिष्यामि बलं ह्येतद्भुवि भारं समाहितं ॥ मागधेन समानीतं वश्यानां सर्वभूभुजां ॥ ७ ॥ अ
क्षौहिणीभिः संख्यातं भटाश्वरथकुंजरैः ॥ मागधस्तु न हंतव्यो भूयः कर्ता बलोद्यमं ॥ ८ ॥ राम राम

तमेव हन्म्यनेन मागधं ॥ मागधं वा हत्वा बलं ग्रहीष्यामि ॥ यद्वा समागधं सर्वं हन्मीति चिंतयामास ॥ न तु प्रथमं कथं जेष्यामीत्येवं चिंत
यितुं युक्तं ॥ तत्राह कारणमानुष इति ॥ भूभारावतारकारणेन मानुषः न तत्त्वत इति ॥ ६ ॥ एवं द्विधा विचिंत्य प्रथमं पक्षं निर्धारितवान् राम
तत्राह एतद्बलं ॥ हनिष्यामीति ॥ भूयः बलोद्योगं कर्ता करिष्यति ॥ ८ ॥ राम राम राम राम राम राम ॥ २

न्वतएवमागधोहंतमत्राह॥ एतच्छ्रार्थमाश्यति॥ भूभारहरणायेति॥१९॥ अयमेतदर्थावतार इत्युपलक्षणमित्याह॥ अन्योपी
ति॥ प्रभवतश्च्यवतः॥१९॥ सम्हतो सारथि सहितोपरिच्छदः परिकरः ध्वजकवचादिः तत्सहितो॥२१॥२४॥ त्वेनाप्योविश्चे येषांतेत्वांवतः
तेषां॥२२॥२४॥ दंशितो बद्धकवचोस्त्वायुधा न्योशोभनायुधसंपन्नो॥२५॥२६॥ उत्तधाऽधमायस्मादितिवात्तवोर्थः॥ हेउत्तमोत्तमेति

३ एतदर्थावतारोहिभूभारहरणायमे॥ संरक्षणायसाधूनांकृतोन्येषांवधायच॥१९॥ अन्योपिधर्मरक्षायै देहः सं
ध्रियतेमया॥ विरामायाप्यधर्मस्यकालेप्रभवतःक्वचित्॥२०॥ एवंध्यायतिगोविंदेआकाशात्सूर्यवर्चसौ॥ र
थाउपस्थितौमद्यः सम्रतौसपरिच्छदौ॥२१॥ आयुधानिचदिव्यानिपुराणानियदृच्छया॥ दृष्ट्वातानिहृषीके
शः संकर्षणमथाब्रवीत्॥२२॥ श्रीभगवानुवाच॥ पश्यार्यव्यसनंप्राप्तं यदूनांत्वावतांप्रभो॥ एषतेरथआया
तोदयितान्यायुधानिच॥२३॥ यानमास्थायजह्येतद्व्यसनात्स्वान्समुद्धर॥ एतदर्थंहिनौजन्मसाधूनामिह
शर्मकृत्॥२४॥ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु = एवंसंमंत्र्य दाशार्हौ दंशितौरथिनौपुरात्॥ निर्ज ग्मा
ग्मतुःस्वायुधाढ्यौबलेनाल्पीयसावृतौ॥२५॥ शंखंदध्मौविनिर्गत्यहरिर्दारुकसारथिः॥ ततोभूत्परसैना
त्साद्वित्रासवेपथुः॥२६॥ तावाहमागधोवीक्ष्य हेकृष्णपुरुषाधम॥ नत्वयायोद्धुमिच्छामि बालेनैकेनलज्जया
२७ गुप्तेनहित्वयामंद नयोत्स्येयाहिबंधुहन्॥२८॥ तवरामयदिश्रद्धायुध्यस्वधैर्यमुद्वह॥ हित्वावामच्छरैश्छिन्नंदेह
स्वर्याहिमांजहि॥२९॥ श्रीकृष्ण उवाच॥ नवैशूराविकत्थंते दर्शयंत्येवपौरुषं॥ नगृह्णीमोवचोराजन्नातुरस्यमुमूर्षतः॥३०

१७ शुद्धेनसर्वीनरत्वाद्दर्शनानर्हो॥ हेअमंदबभाषीतिबध्नुविद्यानांहंतीतितथा॥ हेअविद्यानिरसनेति॥ याहिपाश्चुहि॥२७॥ अके योदेहोसावि
तिस्वयमेवमत्वानन्यदितोपायत्सांतरमाह॥ यद्वामांजहीति॥२९॥ पद्याञ्ञानार्थग्रहणेनभगवतउत्तरं॥ नवैशूराविकत्थंते स्वाघंते॥२१॥ राम॥

श्रीभा
ह ३
२

माधवो मधुवंशानां भवो महता सैन्यसङ्घेन आहतवान् ॥ वायुरिवेः सूर्यैरेण अभिभ्राणि यथेत्य दर्शनमात्रमेवावधारणामिति सूचितं ॥ २२ ॥ २३
पृतनीकानि परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघा तेषां शिलीमुखा बाणा एव तोयानि तस्तुल्यणं वर्षं तेन पीडितं व्यस्फूर्तयत् ॥ उक्तं
मितवान् ॥ २३ ॥ तदाह शृङ्गमिति ॥ निषङ्गादिषुधेः शमात् गृहीत्वा ॥ अथ तान् गुणे संदधत् ॥ गुणमारुह्य निशितं बाणा सम्यक् हानुं च नियन्

नरास्ततस्तावभिहत्य माधवो महाबलो वेन बलीयसा हरिणा ॥ ससैन्ययानध्वजवाजिसारथीन् सूर्यानिलो
वायुरिवाभ्ररेणुभिः ॥ २१ ॥ सुपर्णतालध्वजचिह्नितौ यथा वलत्सयन्त्या हरिरामयोद्धृधे ॥ स्त्रियः पुराट्टालकहर्म्य
गोपुरं समाश्रिताः संकुलनेत्रचापिताः ॥ २२ ॥ हरिः परानीकपयोमुचां गणैः शिलीमुखासारतुल्यवर्षपीडितं
स्वसैन्यमालोक्य सरारातशरार्चितं व्यस्फूर्जयच्छार्ङ्गशरासनोत्तमं ॥ २३ ॥ शृङ्गान्निषङ्गादथ संदधच्छरान्विहृष्य
मुंचच्छितबाणमार्गणैः ॥ निचुक्षुयात्कुञ्जरवाजिपत्तीन्निरन्तरं युद्धदलानि चक्रे ॥ २४ ॥ निर्भिन्नकुम्भाः करिणो नि
पेतुरनेकशोऽश्वाः शरदृक्त्ककन्धराः ॥ रथा हतत्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकन्धराः ॥ २५ ॥ संछि
द्यमाना द्विपदेभवाजिना मेषात्सृताः शतशो ह्यगापगाः ॥ भुजाहयः सूत्रकशीर्षकच्छपा हताद्विपद्वीपमहाग्र
हाकुलाः ॥ २६ ॥

प्रहरन्नूपत्तिः परानिर्निरन्तरमिति ग्रहणादिक्रियाविशेषणं ज्वलत्कांश्चभ्रमणेनयथा चक्रे वक्रवर्तिनं छत्रं व्यस्फूर्जयदिति ॥ २४ ॥ हता
श्वाश्च्युताः सूतानायकाश्छिन्नभुजा येषां ॥ २५ ॥ संछिद्यमानानि द्विपदाइभावाजिनश्च तेषामंगोभ्यः प्रसृताः असृगापगाः काधिरने
द्यः परस्परं प्रवर्तिता इति नन्तीयानान्वयः ॥ पत्तिसिद्धनदीरूपकमाह ॥ भुजाएवाहयो याभ्रताः पुरुषाणां शीर्षाण्येव कच्छपा याहुताः
हताद्विपाश्चान्तर्वर्तिनं तानि ॥ हयाएवग्रहाग्राहाः तैराकुला व्याप्ताः ॥ २६ ॥ राम राम राम राम राम राम राम राम ॥ राम
२

करऊरव ज्ञातपव मीनायासुताः ॥ नराणां केशा एव शैवालायासुताः ॥ धनूंष्येव तरंगाः ॥ आयुधान्येव गुल्मास्तैर्बहुसंकुलाः ॥ अकूरिकावर्ताणि
वर्काणिवातान्येववर्ताः तैर्भयानकाः महामणीनां प्रवेका उत्तमा आभरणानि च ॥ यस्यां यस्य अश्मानस्त शर्करा यस्यां सुताः ॥ २४ ॥ भीरुणांभ
यावहाः मनस्विनां हर्षकर्यः ॥ २५ ॥ किंच ॥ संकर्षणापितद्बलं स्वयं प्राणीतं ॥ हे अग्रा हे राजन् ॥ अर्णववद्दुर्गमं मे त्वं भयक्तंच यतो दुरंतपारं अतो
अतलपारमवधिः ॥ दुःशाहोनिषेधे ॥ विक्रमेणाग्रंथ शतस्त्र निरवधिकमित्यर्थः ॥ किंच ॥ मगधेंद्रेणापालितं मद्बलं ॥ यदेवं सुतामहत्स्याः

करोरुमीना नरकेशशैवला धनुस्तरंगायुधगुल्मसंकुलाः ॥ अकूरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः २१
प्रवर्तिताभीरुभयावहा मृधे मनस्विनां हर्षकरीः परस्परं ॥ विनिघ्नतारीन्मुसलेन दुर्मदान्संकर्षणेनापरिमेयतेजसा ॥ २८ ॥
बलं तदंगार्णवदुर्गभैरवं दुरंतपारं मगधेंद्रपालितं ॥ क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परं ॥ २९ ॥ स्थित्युद्भ
वांतं भुवनत्रयस्य यः समीहतेऽनंतगुणः स्वलीलया ॥ न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ३० ॥ जग्राह
विरथं रामो जरासंधं महाबलं ॥ हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ॥ ३१ ॥ बध्यमानं हतारातिं पाशैर्वारुणमानुषैः
वारयामास गोविंदस्तेन कार्यचिकीर्षया ॥ ३२ ॥ स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः ॥ तपसे कृतसंकल्पो वारितः पथि
राजभिः ॥ ३३ ॥

कर्मोत्कृष्टं तत्परं केवलं तयोर्विक्रीडितं न तु पराक्रमः ॥ २९ ॥ नैवैतदाश्चर्यमित्याह ॥ स्थित्युद्भवांतमिति ॥ तर्हि किमित्याश्चर्यमिव वर्णितं ॥ तत्राहुः ॥ त
थापीति मर्त्याननुविधस्य ॥ ३० ॥ अनुकरोतीति मर्त्यानुविधिः तस्य ॥ ३१ ॥ किंच ॥ जग्राहेति ॥ हतान्यनीकानि यस्य ॥ अवशिष्टा असव एव यस्य तं तथा ॥ ३१
हताः बहुशः अरातयो येन ॥ तथाभूतमपि जरासंधं बध्यमानं वारयामासेति ॥ ३२ ॥ राम राम राम राम राम राम राम ॥

श्रीभा
१०.५
१

पवित्राणि धर्मोपदेशपराणि पदानि येषु तैर्वाक्यैः । न यथैनैनीतिभिः प्राकृतैर्लौकिकैः तथा लौकिकन्यायमाह ॥ स्वकर्मेति । यद्भिर्लोकैः कृ
त्वा तेषु हतः पराभवः केवलं कर्मबंधेन प्राप्तः । अतस्त्वया न लज्जितव्यमिति ॥ ३४ ॥ बार्हद्रथो जरासंधः ॥ ३५ ॥ मुकुंदोपि ययावित्यन्वयः ॥ न
सतं वलयस्य सः । तस्यैवान्वत हस्यासतपतिसंधानादिति भावः ॥ निस्तीर्णाः अनायासेनैव तीर्णाः । अखिलार्णवो येन साधु साधिते । अन्तमीदि

वाक्यैः पवित्रार्थपदैर्नयैर्नैः प्राकृतैरपि । स्वकर्मबंधप्राप्तो यदुभिस्ते पराभवः ॥ ३४ ॥ शुक उवाच ॥ इत्येवं सर्वलोकेषु जरासंधो
नृपस्तदा । उपेक्षितो भगवता मागधान् दुर्मनाययौ ॥ ३५ ॥ मुकुंदोप्यक्षतबलो निस्तीर्णारिबलार्णवः ॥ विकीर्यमाणः कुसु
मैस्त्रिदशैरनुमोदितः ॥ ३६ ॥ माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधवंदिभिः ॥ ३७ ॥ शंख
दुंदुभयो नेदुर्भेरीतूर्याण्यनेकशः । वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ ॥ ३८ ॥ सिक्तमार्गां हृष्टजनां पताकाभिरलंकृतां
निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां ॥ ३९ ॥ विनीयमानो नारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्क
लितलोचनैः ॥ ४० ॥ आयोधनगतं वित्तमनंतं वीरभूषणं ॥ यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः ॥ ४१ ॥ एवं सप्तदशकृत
स्तावत्यक्षौहिणीबलः ॥ युयुधे मागधो राजा यदुभिः कृष्णपालितैः ॥ ४२ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

नश्व ॥ ३६ ॥ प्रत्युद्यैतैर्मथुरावासिभिर्जनैः ॥ उपसंगम्य मिलित्वा ॥ ३७ ॥ तदा च प्रभौ पुरं प्रविशति सति शंखादयो नेदुः ॥ ३८ ॥ कथंभूतं पुरं तदा
ह ॥ सिक्तमार्गामिति ॥ ब्रह्मघोषेण निर्घुष्टां निनादितां कौतुकेन उत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां तां ॥ ३९ ॥ विनीयमानः प्रविवेशेति वि
परिणतान्वयः ॥ ४० ॥ आयोधनं रणभूमिः तत्र वित्तं वीराणां भूषणं ॥ ४१ ॥ तावति इति परिच्छेदः ॥ तावति पराजये वर्तमानेपि अक्षौहिणीपरिव
लयस्य सः सप्तदशकृत्वः सप्तदशवारान् युयुधे ॥ ४२ ॥ रामाय नमः ॥ श्रीकृष्णायनमः ॥ श्रीरामायनमः ॥ परमहंसायनमः ॥ ॥ राम ॥

राम
१

श्रद्धिमाकृत्हयंनितः ॥ ४३ ॥ अष्टादशमेअष्टादशेसंग्रामेभावितेतन्मध्येकालयवनोऽकस्मात्त्वागमः ॥ ४४ ॥ आत्मसंमितान्नवतुल्यान् ॥ ४५ ॥ ह
जिनं तुःख ॥ उभयतः यवनात्जरासंधाच्च ॥ ४६ ॥ तदाहद्दयेन ॥ निरुंधेनितराद्धि ॥ ४७ ॥ अस्पष्टानेन सह ॥ ४७ ॥ ४८ ॥ समुद्रमध्येपुरमनंतनमध्ये उर्वित
न्मध्येनगरंहेनावस्त्राद्भुतं सर्वाश्चर्यमयंअचीकरतकारयामास ॥ ४ ॥ तत्त्वाविश्वकर्मातदीयंशिल्पनेशिल्पक्रियाकौशल ॥ तदाहसार्धेद्विभिः ॥ ब

अद्रिएवंत्त्वदलंसर्वेहस्यः कस्मितेजसा ॥ हतेषुत्तेषुसैन्येषुत्यक्तोयादविभिर्नृपः ॥ ४३ ॥ अष्टादशमसंग्रामेआगामिनि
तदंतरा ॥ नारदप्रेषितोवीरोयवनःप्रत्यदृश्यत ॥ ४४ ॥ रुरोधमथुरामेत्यतिस्रभिर्म्लेच्छकोटिभिः ॥ श्लोकेचाप्यतिहद्वोष्ट
त्वीकृत्त्वात्मसंमितान् ॥ ४५ ॥ तंदृष्ट्वाचिंतयत्कृष्णः संकर्षणसहायवान् ॥ अहोयदूनांवृजिनंप्राप्तंह्युभयतोमहत् ॥ ४६ ॥
यवनोयंनिरुंधेस्मानद्यतावन्महाबलः ॥ मागधोप्यद्यवाश्वोवापरश्वोवागमिष्यति ॥ ४७ ॥ आवयोयुध्यतोरस्ययद्यागंताज
रासुतः ॥ बंधून्वधिष्यत्यथवानेष्यतेस्वपुरंबली ॥ ४८ ॥ तस्माद्द्यविधास्यामोदुर्गंद्विपदर्दुर्गमं ॥ तत्रज्ञातीन्समाधाययवनं
घातयामहे ॥ ४९ ॥ इतिसंमन्त्र्यभगवान्दुर्गंद्वादशयोजनं ॥ अंतःसमुद्रेनगरंकृत्स्नाद्भुतमचीकरत् ॥ ५० ॥ दृश्यतेयत्रहिलो
कविज्ञानंशिल्पनैपुणं ॥ रथ्याचत्वरवीथीभिर्यथावास्तुविनिर्मितं ॥ ५१ ॥ सुरद्रुमलतोद्यानविचित्रोपवनान्वितं ॥ हेमशृं
गैर्दिवस्पृग्भिःस्फाटिकाट्टालगोपुरैः ॥ ५२ ॥

ध्येति ॥ रथ्याराजमार्गाः ॥ चत्वरोवीथ्यउपमार्गाः पश्चिमतः उभयतोपिचत्वराणएवनानानितन्मध्येकोष्ठाः ततोप्यंतः सुवर्णभवनानितदुपरिस्फाटिकाट्टा
लकाः तदुपरिहेमकुंभाइतिवद्दृश्यमिकंयथावास्तुगृहादिनिर्माणस्थानंतदनतिक्रम्यविनिर्मितं ॥ ५१ ॥ सुराणांद्रुमालताश्चयेषुतान्युद्यानानि
विचित्रोपवनानिचतैरन्वितं ॥ हेममयानिशृंगाणियेषुतैः ॥ दिवस्पृग्भिरत्युच्चैः स्फाटिकाअट्टालाउपरिभूमिकाः गोपुराणिद्वाराणिच तैर्निर्मितमित्यु
त्तरेणान्वयः ५२

राजतं च आरकूटं च पीतलं लोहिताभ्यां निर्मितैः कोष्ठैः अश्वशालान्नशालादिभिः कथंभूतैः हेमकुंभैः अलंकृतैः तथा रत्नकूटैः पद्मरागादि
शिखरैः हेमैः सौवर्णैः महामरकतमयानि स्थलानि येषु तैः गृहैः ॥५३॥ किंच ॥ नगरगृहादौ वास्तोष्पतीनां देवतानां च गृहैः वलभीभिश्च
शालिकाभिश्च निर्मितं ॥ यदु देवगृहे राजगृहै तल्लक्षकैः भमान ॥५४॥ पारिजातं च प्राहिणोत् प्रस्थापयामासेति ॥ शुकपरीक्षितं संवादात्स्वं

रजतारकूटैः कोष्ठैर्हेमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थलैः ॥५३॥ वास्तोष्पतीनां च गृहैर्वल्लभीभिश्च
निर्मितं ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥५४॥ सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः ॥ यत्र चावस्थितो मर्त्यो
मर्त्यधर्मैर्न युज्यते ॥५५॥ श्यामैककर्णान्वरुणो हयाञ्छुक्लान्मनोजवान् ॥ अष्टौ निधिपतिः कोशांल्लोकपालो निजो
दयान् ॥५६॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥५७॥ तत्र योगप्रभावेन नी
त्वा सर्वजनं हरिः ॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः ॥५८॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ॥५९॥ इति
भागवते पं दशस्कंधे पंचाशत्तमोध्यायः ॥५०॥ राम राम राम राम राम ॥ राम राम राम ॥

भाविलादनुद्भूतनिर्देशः ॥ मर्त्यधर्मैः क्षुत्पिपासादिषड्ऊर्मिभिः ॥५५॥ निधिपतिः कुबेरः अष्टौ निधीन्कोशान् ॥ पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथो
दकः ॥ नीलो मुकुंदः शंखश्च निधयोऽष्टौ प्रकीर्तिताः इति प्रसिद्धान् निजोदयान् निजविभूतीः ॥५६॥ अन्ये च सिद्धादयः भगवता स्वाधिकारसिद्ध
ये यद्यदाधिपत्यं दत्तमासीत् ॥ तत्सर्वं प्रत्यर्पयामासुरिति ॥५७॥ ॥५८॥ यथा नकालयवनो वेत्ति तथा यं जनः तथा योगप्रभावेन नीत्वा तत्र मध्रस्थि
तान्प्रजाः पालयत्यलं पालयिष्यति इति समनुमंत्रितः कृतानुमंत्र इत्यर्थः ॥५९॥ इति श्रीभागवते टीकायां दशमस्कंधे पंचाशत्तमोध्यायः ॥५०॥ ॥

एकपंचाशत्तमे हक्तुकुंदहष्याहरिः॥ यवनं ... ऽदेवस्ततः सनन्दकं पतन्॥१॥ यवनेन्द्रस्तत्काल कालयवनाय दुर्भीषणात्॥ हर्षितेर्वरिण्यः॥ स्वैरी
पालनाय पलायत॥३॥ यदा गार्ग्यः स्यालेन षंठ इत्युक्तः तदा यादवैः कृतोपहसितः क्रुद्धो मोक्षमहेशं भूयसाराध्य यदुभीषणं पुत्रं लब्धवान्॥ तत
श्च यवनेन्द्रेण पुत्रेणार्थितेन पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिद्धं॥ प्रबद्धार्गाद्दिति निष्क्रान्तमुज्जिहानमु

श्रीशुक उवाच॥ तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपं॥ दर्शनीयतमं श्यामं पीतकौशेयवाससं॥१॥ श्रीवत्सव
क्षसं भ्राजत्कौस्तुभामुक्तकंधरं॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं॥२॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं
मुखारविंदं बिभ्राणं स्फुरन्मकरकुंडलं॥३॥ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः॥ चतुर्भुजोऽरविंदाक्षो वन
माल्यतिसुंदरः॥४॥ लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति॥ निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः॥५॥ इति
निश्चित्य यवनः प्राद्रवंतं पराङ्मुखं॥ अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनां॥६॥ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे॥
नीतो दर्शयता दूरं यवनेशोऽद्रिकंधरं॥७॥ पलायनं यदुकुले जातस्य तव नोचितं॥ इति क्षिपन्ननुगतो नैनं प्रापाहता
शुभः॥८॥ एवं क्षिप्तोऽपि भगवान्प्राविशद्गिरिकंधरं॥ सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं॥९॥ नन्वसौ दूरमानीय शे
ते मामिह साधुवत्॥ इति मत्वाच्युतं मूढस्तं पदा समताडयत्॥१०॥ राम राम राम राम राम राम॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्कंधरं॥१॥२॥ नित्यप्रमुदितमित्यादीनि मुखारविंदविशेषणानि॥३॥४॥ नारदप्रोक्तैरेतैर्लक्षणैरयं पुमान्वासुदेव एव नान्यो भवितुमर्ह
ति अयं च निरायुधः॥ अतोऽनेन चलन्पद्भ्यां निरायुध एवाहं योत्स्यामि॥५॥ इति निश्चित्य पराङ्मुखं प्राद्रवंतं अन्वधावदित्यन्वयः॥६॥ आत्मानं हस्त
प्राप्तमिव दर्शयता हरिणा नीत इत्यन्वयः॥७॥ अहताशुभः अक्षीणकर्मा॥८॥९॥ तं शयानमच्युतं मत्वा समताडयदिति॥१०॥ ॥ रामायनमः